अथ षोडशोऽध्यायः

राजोवाच-

उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते ॥१॥

उक्तः त्वया भूमण्डल आयाम विशेषः यावत् आदित्यः तपति यत्र च असौ ज्योतिषां गणैः चन्द्रमा वा सह दृश्यते ॥१॥*

त्वया	आपने	**सह चन्द्रमा**	साथ चन्द्रमा
यावत्	जहाँ तक	**दृश्यते**	दीखता है
आदित्यः तपति	सूर्य तपता है	**भूमण्डल**	भू-मण्डलका
वा	अथवा	**आयाम**	विस्तार
यत्र च असौ	जहाँ तो यह	**विशेषः**	विशेष
ज्योतिषां गणैः	तारागणोंके	**उक्तः**	बतलाया ॥१॥

तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचित एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥२॥

तत्र अपि प्रियव्रत रथचरण परिखातैः सप्तभिः सप्तसिन्धवः उपक्लृप्ताः यत एतस्याः सप्तद्वीप विशेष विकल्पः त्वया भगवन् खलु सूचितः एतत् एव अखिलं अहं मानतः लक्षणतः च सर्वं विजिज्ञासामि ॥२॥

---

*यहाँसे लेकर स्कन्धके अन्त तक भूगोल खगोलका जो वर्णन है, वह स्थूल-सूक्ष्म जगतका मिला-जुला वर्णन है। यह वर्णन केवल हमारे स्थूल जगतका नहीं है। अतः इसको ठीक-ठीक समझाना सम्भव नहीं है। केवल शब्दार्थ मात्र दिया जा रहा है। यही भू-मण्डलका विस्तार समस्त तारागणों तक कहा गया—यह विशेष ध्यान देने योग्य है।

तत्र अपि	वहाँ (भू-मण्डल विस्तारमें) भी•
प्रियव्रत	प्रियव्रतके
रथचरण	रथके पहियेसे
सप्तभिः	सात बार घूमनेसे
परिखातैः	खाई के रूपमें
सप्तसिन्धवः	सात समुद्र
उपक्लृप्ताः	बन गये
यत एतस्याः	जिससे इस (पृथ्वी)के
सप्तद्वीप विशेष	सात द्वीप विशेषकी
विकल्पः	रचना
भगवन् त्वया	भगवन् आपने
खलु सूचितः	जो बतलायी
एतत् एव	इसी
अखिलं	सम्पूर्णको ही
अहं	मैं
मानतः	परिमाण तथा
लक्षणतः	लक्षणों सहित
सर्वं	सब (पूरा विवरण)
विजिज्ञासामि	जानना चाहता हूँ ॥२॥

भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद् गुरोऽर्हस्यनुवर्णयितुमिति ॥३॥

भगवतः गुणमये स्थूलरूप आवेशितं मनः हि अगुणे अपि सूक्ष्मतम आत्म ज्योतिषि परेब्रह्मणि भगवति वासुदेव आख्ये क्षमं आवेशितुं तत् उ ह एतत् गुरोः अर्हसि अनुवर्णयितुं इति ॥३॥

हि भगवतः	क्योंकि भगवान्के
गुणमये	गुणमय (त्रिगुणात्मक)
स्थूलरूपे	स्थूल (विराट्) रूपमें
आवेशितं	प्रविष्ट कराया
मनः	मन
अगुणे	निर्गुण
सूक्ष्मतम	अत्यन्त सूक्ष्म

•स्पष्ट है कि ये सात समुद्र और सात द्वीप विशेष वर्तमान ज्ञात पृथ्वीमें ही नहीं हैं। वर्तमान ज्ञात पृथ्वी तो केवल कर्म-क्षेत्र भारतवर्ष ही है। जम्बू द्वीपका शेषभाग और अन्य द्वीप तथा क्षार समुद्रसे भिन्न समुद्रादि सूक्ष्म जगतमें ही होने चाहिए।

आत्म	स्वयं
ज्योतिषि	प्रकाश
भगवति	भगवान्
वासुदेव आख्ये	वासुदेव कहलाने वाले
परेब्रह्मणि	परमब्रह्ममें
अपि	भी

आवेशितं	
क्षमं	प्रविष्ट करानेमें
तत् उ ह	सक्षम हो जाता है।
एतत्	अतः निश्चय
गुरो:	इसका
अनुवर्णयितुं	गुरुदेव ! (आपको)
अर्हसि	वर्णन करना चाहिए ॥३॥

शुक उवाच-•

न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥४॥

न वै महाराज भगवतः माया गुण विभूतेः काष्ठां मनसा वचसा वा अधिगन्तुं अलं विबुध आयुष अपि पुरुषः तस्मात् प्राधान्येन एव भूगोलक विशेषं नाम रूप मान लक्षणतः व्याख्यास्यामः ॥४॥

महाराज	महाराज !
भगवतः	भगवान्की
माया गुण	मायाके गुणोंके
विभूतेः	वैभवकी
काष्ठां	पराकाष्ठाका पार
वचसा	वाणीसे

---

* यहाँ यह स्पष्ट है कि यह भूगोल-खगोलका वर्णन भूगोल-खगोलकी जानकारीके लिए नहीं पूछा गया है। भूगोल तथा खगोलमें परिवर्तन होते ही रहते हैं। ग्रह-नक्षत्रादि भी बनते-नष्ट होते रहते हैं। उनका स्थायी कोई रूप नहीं है। स्थूल जगत तो परिवर्तनशील है। यहाँ विराट् रूपका जो शाश्वत है—ऐसा वर्णन पूछा गया है, जिसमें मन लगने पर भगवान्के सूक्ष्म परंब्रह्म रूपमें मनको प्रविष्ट किया जा सके। अतः यहाँका सब वर्णन भावनापूर्वक ध्यानके उपयोगका ही है।

• अन्य प्रतियोंमें यहाँ 'ऋषिरुवाच' है।

अष्टभिः	आठ	**सुविभक्तानि**	भलीप्रकार बंटे हुए
मर्यादा	सीमा-विभाजक	**भवन्ति**	हैं ॥६॥
गिरिभिः	पर्वतों द्वारा		

एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत् सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥७॥

एषां मध्ये इलावृतंनाम अभ्यन्तरवर्षं यस्य नाभ्यां अवस्थितः सर्वतः सौवर्णः कुलगिरिराजः मेरुः द्वीपायां असम उन्नाहः कर्णिकाभूतः कुवलय कमलस्य मूर्धनि द्वात्रिंशत् सहस्र योजन विततः मूले षोडश सहस्रं तावता अन्तः भूम्यां प्रविष्टः ॥७॥

एषां मध्ये	इन (देशोंके) बीचमें	**कमलस्य**	कमलकी
इलावृतंनाम	इलावृत नामका	**कर्णिकाभूतः**	कर्णिकाके समान है।
अभ्यन्तरवर्षं	सबसे भीतरी देश है	**मूर्धनि**	शिखर भागमें
यस्य नाभ्यां	जिसके मध्यमें	**द्वात्रिंशत्**	बत्तीस
सर्वतः सौवर्णः	सब ओरसे सोनेका	**सहस्र योजन**	हजार योजन
कुलगिरिराजः	कुल पर्वतोंका राजा	**विततः**	फैला हुआ है।
मेरुः	सुमेरु	**मूले षोडश**	जड़के पास सोलह
अवस्थितः	स्थित है।	**सहस्रं**	सहस्र (योजन) है।
द्वीपायां	द्वीपमें	**तावता**	इतना ही (सोलह सहस्र योजना)
असम उन्नाहः	विषम रूपसे ऊपर उठा है।	**अन्तः भूम्यां**	पृथ्वीके भीतर
कुवलय	भूमण्डल रूप	**प्रविष्टः**	घुसा हुआ है ॥७॥

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यक-हिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारो-

वधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥८॥

उत्तर उत्तरेण इलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयः रम्यक हिरण्मय कुरूणां वर्षाणां मर्यादा गिरयः प्रागायता उभयतः क्षारोद अवधयः द्विसहस्र पृथवः एक एकशः पूर्वस्मात् पूर्वस्मात् उत्तर उत्तरः दशांश अधिक अंशेन दैर्घ्य एव ह्रसन्ति ॥८॥

इलावृतं	इलावृतके
उत्तर उत्तरेण	उत्तरके उत्तरमें
नीलः श्वेतः	नील, श्वेत,
शृङ्गवान्	शृंगवान्
इति त्रयः	इस प्रकार तीन
रम्यक	रम्यक,
हिरण्मय	हिरण्मय,
कुरूणां वर्षाणां	कुरु देशोंके
मर्यादा	सीमा निर्धारक
गिरयः	पर्वत
प्रागायता	बतलाये जाते हैं।
उभयतः	(ये) दोनों ओर (पूर्वसे पश्चिम तक)
क्षारोद	खारे पानी(समुद्रके)
अवधयः	तक फैले हैं
द्विसहस्र	(प्रत्येक) दो सहस्र
पृथवः	(योजन) चौड़ा है।
एक एकशः	एक-एक करके
पूर्वस्मात्	पूर्व-
पूर्वस्मात्	पूर्व वालों से
उत्तर उत्तरः	पिछले-पिछले
दशांश अधिक	दशांसे कुछ अधिक
अंशेन	अंशसे
दैर्घ्यं एव	लम्बाई में ही
ह्रसन्ति	कम होते हैं ॥८॥

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथा संख्यम् ॥९॥

एवं दक्षिणेन इलावृतं निषधः हेमकूटः हिमालयः इति प्रागायता यथा नीलादयः अयुत योजन उत्सेधा हरिवर्ष किम्पुरुष भारतानां यथा संख्यम् ॥९॥

एवं	इसी प्रकार
इलावृतं	इलावृतके
दक्षिणेन	दक्षिणमें
निषधः	निषध,

हेमकूटः	हेमकूट,	उत्सेधा	ऊँचे हैं।
हिमालयः	हिमालय	हरिवर्ष	हरिवर्ष
इति	इस प्रकार	किम्पुरुष	किम्पुरुष वर्ष
प्रागायता	बतलाये गये हैं।	भारतानां	भारतवर्षके
यथा	जैसे	यथा संख्यं	क्रमानुसार (सीमा पर्वत हैं)॥९॥
नीलादयः	नील आदि पर्वत हैं		
अयुत योजन	(ये भी) दस हजार योजन		

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानील निषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥१०॥

तथा एव इलावृतं अपरेण पूर्वेण च माल्यवत् गन्धमादनः आनील निषध आयतौ द्विसहस्रं पप्रथतुः केतुमाल भद्राश्वयोः सीमानं विदधाते ॥१०॥

तथा एव	इसी प्रकार	निषध	निषध पर्वत तक
इलावृतं	इलावृतके	आयतौ	फैले हुए
अपरेण	दूसरी (पश्चिम ओर	द्विसहस्रं	दो हजार योजन
		पप्रथतुः	चौड़ाई वाले
च पूर्वेण	तथा पूर्वमें	केतुमाल	केतुमाल वर्ष
माल्यवत्	माल्यवान तथा	भद्राश्वयोः	भद्राश्व वर्षकी
गन्धमादनः	गन्धमादन (पर्वत)	सीमानं	सीमायें
आनील-	नील और	विदधातेः	बनाते हैं ॥१०॥

मन्दरो मेरुमन्दरः सुपाश्र्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः ॥११॥

मन्दरः मेरुमन्दरः सुपाश्र्वः कुमुदः इति अयुत योजन विस्तार उन्नाहा मेरोः चतुर्दिशं अवष्टम्भ गिरयः उपक्लृप्ताः ॥११॥

मन्दरः	मन्दर,
मेरुमन्दरः	मेरुमन्दर,
सुपार्श्वः	सुपार्श्व
कुमुदः	कुमुद
इति	इस नामके
अयुत	दस-दस हजार
योजन विस्तार	योजन चौड़े
उन्नाहा	(इतने ही) ऊँचे
मेरोः चतुर्दिशं	सुमेरुके चारों ओर
अवष्टम्भ	उसे सम्हालने वाले
गिरयः	पर्वत
उपक्लृप्ताः	बने हैं ॥११॥

चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद् विटपविततयः शतयोजनपरिणाहाः ॥१२॥

चतुःषु एव तेषु चूत जम्बू कदम्बन्यग्रोधाः चत्वारः पादपप्रवराः पर्वतकेतव इव अधिसहस्र योजन उन्नाहाः तावत् विटप विततयः शतयोजन परिणाहाः ॥१२॥

तेषु चतुःषु एव	उन चारों ही (पर्वतों) पर
चूत जम्बू	आम, जामुन,
कदम्ब-	कदम्ब,
न्यग्रोधाः	बटके
चत्वारः	चार
पादपप्रवराः	वृक्षश्रेष्ठ
पर्वतकेतव इव	पर्वतोंके झण्डोंके समान हैं
अधिसहस्र योजन	(ये) ग्यारह सौ योजन
उन्नाहाः	ऊँचे हैं।
तावत् विटप विततयः	इनकी शाखाओंका फैलाव भी इतना ही है।
शतयोजन	(ये) सौ योजन
परिणाहाः	परिधि वाले (मोटे) हैं ॥१२॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥१३॥

ह्रदाः चत्वारः पयः मधु इक्षुरस मृष्टजलाः यत् उपस्पर्शिनः उपदेवगणाः योग ऐश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥१३॥

भरतर्षभ	भरतवंशमें श्रेष्ठ (परीक्षित)	उपस्पर्शिनः	सेवन करने वाले
चत्वारः	(इन पर्वतोंपर) चार	उपदेवगणाः	उपदेवगण (गन्धर्व किन्नरादि)
ह्रदाः	सरोवर हैं,	स्वाभाविकानि	नैसर्गिक
पयः मधु	दूध, मधु,	योग ऐश्वर्याणि	योगकी सिद्धियाँ
ईक्षुरस	गन्नेके रस (तथा)	धारयन्ति	धारण करते हैं ॥१३॥
मृष्टजलाः	मीठे पानीके		
यत्	जिनका		

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥१४॥

देव उद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतो-भद्रं इति ॥१४॥

देव उद्यानानि	देवताओंके बगीचे	चैत्ररथं	चैत्ररथ
च चत्वारि	भी चार (इन पर)	वैभ्राजकं	वैभ्राजक.
भवन्ति	हैं	सर्वतोभद्रं	सर्वतोभद्र
नन्दनं	नन्दन*	इति	इस नामके ॥१४॥

येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणै-रुपगीयमानमहिमानः किल विहरन्ति ॥१५॥

येषु अमरपरिवृढाः सह सुरललना ललाम यूथ पतयः उपदेवगणैः उपगीयमान महिमानः किल विहरन्ति ॥१५॥

येषु	जिनमें	महिमानः	(अपनी) महिमा
उपदेवगणैः	उपदेवता गण (गन्धर्वादि) द्वारा	उपगीयमानः	गाये जाते हुए

*स्पष्ट ही है कि यह वर्णन सूक्ष्म-जगतका है। क्योंकि नन्दन-कानन तो स्वर्गका प्रसिद्ध है।

अमरपरिवृढाः	प्रधान प्रधान देवता	किल	अहो,
सुरललना ललाम	सुन्दर देवियोंके साथ	विहरन्ति	विहार करते हैं ॥१५॥
सह			

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥१६॥

मन्दर उत्सङ्ग एकादशशत योजन उत्तुङ्ग देव चूतशिरसः गिरिशिखर स्थूलानि फलानि अमृत कल्पानि पतन्ति ॥१६॥

मन्दर उत्सङ्ग	मन्दराचलकी गोदमें	चूतशिरसः	आम्र-वृक्षके ऊपरसे
एकादशशत	ग्यारह सौ	गिरिशिखर	पर्वत शिखरके समान
योजन	योजन	स्थूलानि	बड़े
उत्तुङ्ग	ऊँचे	अमृत कल्पानि	अमृतके समान
देव	देवताओंके	फलानि पतन्ति	फल गिरते हैं ॥१६॥

तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥१७॥

तेषां विशीर्यमाणानां अतिमधुर सुरभि सुगन्धि बहुल अरुणरसोदेन अरुणोदा नाम नदी मन्दरगिरि शिखरात् निपतन्ती पूर्वेण इलावृतं उपप्लावयति ॥१७॥

तेषां	उन (आम फलों)के	नाम नदी	नामकी नदी
विशीर्य-माणानां	फटते रहनेसे	मन्दरगिरि	मन्दराचलके
अतिमधुर	बहुत मधुर	शिखरात्	शिखरसे
सुरभि सुगन्धि	उत्तम सुगन्धिसे	निपतन्ती	गिरती हुई
बहुल	भरे	पूर्वेण इलावृतं	इलावृतके पूर्वी भागको
अरुणरसोदेन	लालरस प्रवाहसे	उपप्लावयति	सींचती है ॥१७॥
अरुणोदा	अरुणोदा		

यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्श सुगन्धवातो दशयोजनं समन्तादनुवासयति ॥१८॥

यत् उपजोषणात् भवानी अनुचरीणां पुण्यजनवधूनां अवयवस्पर्श सुगन्धवातः दशयोजनं समन्तात् अनुवासयति ॥१८॥

यत्	जिसके	**सुगन्धवातः**	सुगन्धित हुआ वायु
उपजोषणात्	सेवनसे	**समन्तात्**	चारों ओर
भवानी	पार्वतीजीकी	**दशयोजनं**	दस योजन तक
अनुचरीणां	सेविका	**अनुवासयति**	सुगन्ध भरता है ॥१८॥
पुण्यजनवधूनां	यक्षपत्नियोंके		
अवयवस्पर्श	अंगोंके स्पर्शसे		

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बू नामनदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥१९॥

एवं जम्बू फलानां अत्युच्च निपात विशीर्णानां अनस्थिप्रायाणां इभकायनिभानां रसेन जम्बू नाम नदी मेरुमन्दर शिखरात् अयुत योजनात् अवनितले निपतन्ती दक्षिणेन आत्मानं यावत् इलावृतं उपस्यन्दयति ॥१९॥

एवं	इसी प्रकार	**जम्बू नाम नदी**	जम्बू नामकी नदी
मेरुमन्दर	मेरुमन्दरके	**अयुत**	दस हजार
शिखरात्	शिखर से	**योजनात्**	योजन (ऊँचाई) से
इभकायनिभानां	हाथीके शरीर जैसे	**अवनितले**	भूतलपर
अनस्थिप्रायाणां	प्रायः गुठली रहित	**निपतन्ती**	गिरती हुई
जम्बू फलानां	जामुनके फलोंके	**आत्मानं**	अपनेसे
अत्युच्च	बहुत ऊँचेसे	**दक्षिणेन**	दक्षिण भागके
निपात	गिरनेके कारण	**इलावृतं**	इलावृतको
विशीर्णानां	फटे हुओंके	**उपस्यन्दयति**	सींचती है ॥१९॥
रसेन	रससे		

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥२०॥

तावत् उभयोः अपि रोधसोः या मृत्तिका तद् रसेन अनुविध्यमाना वायु अर्क संयोग विपाकेन सदा अमरलोक आभरणं जाम्बूनदं नाम सुवर्णं भवति ॥२०॥

	(उस नदीके) दोनों	तावत्	समय पाकर
उभयोः	ही	विपाकेन	परिपक्व होकर
अपि	किनारे	सदा	नित्य
रोधसोः	जो	अमरलोक	देवताओंको
या	मिट्टी है (वह)	आभरणं	भुषित करने वाला
मृत्तिका	उसके रससे	जाम्बूनदं नाम	जाम्बूनद नामका
तद् रसेन	बराबर भीग कर	सुवर्णं	स्वर्ण
अनु विध्यमाना	वायु (और)	भवति	हो जाती है ॥२०॥
वायु	सूर्यकी धूप लगनेसे		
अर्क संयोग			

यद् ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥२१॥

यत् उ ह वाव विबुध आदयः सह युवतिभिः मुकुट कटक कटिसूत्र आदि आभरण रूपेण खलु धारयन्ति ॥२१॥

यत् ह वाव	जिसे निश्चित ही	कटिसूत्र आदि	कटिसूत्र आदि
विबुध आदयः	देवता आदि	आभरण	आभूषणोंके
युवतिभिः	युवतियों (देवियों) के	रूपेण	रूपमें
सह	साथ	खलु	निश्चय ही
मुकुट कटक	मुकुट, कड़े,	धारयन्ति	धारण करते हैं ॥२१॥

यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिः-सृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात्पत-न्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥२२॥

यः तु महाकदम्बः सुपार्श्व निरूढः याः तस्य कोटरेभ्यः विनिःसृताः पञ्च आयाम परिणाहाः पञ्च मधुधाराः सुपार्श्व शिखरात् पतन्त्यः अपरेण आत्मानं इलावृतं अनुमोदयन्ति ॥२२॥

सुपार्श्व	सुपार्श्व पर्वतपर	पञ्च	पांच
निरूढः	स्थित	मधुधाराः	रस धाराएँ हैं (वे)
यः तु	जो तो	सुपार्श्व	सुपार्श्वके
महाकदम्बः	महाकदम्ब है,	शिखरात्	शिखरसे
तस्य कोटरेभ्यः	उसके खोखलेसे	पतन्त्यः	गिरती हुई
विनिःसृताः	निकलती हुई	आत्मानं	अपनेसे
याः	जो	अपरेण	भिन्न दिशा (पश्चिम भाग)
पञ्च	पांच		
आयाम	पुरसा (हाथ ऊपर उठाये पुरुषकी ऊँचाई)	इलावृतं	इलावृतको
		अनुमोदयन्ति	बराबर सुवासित करती हैं ॥२२॥
परिणाहाः	जितनी मोटी		

या पयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयो-जनमनुवासयति ॥२३॥

या हि उपयुञ्जानानां मुख निर्वासितः वायुः समन्तात् शतयोजनं अनुवासयति ॥२३॥

या हि	जिसके कि	समन्तात्	चारों ओर
उपयुञ्जानानां	उपयोग करने वालोंके	शतयोजनं	सौ योजन (तक)
मुख निर्वासितः	मुखसे निकली	अनुवासयति	सुगन्धि फैलाती है ॥२३॥
वायुः	वायु		

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ॥२४॥

एवं कुमुद निरूढः यः शतवल्शः नाम वटः तस्य स्कन्धेभ्यः नीचीनाः पयः दधि मधु घृत गुड अन्न आदि अम्बर शय्या आसन आभरण आदयः सर्व एव कामदुघा नदाः कुमुद आग्रात् पतन्तः तं उत्तरेण इलावृतं उपयोजयन्ति ॥२४॥

एवं	इसी प्रकार
कुमुद	कुमुद पर्वतपर
निरूढः	स्थित
यः शतवल्शः	जो शतवल्श
नाम	नामका
वटः	वट वृक्ष है,
तस्य	उसके
स्कन्धेभ्यः	स्कन्ध (मुख्य शाखाओं) से
नीचीनाः	निकलने वाले
पयः दधि	दूध, दही,
मधु घृत	शहद, घी
गुड अन्न	गुड़, अन्न,
आदि	आदि
अम्बर, शय्या,	वस्त्र, शय्या,
आसन आभरण	आसन, आभूषण
आदयः	आदि
सर्व एव	सभी
कामदुघा	कामनाओंके देने वाले
नदाः	नद
कुमुद अग्रात्	कुमुदके शिखरसे
पतन्तः	गिरते हुए
इलावृतं	इलावृतके
उत्तरेण	उत्तरी भागको
उपयोजयन्ति	भिगाते हैं ॥२४॥

यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥२५॥

यान् उपजुषाणानां न कदाचित् अपि प्रजानां वली पलित क्लम स्वेद दौर्गन्ध्य जरा आमय मृत्यु शीत उष्ण वैवर्ण्य उपसर्ग आदयः ताप विशेषा भवन्ति यावत् जीवं सुखं निरतिशयं एव ॥२५॥

यान्	जिन (उन नदोंके दिये पदार्थों)का	**मृत्यु**	मृत्यु,
उपजुषाणानां	उपयोग करनेवाले	**शीत उष्ण**	सर्दी-गर्मी (लगना)
प्रजानां	प्रजाजनको	**वैवर्ण्यं**	कान्ति हीनता.
कदाचित् अपि	कभी भी	**आदयः उपसर्ग**	आदि कष्ट
वली पलित	झुर्रियां पड़ने, केश पकने,	**ताप विशेषा**	(मानसिक) सन्ताप विशेष
क्लम, स्वेद	थकावट, पसीना,	**न भवन्ति**	नहीं होते
दौर्गन्ध्य	(शरीरसे) दुर्गन्धि निम्लना,	**यावत् जीवं**	जब तक जीते है,
जरा आमय	बुढ़ापा, रोग,	**निरतिशयं सुखं एव**	परिपूर्ण सुख ही (रहता है) ॥२५॥

कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधिहंसर्षभ नागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः ॥२६॥

कुरङ्ग, कुरर, कुसुम्भ, वैकङ्क, त्रिकूट, शिशिर, पतङ्ग, रुचक, निषध, शिनीवास, कपिल, शङ्ख, वैदूर्य, जारुधि, हंस, ऋषभ, नाग, कालञ्जर, नारद*। आदयः विंशति गिरयः मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः ॥२६॥

आदयः	आदि (गिनाये गये)	**केशरभूता**	केशरके समान
विंशति गिरयः	बीस पर्वत	**परित**	चारों ओर
कर्णिकाया इव	(कमलकी) कर्णिका के समान	**उपक्लृप्ताः**	समीप स्थित हैं ॥२६॥
मेरोः मूलदेशे	सुमेरुके मूल प्रदेश		

*ये पर्वतों के नाम हैं। पर्वतोंके नामोंका अन्वय, अर्थ नहीं किया जा सकता।

जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः। एवमपरेण पवनपारियात्रौ दक्षिणेन कैलास-करवीरौ प्रागायतावेवमुत्तरस्त्रिशृङ्गमकरावष्टभिरेतैः परिस्तृतो-ऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥२७॥

जठर देवकूटौ मेरुं पूर्वेण अष्टादश योजन सहस्रं उदगायतः द्विसहस्रं पृथुतुङ्गौ भवतः एवं अपरेण पवन पारियात्रौ दक्षिणेन कैलास करवीरौ प्रागायताः एवं उत्तरः त्रिशृङ्ग मकर अवष्टभिः एतैः परिस्तृतः अग्नि इव परितः चकास्ति काञ्चनगिरिः ॥२७॥

मेरुं पूर्वेण	सुमेरुके पूर्वकी ओर (इनके अतिरिक्त)
जठर देवकूटौ	जठर तथा देवकूट पर्वत
अष्टादश सहस्रं	अठारह हजार
योजनं	योजन
	लम्बे कहे गये हैं।
उदगायतः	दो सहस्र (योजन)
द्विसहस्रं	मोटे (इतने ही)
पृथुतुङ्गौ	ऊँचे
भवतः	हैं।
एवं अपरेण	इसी प्रकार पश्चिमकी ओर
पवन	पवन (तथा)
पारियात्रौ	परियात्रा (पर्वत)
दक्षिणेन	दक्षिणकी ओर
कैलास	कैलास (एवं)
करवीरौ	करवीर
प्रागायताः	बतलाये गये हैं।
एवं उत्तरः	इसी प्रकार उत्तरमें
त्रिशृङ्ग मकर	त्रिशृङ्ग तथा मकरके
अवष्टभिः	स्थित होनेसे
एतैः परिस्तृतः	इनसे चारों ओरसे घिरा
काञ्चनगिरिः	स्वर्ण-पर्वत (सुमेरु)
अग्निः इव	अग्निके समान
परितः	चारों ओरसे
चकास्ति	चमकता रहता है ॥२७॥

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुत-योजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥२८॥

मेरोः मूर्धनि भगवत आत्मयोनेः मध्यत उपक्लृप्तां पुरीं अयुतयोजन साहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥२८॥

मेरोः मूर्धनि	सुमेरुके शिखर पर	अयुतयोजन-साहस्रीं	करोड़ योजना-(विस्तार)की
मध्यत	बीचमें	पुरीं वदन्ति	पुरी बतलायी जाती है ॥२८॥
उपक्लृप्तां	बनी		
भगवत	भगवान्		
आत्मयोनेः	ब्रह्माकी		
शातकौम्भीं	स्वर्णमयी		
समचतुरस्रां	समचतुर्भुज (चौरस)		

तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥२९॥

तां अनु परितः लोकपालानां अष्टानां यथादिशं यथारूपं तुरीय मानेन पुरः अष्टाः उपक्लृप्ताः ॥२९॥

तां अनु	उस (ब्रह्मपुरी)से नीचे	यथादिशं	उन-उनकी दिशाओंमें
परितः	सब ओर	यथारूपं	उन-उनके अनुरूप
अष्टानां	आठो	तुरीय मानेन	(ब्रह्माजीकी पुरीसे) चौथाई परिमाणको
लोकपालानां	लोकपालोंकी		
अष्टाः पुरः	आठ पुरियां	उपक्लृप्ताः	बनी हैं ॥२९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भुवनकोशवर्णनं नाम षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच—

तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥१॥

तत्र भगवतः साक्षात् यज्ञलिङ्गस्य विष्णोः विक्रमतः वामपाद अंगुष्ठ नख निर्भिन्न ऊर्ध्व अण्डकटाह विवरेण अन्तः प्रविष्टा या बाह्य जलधारा तत् चरण पंकजअवनेजन अरुण किञ्जल्क उपरञ्जित अखिल जगत् अघमल अपहा उपस्पर्शन अमला साक्षात् भगवत्पदी इति अनुपलक्षित वचः अभिधीयमान अतिमहता कालेन युगसहस्र उपलक्षणेन दिवः मूर्धनि अवततार यत् तत् विष्णुपदं आहुः ॥१॥

तत्र भगवतः	परम पूज्य भगवान्
साक्षात्	साक्षात्
यज्ञलिङ्गस्य	यज्ञस्वरूप
विष्णोः	विष्णु (विराट् रूप धारी वामन) के
विक्रमतः	(त्रिलोक) नापते समय
वामपाद	बायें पैरके
अंगुष्ठ नख	अँगूठेके नखसे
निर्भिन्न	फूटे हुए
अण्डकटाह	ब्रह्माण्डावरणके
ऊर्ध्व	ऊपरी भागके
विवरेण	छिद्रसे
या बाह्य	जो बाहरी
जलधारा	जलधारा
अन्तः	(ब्रह्माण्डके) भीतर
प्रविष्टा	आ गयी
तत् चरण पंकज	वह (भगवान्) के चरण-कमल
अवनेजन	धुलनेसे

अरुण	(उनमें लगी) लाल	**वचः**	वाणीसे
किञ्जल्क	केशरसे	**अभिधीयमान**	कही जाने वाली
उपरञ्जित	रंग गयी।	**युगसहस्र**	सहस्रों युगोंसे
उपस्पर्शन	(वह) स्पर्श मात्रसे	**उपलक्षणेन**	लक्षित
अखिल जगत्	सम्पूर्ण संसारके	**अतिमहता**	बहुत अधिक
अघमल	पाप रूपी मलको	**कालेन**	समय बीतनेपर
अपहा	दूर करने वाली	**यत् तत्**	जिसे कि
अमला	(स्वयं) निर्मल है।	**विष्णुपदं**	विष्णुपद
साक्षात्	साक्षात्	**आहुः**	कहा जाता है
भगवत्पदी	भगवत्पदी	**दिवः मूर्धनि**	उस स्वर्गके शिरो भागमें
इति	इस प्रकार		
अनुपलक्षित	सांकेतिक	**अवततार**	उतरी ॥१॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥२॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतः अस्मत् कुलदेवता चरणारविन्द उदकं इति यां अनुसवनं उत्कृष्यमाण भगवत्भक्तियोगेन दृढं क्लिद्यमान अन्तः हृदय औत्कण्ठ्य विवश अमीलित लोचनयुगल कुड्मल विगलित अमल बाष्पकलया अभिव्यज्यमान रोमपुलककुलकः अधुना अपि परम आदरेण शिरसा बिभर्ति ॥२॥

वीरव्रत	वीरव्रत परीक्षित !	**अस्मत्**	हमारे
यत्र ह वाव	जहाँ निश्चित ही	**कुलदेवता**	कुल-देवताके
परम-भागवतः	परम भगवद्-भक्त	**चरणारविन्द**	चरण-कमलोंका
औत्तानपादिः	उत्तानपादके पुत्र ध्रुव	**उदकं इति**	जल है, इस भावसे

भगवत्भक्ति	भगवद्-भक्ति	**विगलित**	झरती
योगेन	योगसे	**अमल**	निर्मल
हठं	बड़े जोरसे	**बाष्पकलया**	अश्रुधारा तथा
उत्कृष्यमाण	आकर्षित होते	**रोमपुलक कुलकः**	रोमावलीमें पुलक
क्लिद्यमान	द्रवित हुए	**अभिव्यज्यमान**	प्रकट करते हुए
अन्तः हृदय	अन्तःकरणके कारण	**यां अनुसवनं**	जिसे नित्यप्रति
औत्कण्ठ्य	उत्कण्ठासे	**अधुना अपि**	आज भी
विवश	विवश	**परम आदरेण**	बड़े आदरसे
अमीलित	खुले हुए	**शिरसा**	सिरपर
लोचनयुगल	दोनों नेत्रोंसे	**बिभर्ति**	धारण करते हैं ॥२॥
कुड्मल	कमल कलिका जैसे		

ततः सप्त ऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥३॥

ततः सप्त ऋषयः तत् प्रभाव अभिज्ञाः यां ननु तपसः आत्यन्तिकी सिद्धिः एतावती भगवति सर्वात्मनि वासुदेवे अनुपरत भक्तियोगलाभेन एव उपेक्षितानि अर्थं आत्मगतयः मुक्तिं इव आगतां मुमुक्षव इव सबहुमानं अद्यापि जटाजूटैः उद्वहन्ति ॥३॥

ततः	इसके पश्चात्	**सिद्धिः**	सिद्धि है,
सप्त ऋषयः	सप्तर्षिगण	**एतावती**	ऐसा मानकर
तत् प्रभाव	उनका प्रभाव	**मुमुक्षव इव**	मुमुक्षु जनके समान
अभिज्ञाः	जाननेके कारण	**आगतां**	प्राप्त हुई
यां ननु	यही निश्चय ही	**मुक्तिं इव**	मुक्तिकी भांति
तपसः	तपस्याकी	**आत्मगतयः**	आत्मज्ञानकी
आत्यन्तिकी	आत्यन्तिक	**उपेक्षितानि अर्थं**	उपेक्षा करनेके लिए

सर्वात्मनि	सर्वात्मा	अद्यापि	आज भी
भगवति	भगवान्	सबहुमानं	अत्यन्त आदर सहित
वासुदेवे	वासुदेवकी		
अनुपरत	निश्चल	जटाजूटैः	जटाजूटपर
भक्तियोगलाभेन	भक्ति-प्राप्तिके लिए	उद्वहन्ति	धारण करते हैं ॥३॥
एव	ही		

ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरन्तीन्दु मण्डलमावार्य ब्रह्मसदने निपतति ॥४॥

ततः अनेक सहस्र कोटि विमान अनीक संकुल देवयानेन अवतरन्ती इन्दुमण्डलं आवार्य ब्रह्मसदने निपतति ॥४॥

ततः	वहाँसे	अवतरन्ति	उतरती हुई
अनेक सहस्र	अनेक सहस्र	इन्दुमण्डलं	चन्द्र-मण्डलको
कोटि	करोड़	आवार्य	प्लावित करती (सुमेरु-शिखरसे)
विमान अनीक	विमान समूहोंसे	ब्रह्मसदने	ब्रह्मपुरीमें
संकुल	भरे हुए		
देवयानेन	देवयान-मार्गसे	निपतति	गिरती है ॥४॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति सीतालकनन्दा चक्षुर्भद्रेति ॥५॥

तत्र चतुर्धा भिद्यमाना चतुःभिः नामभिः चतुः दिशं अभिस्पन्दन्ती नदनदीपतिं एव अभिनिविशति सीता अलकनन्दा चक्षुः भद्रा इति ॥५॥

तत्र	वहाँसे	सीता	सीता,
चतुर्धा	चार धाराओंमें	अलकनन्दा	अलकनन्दा■
भिद्यमाना	बँटकर		

■ भागवतमें ही श्रीबद्रीनाथमें अलकनन्दाका वर्णन है (११-२९-४२) पर यह अलकनन्दा उस समय समुद्र तक जाती थी। भागीरथीके आनेपर उनसे देवप्रयागमें मिली होंगी।

चक्षुः भद्रा	चक्षु, भद्रा	नदनदीपतिं	नद-नदियोंके स्वामी
इति चतुर्भिः	इस प्रकार चार	एव	(समुद्र)में ही
नामभिः	नामोंसे	अभिनिविशति	प्रवेश करती हैं ॥५॥
चतुर्दिशं	चारों दिशाओंमें		
अभिस्यन्दन्ती	बहती हुई		

सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्धसु पतित्वान्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥६॥

सीता तु ब्रह्मसदनात् केसर अचला आदि गिरिशिखरेभ्यः अधः अधः प्रस्रवन्ती गन्धमादन मूर्धसु पतित्वा अन्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षार समुद्रं अभिप्रविशति ॥६॥

सीता तु	सीता तो	गन्धमादन	गन्धमादनके
ब्रह्मसदनात्	ब्रह्मपुरीसे	मूर्धसु	शिखरपर
केसर अचला	केसर भूत पर्वतों	पतित्वा	गिरकर
आदि	आदिके	भद्राश्ववर्षं	भद्राश्व वर्षके
गिरिशिखरात्	एक-से दूसरे पर्वत	अन्तरेण	अन्दर होती
	शिखरपर गिरती	प्राच्यां दिशि	पूर्व दिशामें
अधः अधः	नीचे ही नीचेकी	क्षार समुद्रं	खारे समुद्रमें
प्रस्रवन्ती	ओर बहती	अभिप्रविशति	मिल जाती हैं ॥६॥

एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥७॥

एवं माल्यवत् शिखरात् निष्पतन्ती ततः अनुपरतवेगा केतुमालं अभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥७॥

एवं चक्षुः	इसी प्रकार चक्षु	निष्पतन्ती	गिरकर
माल्यवत्	माल्यवानके	ततः	वहाँसे
शिखरात्	शिखरपर	अनुपरतवेगाः	वेग कम हुए बिना

केतुमालं अभि	केतुमाल वर्षमें होकर उसी ओर	सरित्पति	समुद्रमें
प्रतीच्यां दिशि	पश्चिम दिशामें	प्रविशति	प्रवेश करती है ।।७।।

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ।।८।।

भद्रा च उत्तरतः मेरु शिरसः निपतिता गिरिशिखरात् गिरिशिखरं अतिहाय शृङ्गवतः शृङ्गात् अवस्यन्दमाना उत्तरान तु कुरून् अभित उदीच्यां दिशि जलधिं अभिप्रविशति ।।८।।

भद्रा च	भद्रा भी	शृङ्गवतः	शृंगमानके
मेरु उत्तरतः	सुमेरुके उत्तरी	शृङ्गात्	शिखरसे
शिरसः	शिखरसे	अवस्यन्दमाना	गिरती हुई
निपतिता	गिरकर	उत्तरान् तु	उत्तरे कुरु वर्षमें
गिरिशिखरात्	(एक) पर्वत शिखरसे	कुरून्	(होकर)
		अभित	उस ओरके
गिरिशिखरं	(दूसरे) पर्वत शिखरको	उदीच्यां दिशि	उत्तर दिशाके
		जलधिं	समुद्रमें
अतिहाय	पार करती हुई (अन्तमें)	अभिप्रविशति	मिल जाती है ।।८।।

तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयन्ती भारतमभि वर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ।।९।।

तथा एव अलकनन्दा दक्षिणेन ब्रह्मसदनात् बहूनि गिरिकूटानि अतिक्रम्य हेमकूटात् हेमकूटानि अति रभसतर रंहसा लुठयन्ती भारतं अभि वर्षं दक्षि-

यस्यां दिशि जलधिं अभिप्रविशति यस्यां स्नानार्थं च आगच्छतः पुंसः पदे-पदे अश्वमेध राजसूय आदीनां फलं न दुर्लभं इति ॥९॥

तथा एव	इसी प्रकार
अलकनन्दा	अलकनन्दा
ब्रह्मसदनात्	ब्रह्मपुरीकी
दक्षिणेन	दक्षिण ओरसे
बहूनि	बहुतसे
गिरिकूटानि	पर्वत-शिखरोंको
अतिक्रम्य	पार करके
हेमकूटात्	हेमकूट पर्वतसे
हैमकूटानि	हिमालयके शिखरोंको■
अति रभसतर	अत्यन्त तीव्र
रंहसा	वेगसे
लुठयन्ती	लुढ़काती (तोड़ती-फोड़ती)
भारतं अभि	भारतवर्षकी ओर
दक्षिणस्यां	दक्षिण
दिशि	दिशामें
जलधिं	समुद्रमें
अभिप्रविशति	मिल जाती हैं*
यस्यां	जिनमें
स्नानार्थं	स्नानके लिए
आगच्छतः	आने वाले
पुंसः च	पुरुषके लिए भी (स्नान करनेसे पूर्व ही)
पदे पदे	पद-पदपर
अश्वमेध	अश्वमेघ,
राजसूय	राजसूय
आदीनां	आदि (यज्ञों) का
फलं	फल
दुर्लभं न	दुर्लभ नहीं रहता
इति	ऐसी (महिमा गंगाकी है) ॥९॥

अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरि-दुहितरः शतशः ॥१०॥

■ केवल यहाँ हिमालयसे भौतिक वर्णन चला है। अतः ब्रह्मपुरीसे चलने वाली शेष तीनों धाराएँ सीता, चक्षु और भद्राका अन्वेषण वर्तमान स्थूल पृथ्वीपर करना सम्भव नहीं।

* जहाँ आज गंगासागर है, वहाँ भागीरथी गंगाकी धारा राजा भगीरथ लाये। अलकनन्दा तब कहाँ समुद्रमें मिलती थीं—पता नहीं है। अब तो भागीरथीमें मिल जाती हैं।

अन्ये च नदा नद्यः च वर्षे वर्षे सन्ति बहुशः मेरु आदि गिरि दुहितरः शतशः ।।१०।।

अन्ये च	दूसरे भी	दुहितरः	पुत्रियाँ
नद नद्यः च	नद-नदियाँ भी	शतशः	सैकड़ों हैं (वे)
मेरु आदि	मेरु आदि	वर्षे वर्षे	प्रत्येक वर्षमें
	(पर्वतों) की	बहुशः सन्ति	बहुत-सी हैं ।।१०।।

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ।।११।।

तत्र अपि भारतं एव वर्षं कर्मक्षेत्रं अन्यानि अष्ट वर्षाणि स्वर्गिणां पुण्यशेष उपभोग स्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ।।११।।

तत्र अपि	उन देशों) में भी	पुण्यशेष	बचे हुए पुण्योंके
भारतं वर्षं एव	भारतवर्ष ही■	उपभोग	भोगनेके
कर्मक्षेत्रं	कर्मक्षेत्र है (जहाँके कर्मका फल होता है ।)	स्थानानि	स्थान हैं ।
		भौमानि	(इन्हें) 'भूलोकके
		स्वर्गपदानि	स्वर्ग' शब्दसे भी
अन्यानि	दूसरे	व्यपदिशन्ति	कहा जाता है ।।११।।
अष्टवर्षाणि	आठ वर्ष (देश)		
स्वर्गिणां	स्वर्ग गये लोगोंके		

एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ।।१२।।

■ वर्तमान ज्ञात सम्पूर्ण पृथ्वी भारतवर्ष ही है। पृथ्वीके बहुतसे देशोंमें भारतीय मूलके लोग रहते हैं। इस पृथ्वीपर कहीं भी रहने वाले पुरुषको कर्मयोनिका प्राणी ही माना जाता है। अतः यह पूरी पृथ्वी कर्म-क्षेत्र भारतवर्ष है, हमारा यह भारतवर्ष तो भरतखण्ड है।

एषु पुरुषाणां अयुत पुरुष आयुः वर्षाणां देवकल्पानां नाग अयुत प्राणानां वज्र संहनन बल वयः आमोद प्रमुदित महासौरत मिथुन व्यवाय अपवर्ग वर्ष धृत एक गर्भ कलत्राणां तत्र तु त्रेतायुगसमः कालः वर्तते ॥१२॥

एषु	इन (भारतेतर आठ देशों) में	प्रमुदित	आनन्दित
देवकल्पानां	देवताओंके समान (देवोपम)	मिथुन	स्त्री-पुरुषके जोड़े
पुरुषाणां	पुरुषोंकी	महासौरत	बहुत समय तक
पुरुष वर्षाणां	मनुष्यके वर्षसे	व्यवाय	मैथुनादि करते रहते हैं
अयुत	दस सहस्र वर्षकी	अपवर्ग	मोक्ष (मरण) के
आयुः	आयु होती है	वर्ष	(अन्तिम)वर्षमें
अयुत	दस हजार	कलत्राणां	उनकी पत्नियाँ
नाग	हाथियों जैसा	धृत	धारण करती हैं
प्राणानां	बल होता है।	एक गर्भ	एक ही गर्भ
वज्र संहनन	वज्रके समान सुदृढ़	तत्र तु	वहाँ तो
बल वयः	बल, यौवन और	त्रेतायुगसमः	त्रेतायुगके समान
आमोद	उल्लास होनेसे	कालः वर्तते	काल रहता है* ॥१२॥

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकसलयश्रियाऽऽनम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनवबनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥१३॥

---

* पृथ्वीके भारतेतर आठ देशोंका यह वर्णन वर्तमान पृथ्वीके किसी देशका तो होना सम्भव नहीं है। अतः वर्तमान पृथ्वी भारतवर्ष है और ये शेष आठ वर्ष दिव्य सूक्ष्म जगतके हैं।

यत्र ह देवपतयः स्वैः स्वै गणनायकैः विहित महा अर्हणाः सर्व ऋतु कुसुम स्तबक फल किसलय श्रिया आनम्यमान विटपलता विटपिभिः उप-शुम्भमान रुचिर कानन आश्रम आयतन वर्षगिरि द्रोणीषु तथा च अमल जलाशयेषु विकच विविध नव वनरुह आमोद मुदित राजहंस जलकुक्कुट कारण्डव सारस चक्रवाक आदिभिः मधुकर निकर आकृतिभिः उपकूजितेषु जलक्रीडाभिः विचित्र विनोदैः सुललित सुरसुन्दरीणां कामकलिल विलास हास लीला अवलोक आकृष्ट मनः दृष्टयः स्वैरं विहरन्ति ॥१३॥

यत्र ह	जहाँ कि
देवपतयः	देवनायक
स्वैः स्वैः	अपने-अपने
गणनायकैः	गणनायकों द्वारा
विहित	महती
महा अर्हणाः	पूजा पाते हुए,
सर्व ऋतु	सभी ऋतुओंमें
कुसुम स्तबक	पुष्प-गुच्छ,
फल किसलय	फल, नवपल्लवकी
श्रिया	शोभासे युक्त
विटपलता	वृक्षों और लताओंकी और
विटपिभिः	डालियोंके
आनम्यमान	झुके हुए
उपशुम्भमान	सुशोभित
रुचिर कानन	सुन्दर वन,
आश्रम	आश्रम,
आयतन	भवन तथा
वर्षगिरि	देशके पर्वतोंकी
द्रोणीषु	घाटियोंमें
तथा	और
विकच विविधि	खिले हुए अनेक
नव वनरुह	नये कमलोंकी
आमोद मुदित	सुगन्धिसे प्रसन्न
राजहंस	राजहंस,

जलकुक्कुट	जलमुर्गे,
कारण्डव	कारण्डव (लेदी)
सारस	सारस
चक्रवाक	चकवा
आदिभिः	आदिके
उपकूजितेषु	समीप कूजन (बोलने)से
मधुकर निकर	भौरेंके समूहके
आकृतिभिः	गुंजारसे युक्त
अमल	निर्मल
जलाशयेषु	जलाशयोंमें
जलक्रीडाभिः	जलक्रीड़ा द्वारा
विचित्र	अनेक प्रकारके
विनोदैः	विनोदसे,
सुललित	परम सुन्दर
सुरसुन्दरीणां	देवाङ्गनाओंके
कामकलिल	कामावेश सूचक
विलास हास	हाव-भाव, हँसी
लीला अवलोक	लीला कटाक्षसे
मनः दृष्टयः	मन और नेत्र
आकृष्ट	(उनकी ओर) आकर्षित किये
स्वैरं विहरन्ति	स्वच्छन्द विहार करते हैं ॥१३॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनु-ग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि संनिधीयते ।।१४।।

नवसु अपि वर्षेषु भगवान् नारायणः महापुरुषः पुरुषाणां तत् अनु-ग्रहाय आत्मतत्त्व व्यूहेन आत्मन अद्य अपि संनिधीयते ।।१४।।

नवसु	(इन) नौके नौ	आत्मनः	अपनी
वर्षेषु अपि	देशोंमें ही	अनुग्रहाय	कृपा करनेके लिए
महापुरुषः	परमपुरुष	आत्मतत्त्व	अपनी विभिन्न
भगवान्	भगवान्	व्यूहेन	मूर्तियोंके रूपमें
नारायणः	नारायण	अद्य अपि	आजभी (इनके)
तत् पुरुषाणां	वहांके पुरुषोंपर	संनिधीयते	समीप रहते हैं।।१४।।

इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चा-द्वक्ष्यामि ।।१५।।

इलावृते तु भगवान् भव एक एव पुमान् न हि अन्यः तत्र अपरः निर्वि-शति भवान्याः शाप निमित्तज्ञः यत् प्रवेक्ष्यतः स्त्री भावः तत् पश्चात् वक्ष्यामि ।।१५।।

इलावृते तु	इलावृतमें तो	न हि निर्विशति	नहीं प्रवेश करता
भगवान् भव	भगवान् शिव	यत् प्रवेक्ष्यतः	जहां प्रवेश करनेसे
एक एव पुमान्	अकेले ही पुरुष हैं,	स्त्री भावः	स्त्रीत्व (प्राप्त) हो जाता है
भवान्याः	भवानीके		
शाप निमित्तज्ञः	शापका कारण जाननेवाला	तत्	उस (के कारण)को
		पश्चात्	पीछे
तत्र अपरः	वहां दूसरा कोई अन्य	वक्ष्यामि	बतलाऊँगा ।।१५।।

भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्ते-र्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञा-मात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति ।।१६।।

भवानीनाथैः स्त्रीगण अर्बुद सहस्त्रैः अवरुध्यमानः भगवतः चतुःमूर्तेः महापुरुषस्य तुरीयां तामसीं मूर्ति प्रकृति आत्मनः सङ्कर्षण संज्ञां आत्म-समाधिरूपेण संनिधाप्य एतत् अभिगृणन् भव उपधावति ॥१६॥

स्त्रीगण अर्बुद सहस्त्रैः	अरबों-खरबों स्त्री-गण (पार्वतीकी दासियों)से	**सङ्कर्षण संज्ञां**	संकर्षण नामवाली का
अवरुध्यमानः	सेवित	**आत्मसमाधि-रुपेण**	अपनी एकाग्रताके द्वारा
भवानीनाथैः	उमापति द्वारा	**संनिधाप्य**	(मनोमय विग्रहके रूपमें) सामीप्य प्राप्त करके
चतुः मूर्तेः	चतुर्व्यूहात्मक■ स्वरूपवाले		
भगवतः	भगवान्	**एतत्**	यह
महापुरुषस्य	परमपुरुषको	**अभिगृणन्**	कहते हुए
तुरीयां	चौथी	**भव उपधावति**	शंकरजी स्तुति करते हैं ॥१६॥
आत्मनः प्रकृति	अपनी कारण रूपा		
तामसीं मूर्ति	तमः प्रधान मूर्ति		

*श्रीमहादेव उवाच-**

ॐ नमो भगवते महापुरुषाय सर्वगुणसङ्ख्यानायानन्तायाव्यक्ताय नम इति ॥१७॥

ॐ नमः भगवते महापुरुषाय सर्वगुण सङ्ख्यानाय अनन्ताय अव्यक्ताय नमः इति ॥१७॥

ॐ नमः भगवते	प्राणस्वरूप भगवान् को नमः	**अव्यक्ताय नमः**	अव्यक्तको नमस्कार।
सर्वगुण	सब गुणोंको	**इति**	इस प्रकार(यह भगवान् संकर्षणका मन्त्र है।) मन्त्रका अनुवाद न करके मूल ही पढ़ा जाना चाहिए॥१७॥
सङ्ख्यानाय	संख्या देने (प्रकट करने)वाले		
अनन्ताय	अनन्त स्वरूप		

■ वासुदेव, प्रद्युम्न, अनिरुद्ध और सङ्कर्षण यह चतुर्व्यूह है।

* अन्य प्रतियोंमें यहाँ 'श्रीभगवानुवाच' है।

भजे भजन्यारणपादपङ्कजं
भगस्य कृत्स्नस्य परं परायणम् ।
भक्तेष्वलं भावितभूतभावनं
भवापहं त्वा भवभावमीश्वरम् ॥१८॥

भजे भजन्या अरणपाद पङ्कजं भगस्य कृत्स्नस्य परं परायणं भक्तेषु अलं भावित भूतभावनं भव अपहं त्वां भवभावं ईश्वरम् ॥१८॥

कृत्स्नस्य	सम्पूर्ण	भवभावं	संसारकी भावना (उत्पत्ति) करनेवाले
भगस्य	ऐश्वर्यके	ईश्वरं	सर्वसमर्थ
परं परायणं	परमनिवास	त्वां भजन्या	आज भजनीयके
भक्तेषु	भक्तोंके लिए	अरणपाद-	लाल-चरण-
अलं भूतभावनं	परमप्राणि परि-पालक रूप	पङ्कजं	कमलका
भावित	प्रकटकर देने वाले	भजे	(हम) भजन करते हैं ॥१८॥
भव अपहं	(जन्म-मरण रूप) संसारको मिटानेवाले		

न यस्य मायागुणचित्तवृत्तिभि-
र्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ।
ईशे यथा नोऽजितमन्युरंहसां
कस्तं न मन्येत जिगीषुरात्मनः ॥१९॥

न यस्य मायागुण चित्तवृत्तिभिः निरीक्षतः हि अणु अपि दृष्टिः इज्यते ईशे यथा नः अजित मन्यु रंहसां कः तं न मन्येत जिगीषुः आत्मनः ॥१९॥

मायागुण	मायाके गुणोंवाली	अणु अपि	तनिक भी,
चित्तवृत्तिभिः	चित्तकी वृत्तियोंसे	दृष्टिः	दृष्टि
निरीक्षतः	देखते रहनेपर भी	न इज्यते	संसक्त नहीं होती,
हि	क्योंकि	मन्यु रंहसां	क्रोधके वेगको
यस्य ईशे	जिस आप समर्थकी	अजित	न जीत सकनेवाले

यथा नः	जैसे हमारी (हो जाती है)	जिगीषुः	जीतनेकी इच्छावाला
तं	उन (आपका)	कः न मन्येत	कौन सम्मान नहीं करेगा ॥१९॥
आत्मनः	चित्तको		

असद्दृशो यः प्रतिभाति मायया
क्षीबेव मध्वासवताम्रलोचनः ।
न नागवध्वोऽर्हण ईशिरे ह्रिया
यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥२०॥

असत् दृशः यः प्रतिभाति मायया क्षीब इव मधु आसव ताम्रलोचनः न नागवध्वः अर्हण ईशिरे ह्रिया यत् पादयोः स्पर्शन धर्षित इन्द्रियाः॥२०॥

मायया	मायाके द्वारा (वे)	स्पर्शन	स्पर्शसे
असत् दृशः	मिथ्या दृष्टि हैं	धर्षित इन्द्रियाः	चञ्चल इन्द्रिय हुई
यः	जो (जिनको आप)	नागवध्वः	नाग-पत्नियां
मधु आसव	मधु-आसव(पीनेसे)	ह्रिया	लज्जाके कारण
ताम्रलोचनः	लाल नेत्रवाले	अर्हण	पूजा करनेमें
प्रतिभाति	प्रतीत होते हैं ।	ईशिरे न	समर्थ नहीं हुई ॥२०॥
यत् पादयोः	जिनके चरणोंके		

यमाहुरस्य स्थितिजन्मसंयमं
त्रिभिर्विहीनं यमनन्तमृषयः ।
न वेद सिद्धार्थमिव क्वचित्स्थितं
भूमण्डलं मूर्धसहस्रधामसु ॥२१॥

यं आहुः अस्य स्थिति जन्म संयमं त्रिभिः विहीनं यं अनन्तं ऋषयः न वेद सिद्धार्थं इव क्वचित् स्थितं भूमण्डलं मूर्ध सहस्र धामसु ॥२१॥

ऋषयः	ऋषिगण	अस्य	इस (संसार) की
यं अनन्तं	जिन्हें अनन्त (कहते हैं)	स्थिति जन्म	स्थिति, उत्पत्ति
		संयमं	प्रलय (का हेतु)

	(श्रुति) जिसे	सिद्धार्थं	सरसोंके दानेके
यं	बतलाती है	इव	समान
आहुः	(वह आप इन) तीनों	क्वचित् स्थितं	कहीं स्थित
त्रिभिः	(उत्पत्ति, स्थिति,	भूमण्डलं	भू-मण्डलको (आप)
	लय) से	न वेद	नहीं जान पाते
	रहित हैं।		(कि वह कहाँ
विहीनं	(आपके) सहस्र		है) ॥२१॥
सहस्र	मस्तकोंपर		
धामसु			

यस्याद्य आसीद् गुणविग्रहो महान्
विज्ञानधिष्ण्यो भगवानजः किल।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा
वैकारिकं तामसमैन्द्रियं सृजे ॥२२॥

यस्य अद्य आसीत् गुणविग्रहः महान् विज्ञानधिष्ण्यः भगवान् अजः किल यत् सम्भवः अहं त्रिवृता स्वतेजसा वैकारिकं तामसं ऐन्द्रियं सृजे ॥२२॥

यत् सम्भवः	जिनसे उत्पन्न हुआ	सृजे	सृष्टि करता हूँ
अहं	मैं	किल	निश्चय (वे)
त्रिवृता	(अहंकार रूप)	विज्ञानधिष्ण्यः	विज्ञानके आश्रय
	त्रिविध हो जाने	भगवान् अजः	भगवान् ब्रह्मा (जो)
	वाले	अद्य	इस समय
स्वतेजसा	अपने तेजसे	आसीत्	हैं
वैकारिकं	वैकारिक (देवता)	यस्य	जिस (आपके)
तामसं	तामस (पंच महा-	महान्	महत्तत्त्वरूप
	भूत)	गुणविग्रहः	प्रथम गुणसे
ऐन्द्रियं	इन्द्रियोंकी		उत्पन्न हैं ॥२२॥

एते वयं यस्य वशे महात्मनः
स्थिताः शकुन्ता इवसूत्र यन्त्रिताः ।
महानहं वैकृततामसेन्द्रियाः
सृजाम सर्वे यदनुग्रहादिदम् ॥२३॥

एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः महान् अहं वैकृत तामस एन्द्रियाः सृजाम सर्वे यत् अनुग्रहात् इदम् ॥२३॥

सूत्रयन्त्रिताः	सूत्रमें बँधे (नियन्त्रित)	वैकृत	इन्द्रियाभिमानी देवता,
शकुन्ता इव	पक्षियोंकी भाँति	तामस	पञ्चमहाभूत,
एते वयं	ये हम सब	एन्द्रियाः	इन्द्रियां
यस्य महात्मनः	जिन महापुरुषके	सर्वे	सब (मिलकर)
वशे स्थिताः	वशमें हैं और	इदं	इस (जगत) की
यत् अनुग्रहात्	जिनके अनुग्रहसे	सृजाम	रचना करते हैं ॥२३॥
महान् अहं	महत्तत्व, अहंकार,		

यन्निर्मितां कर्ह्यपि कर्मपर्वणीं
मायां जनोऽयं गुणसर्गमोहितः ।
न वेद निस्तारणयोगमञ्जसा
तस्मै नमस्ते विलयोदयात्मने ॥२४॥

यत् निर्मितां कर्हि अपि कर्म पर्वणीं मायां जनः अयं गुणसर्ग मोहितः न वेद निस्तारण योगं अञ्जसा तस्मै नमः ते विलय उदय आत्मने ॥२४॥

गुणसर्ग	सृष्टिके गुणोंसे	यत् निर्मितां	जिनकी निर्मित
मोहितः	मोहित	मायां	मायासे
अयं जनः	यह मनुष्य	कर्हि अपि	कभी भी
कर्म पर्वणीं	कर्म-ग्रन्थि वाली	अञ्जसा	सरलतासे

निस्तारण योगं	पार होनेका उपाय	आत्मने	स्वरूप
	नहीं जानता	ते नमः	आपको नमस्कार
न वेद	उन		॥२४॥
तस्मै	प्रलय सृष्टि-		
विलय उदय-			

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे
सप्तदशोऽध्यायः ॥ १७ ॥

अथ अष्टादशोऽध्यायः

श्रीशुक उवाच-

तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना संनिधाप्येदमभिगृणन्त उपधावन्ति ॥१॥

तथा च भद्रश्रवा नाम धर्मसुतः तत् कुलपतयः पुरुषाः भद्राश्ववर्षे साक्षात् भगवतः वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्ष अभिधानां परमेण समाधिना संनिधाप्य इदं अभिगृणन्त उपधावन्ति ॥१॥

तथा च	इसी प्रकार	**हयशीर्ष**	हयशीर्ष
भद्राश्ववर्षे	भद्राश्व वर्षमें	**अभिधानां**	नामके
भद्रश्रवा नाम	भद्रश्रवा नामके	**प्रियां तनुं**	प्रिय विग्रहका
धर्मसुतः	धर्मके पुत्र (तथा)	**परमेण**	अत्यन्त
तत् कुलपतयः	उनके कुलके	**समाधिना**	एकाग्रतासे
पुरुषाः	प्रमुख पुरुष	**संनिधाप्य**	(हृदयमें) सामीप्य पाकर
साक्षात्	साक्षात		
भगवतः	भगवान्	**इदं अभिगृणन्त**	यह (मन्त्र) बोलते हुए
वासुदेवस्य	वासुदेवके		
धर्ममयीं	धर्ममय	**उपधावन्ति**	स्तुति करते हैं ॥१॥

भद्रश्रवस ऊचुः-

ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ॥२॥

ॐ नमः भगवते धर्माय आत्म बिशोधनाय नमः इति ॥२॥

आत्म	चित्तको	**ॐ**	ओंकार स्वरूप
विशोधनाय	शुद्ध करने वाले		

...ते धर्माय ...: नमः	भगवान् धर्मको बार-बार नमस्कार	इति	इस प्रकार (यह मन्त्र है) ॥२॥

अहो विचित्रं भगवद्विचेष्टितं
घ्नन्तं जनोऽयं हि मिषन्न पश्यति ।
ध्यायन्नसद्यर्हि विकर्म सेवितुं
निर्हृत्य पुत्रं पितरं जिजीविषति ॥३॥

अहो विचित्रं भगवत् विचेष्टितं घ्नन्तं जनः अयं हि मिषन् न पश्यति ध्यायत् असत् यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥३॥

अहो	अहो,	विकर्म सेवितुं	असत् कर्मके करनेका
भगवत्	भगवान्‌की	असत् ध्यायत्	पापमय चिन्तन करता है
विचेष्टितं	लीला	पुत्रं पितरं	(तब) पुत्र और पिता (के शवको)
विचित्रं	विचित्र है ।	निर्हृत्य	जलाकर आनेपर भी
हि मिषन्	क्योंकि देखते हुए	जिजीविषति	(स्वयं) जीवित रहनेकी इच्छा करता है ॥३॥
अयं जनः	यह मनुष्य		
घ्नन्तं	मारनेवाले (काल)को		
न पश्यति	नहीं देखता ।		
यर्हि	जब		

वदन्ति विश्वं कवयः स्म नश्वरं
पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज मायया
सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥४॥

वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति च अध्यात्मविदः विपश्चितः तथापि मुह्यन्ति तव अज मायया सुविस्मितं कृत्यं अजं नतोऽस्मि तम् ॥४॥

कवयः	बुद्धिमान लोग
विश्वं	संसारको
नश्वरं	विनाशशील
वदन्ति स्म	कहते ही हैं,
च अध्यात्म-विदः	तथा अध्यात्म-तत्त्वको जाननेवाले
विपश्चितः	विवेकी
पश्यन्ति	(ऐसा ही) देखते भी हैं,
तथापि	फिर भी
तव	आपकी
अज मायया	अनादि मायासे
मुह्यन्ति	मोहित हो जाते हैं
सुविस्मितं	अत्यन्त विस्मयकारी
कृत्यं अजं	कर्मवाले आप अजन्मा
तं नतोऽस्मि	उस आपको (हम) नमस्कार करते हैं ॥४॥

विश्वोद्भवस्थाननिरोधकर्म ते
ह्यकर्तुरङ्गीकृतमप्यपावृतः ।
युक्तं न चित्रं त्वयि कार्यकारणे
सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥

विश्व उद्भव स्थान निरोध कर्म ते हि अकर्तुः अङ्गीकृतं अपि अपावृतः युक्तं न चित्रं त्वयि कार्यं कारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥

हि	क्योंकि
ते अकर्तः	आप अकर्ता द्वारा
विश्व उद्भव	संसारकी उत्पत्ति,
स्थान निरोध	स्थित, प्रलय
कर्म अङ्गीकृतः	कर्म स्वीकार किया गया है ।
अपि अपावृतः	फिर भी (आप) आवरण रहित हैं-
त्वयि कार्य	आप कार्य-
कारणे	कारण रूप
सर्वात्मनि	सर्वात्मामें
युक्तं	यह उपयुक्त है,
न चित्रं	(इसमें कुछ) विचित्र नहीं है
वस्तुतः च	वस्तुतः तो
व्यतिरिक्ते	आप (इन सबसे) अतीत हैं ॥५॥

वेदान् युगान्ते तमसा तिरस्कृतान्
रसातलाद्यो नृतुरङ्गविग्रहः ।

प्रत्याददे वै कवयेऽभियाचते
तस्मै नमस्तेऽवितथेहिताय इति ॥६॥

वेदान् युगान्ते तमसा तिरस्कृतान् रसातलात् यः नृतुरङ्ग विग्रहः प्रति आददे वै कवये अभियाचते तस्मै नमः ते अवितथ ईहिताय इति ॥६॥

	प्रलयके समय	अभियाचते	प्रार्थना करने वाले
युगान्ते	तमोगुणी (राक्षस)	कवये वै	ब्रह्माजीको
तमसा	द्वारा	प्रति आददे	लौटा कर दिया
	छिपा दिये गये	इति	इस प्रकारके
तिरस्कृतान्	वेदोंको जिन	अवितथ	अमोघ
वेदान् यः	मनुष्य एवं घोड़ेके	ईहिताय	सङ्कल्प
नृतुरङ्ग	सम्मिलित	तस्मै ते	उस आपको
	स्वरूप वाले	नमः	(हम) नमस्कार
विग्रहः	(प्रभु) ने		करते हैं ॥६॥

श्रीशुक उवाच-*

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते । तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये । तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥७॥

हरिवर्षे च अपि भगवान् नरहरिरूपेण आस्ते । तत् रूप ग्रहण निमित्तं उत्तरत्र अभिधास्ये । तत् दयितं रूपं महापुरुष गुण भाजनः महाभागवतः दैत्यदानवकुल तीर्थीकरण शील आचरितः प्रह्लादः अव्यवधान अनन्य भक्तियोगेन सह तत् वर्ष पुरुषैः उपास्ते इदं च उदाहरति ॥७॥

हरिवर्षे च अपि	हरिवर्षमें भी	नरहरिरूपेण	नृसिंह रूपमें
भगवान्	भगवान्	आस्ते	रहते हैं

* यह उवाच अन्य प्रतियोंमें नहीं है ।

तत् रूप	उस रूपके	शील	शीलका
ग्रहण	धारणका	आचरितः	आचरण करने वाले
निमित्तं	कारण	प्रह्लादः	प्रह्लादजी
उत्तरत्र	इसी प्रसंगमें आगे	अव्यवधान	निर्बाध
अभिधास्ये	बतलाऊँगा।	अनन्य	अनन्य
तत्	उस (अपने)	भक्तियोगेन	भक्ति द्वारा
दयितं रूपं	परमप्रिय रूपकी	तत् वर्ष	उस वर्षके
महापुरुष	महापुरुषोचित	पुरुषैः सह	पुरुषोंके साथ
गुण भाजनः	गुणोंसे युक्त	उपास्ते	उपासना करते हैं,
महाभागवतः	परमभगवद् भक्त	च इदं	और इस
दैत्यदानवकुल	दैत्यदानवकुलको		(स्तोत्र) का
तीर्थीकरण	पवित्र करने वाले	उदाहरति	पाठ करते हैं ॥७॥

प्रह्लाद उवाच-*

ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ॐ स्वाहा। अभयमभयमात्मनि भूयिष्ठा ॐ क्षौम् ॥८॥

ॐ नमः भगवते नरसिंहाय नमः तेजः तेजसे आविः आविः भव वज्रनख वज्रदंष्ट्र कर्म आशयान् रन्धय रन्धय तमः ग्रस ग्रस ॐ स्वाहा। अभयं अभयं आत्मनि भूयिष्ठा ॐ क्षौम् ॥८॥

ॐ	ओंकार स्वरूप	नमः	(आपको)
भगवते	भगवान्		नमस्कार।
नरसिंहाय नमः	नृसिंहको नमस्कार	वज्रनख	वज्रनख,
तेजः तेजसे	तेजस्वियोंके भी	वज्रदंष्ट्र	वज्रदाढों वाले!
	तेज	आविः	प्रकट होइये!

* यह उवाच अन्य प्रतियोंमें नहीं है।

आविः भव	प्रकट होइये !
कर्म	कर्म संस्कार रूप
आशयान्	चित्तको
रन्धय	भून दीजिये !
रन्धय	भून दीजिये !
तमः	अज्ञान्धकारको
ग्रस	खा लीजिये,
ग्रस	खा लीजिये,
ॐ स्वाहा	ॐ स्वाहा ।
आत्मनि	अन्तःकरणमें
अभयं अभयं	परमअभय
भूयिष्ठा	देने वाले बनिये ।
ॐ क्ष्रौम्	ॐ क्ष्रौम ॥८॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे
आवेश्यतां नो मतिरप्यहैतुकी ॥९॥

स्वस्ति अस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथः धिया मनः च भद्रं भजतात् अधोक्षजे आवेश्यतां नः मतिः अपि अहैतुकी ॥९॥

विश्वस्य	विश्वका
स्वस्ति अस्तु	कल्याण हो,
खलः प्रसीदतां	दुष्टोंका (चित्त) निर्मल हो,
भूतानि मिथः	प्राणी परस्पर
धिया	बुद्धिसे (एक-
शिवं ध्यायन्तु	दूसरेका) कल्याण चिन्तन करें ।
च मनः भद्रं	और मन शुभमें
भजतात्	लगे ।
नः मतिः अपि	हमारी बुद्धि भी
अधोक्षजे	भगवान् हृषीकेशमें
अहैतुकी	निष्काम भावसे
आवेश्यतां	प्रवेश करें ॥९॥

मागारदारात्मजवित्तबन्धुषु
सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान्
सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥१०॥

मा आगार दारा आत्मज वित्त बन्धुषु सङ्गः यदि स्यात् भगवत् प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यति अदूरात् न तथा इन्द्रिय प्रियः ॥१०॥

नः यदि सङ्गः	यदि हमारी	परितुष्ट	सन्तुष्ट रहनेवाला
स्यात्	आसक्ति हो	आत्मवान्	संयमी है,
भगवत् प्रियेषु	(तो) भगवान्के प्रेमियोंसे हो,	अदूरात्	(वह) शीघ्र
		सिद्ध्यति	सिद्ध (सफलता) पा लेता है,
आगार दारा	घर, स्त्री,		
आत्मज वित्त	पुत्र, धन,	तथा इन्द्रिय	उस प्रकार इन्द्रियोंसे
बन्धुषु मा	सम्बन्धियोंसे न हो।	प्रियः न	प्रेम करनेवाला नहीं (पाता) ॥१०॥
यः प्राणवृत्त्या	जो जीवन-निर्वाह मात्रसे		

यत्सङ्गलब्धं निजवीर्यवैभवं
तीर्थं मुहुः संस्पृशतां हि मानसम्।
हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं
को वै न सेवेत मुकुन्दविक्रमम् ॥११॥

यत् सङ्ग लब्धं निजवीर्य वैभवं तीर्थं मुहुः संस्पृशतां हि मानसं हरति अजः अन्तः श्रुतिभिः गतः अङ्गजं कः वै न सेवेत मुकुन्द विक्रमम् ॥११॥

यत् सङ्ग	उन (महापुरुषों)के सत्संगसे	लब्धं	(वर्णन सुननेको) मिलता है,
हि	क्योंकि	अजः	(जिससे) अजन्मा प्रभु
मुहुः मानसं	बार-बार हृदयको		
संस्पृशतां	स्पर्श करनेवाला	श्रुतिभिः	श्रवण-मार्गसे
तीर्थं	परम-पवित्र	अन्तः गतः	अन्तःकरणमें जाकर
निजवीर्य वैभवं	(आपके) अपने पराक्रम तथा ऐश्वर्यका	अङ्गजं हरति	दैहिक-मानसिक मल-हरणकर लेते हैं,

मुकुन्द विक्रमं	(ऐसे) श्रीहरिके पराक्रमका भला कौन	सेवेत न	सेवन नहीं करे ॥११॥

यस्यास्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो बहिः ॥१२॥

यस्य अस्ति भक्तिः भगवति अकिञ्चना सर्वैः गुणैः तत्र समासते सुराः
हरेः अभक्तस्य कुतः महत् गुणा मनोरथेन असति धावतः बहिः ॥१२॥

यस्य भगवति	जिसकी भगवान्में	मनोरथेन	(उस) कामनाओंके कारण
अकिञ्चना	निष्काम	असति	असत् (संसार) में
भक्ति अस्ति	भक्ति है	बहिः	बाहर
तत्र सुराः	वहाँ देवता	धावतः	भागते हुएमें
सर्वैः गुणैः	सब गुणोंके साथ	महत् गुणाः	महान गुण
समासते	स्थिर रहते हैं ।	कुतः	कहाँसे (हो सकते है) ॥१२॥
हरेः	जो श्रीहरिका		
अभक्तस्य	भक्त नहीं हैं		

हरिर्हि साक्षाद्भगवान् शरीरिणा-
मात्मा झषाणामिव तोयमीप्सितम् ।
हित्वा महांस्तं यदि सज्जते गृहे
तदा महत्त्वं वयसा दम्पतीनाम् ॥१३॥

हरिः हि साक्षात् भगवान् शरीरिणां आत्मा झषाणां इव तोयं ईप्सितं
हित्वा महान् तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥१३॥

हि	क्योंकि	ईप्सितं	परम अभीष्ट
झषाणां	मछलियोंके लिए	तोयं इव	पानीके समान

साक्षात् भगवान्	साक्षात् भगवान्	सज्जते	आसक्त होता है
हरिः	श्रीहरि	तदा दम्पतीनां	तब स्त्री-पुरुषका
शरीरिणां	शरीर धारियोंकी	महत्त्वं	बड़प्पन
आत्मा	आत्मा है	वयसा	(केवल) आयुसे
तं महान्	उन महत्तमको		(रह जाता, है ॥१३॥
हित्वा	छोड़कर		
यदि गृहे	यदि (कोई) घरमें		

तस्माद्रजोरागविषादमन्यु-
मानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रवालं
नृसिंहपादं भजताकुतोभयमिति ॥१४॥

तस्मात् रजः राग विषाद मन्यु मान स्पृहाभय दैन्य आधिमूलं हित्वा गृहं संसृति चक्रवालं नृसिंह पादं भजत अकुतः भयम् इति ॥१४॥

तस्मात्	इसलिए	अकुतः	(जहाँ) किसी औरका
रजः राग	अतिप्रवृत्ति, राग,		
विषाद मन्यु	शोक, क्रोध,	भयं	भय नहीं है
मान स्पृहा	अभिमान, स्पर्धा	नृसिंह	(उस) भगवान् नृसिंहके
भय दैन्य	भय, दीनता आदि		
आधिमूलं	चिन्ताओंकी जड़	पादं	चरणोंका
संसृति	जन्म-मरण	भजत	भजन करो।
चक्रवालं	चक्रको ढोने वाले	इति	इस प्रकार (स्तुति करते है) ॥१४॥
गृहं हित्वा	गृहस्थाश्रमको त्यागकर		

श्रीशुक उवाच-*

केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितृणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरि-

* यह उवाच अन्य प्रतियोंमें नहीं है।

...नानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥१५॥

केतुमाले अपि भगवान् कामदेव स्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेः दुहितृणां पुत्राणां तद्वर्षपतीनां पुरुष आयुष अहोरात्र परिसंख्या-नानां यासां गर्भा महापुरुष महास्त्र तेजसा उद्वेजित मनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥१५॥

केतुमाले अपि	केतुमाल वर्षमें भी
लक्ष्म्याः	लक्ष्मीजीका तथा
प्रजापतेः	प्रजापति (संवत्सर) की
दुहितृणां	पुत्रियों और
पुत्राणां	पुत्रोंका
प्रियचिकीर्षया	प्रिय करनेकी इच्छासे
कामदेव	कामदेवके
स्वरूपेण	रूपमें (रहते हैं)
तद्वर्षपतीनां	उस वर्षके प्रमुखके
पुरुष आयुषः	पुरुषोंकी आयु
अहोरात्र	दिन-रात
परिसंख्यानानां	(मनुष्यकी सौ वर्षकी आयुके) दिन-रातकी संख्याके बराबर (छत्तीस हजार वर्ष) है।
यासां गर्भा	जिनके गर्भ
महापुरुष	परमपुरुष भगवान्‌के
महास्त्र तेजसा	महान अस्त्र (सुदर्शन-चक्र)के तेजसे
उद्वेजित	उद्विग्न
मनसां	मन होनेसे
विध्वस्ता	नष्टप्राय,
व्यसवः	स्थान च्युतहोकर
संवत्सरान्ते	वर्षके अन्तमें
विनिपतन्ति	गिर जाते हैं ॥१५॥

अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोक-लीलया किञ्चिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥१६॥

अतीव सुललित गतिविलास विलसित रुचिरहासलेश अवलोक लीलया किञ्चित् उत्तम्भित सुन्दर भ्रू मण्डल सुभग वदनारविन्द श्रिया रमां रमयन् इन्द्रियाणि रमयते ॥१६॥

अतीव सुललित	अत्यन्त सुन्दर	**भ्रूमण्डल**	भौंहोंसे
गतिविलास	लीलापूर्ण	**सुभग**	और सुन्दर
विलसित	चेष्टायुक्त	**वदनारविन्द**	मुख-कमल
रुचिरहासलेश	मनोहर मुस्कानपूर्वक	**श्रिया**	(की) शोभासे
अवलोक	देखते हुए	**रमां रमयन्**	लक्ष्मीको आनन्दित करते
लीलया	कटाक्ष सहित	**इन्द्रियाणि**	(अपनी) इन्द्रियोंको भी
किञ्चित्	तनिक	**रमयते**	सुखी करते हैं॥१६॥
उत्तम्भित	उठी हुई		
सुन्दर	सुन्दर		

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताहःसु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥१७॥

तत् भगवतः मायामयं रूपं परम समाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेः दुहितृभिः उपेता अहःसु च तत् भर्तृभिः उपास्ते इदं च उदाहरति ॥१७॥

भगवतः	भगवान्‌के	**तत् भर्तृभिः**	उनके पतियोंके
तत् मायामयं	उस मायामय	**उपेता**	साथ
रूपं	रूपकी	**परम**	अत्यन्त
रात्रिषु	रात्रिमें	**समाधियोगेन**	एकाग्रतापूर्वक
संवत्सरस्य	प्रजापति संवत्सरकी	**उपास्ते**	उपासना करती हैं।
दुहितृभिः	पुत्रियोंके	**च इदं**	और यह
च अहःसु	और दिनमें	**उदाहरति**	स्तुति करती हैं ॥१७॥

[ब्रह्]मा उवाच*

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषै-विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलायच्छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥१८॥

ॐ ह्रां ह्रीं ह्रूं ॐ नमः भगवते हृषीकेशाय सर्व गुणविशेषैः विलक्षित आत्मने आकूतीनां चित्तीनां चेतसां विशेषाणां च अधिपतये षोडशकलाय छन्दोमयाय अन्नमयाय अमृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमः ते उभयत्र भूयात् ॥१८॥

ॐ भगवते	ओंकार स्वरूप भगवान्
हृषीकेशाय	इन्द्रियोंके नियन्ता,
सर्व	सब
गुणविशेषैः	विशिष्ठ गुणोंसे
विलक्षित	जिनकी
आत्मने	अपनी पहिचान होती है,
आकूतीनां	क्रिया-शक्ति,
चित्तीनां	ज्ञान-शक्ति,
च	तथा
चेतसां	(संकल्प, धैर्यादि) चित्तकी
विशेषाणां	विशेषताओंके
अधिपतये	अधिपति
षोडशकलाय	सोलह कलायुक्त,
छन्दोमयाय	वेदमय,
अन्नमयाय	अन्नमय.
अमृतमयाय	अमृतमय,
सर्वमयाय	सर्वमय,
कान्ताय	प्रियतम
कामाय	कामदेव
ह्रां ह्रीं ह्रूं	ह्रां ह्रीं ह्रूं (इन वीज मन्त्रों) से
उभयत्र	सब ओरसे
ते नमः भूयात्	आपको नमस्कार हो ॥१८॥

* यह उवाच अन्य प्रतियोंमें नहीं है।

स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो
ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं
प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥१९॥

स्त्रियः व्रतैः त्वां हृषीक ईश्वरं स्वतः हि आराध्य लोके पतिं आशासते अन्यं तासां न ते वै परिपान्ति अपत्यं प्रियं धन आयूंषि यतः अस्वतन्त्राः ॥१९॥

हि स्त्रियः	क्योंकि स्त्रियां	ते वै	निश्चय वे
स्वतः	स्वयं	तासां	उन (स्त्रियों) के
त्वां हृषीक	आप इन्द्रियोंके	प्रियं अपत्यं	प्रिय पुत्रों (तथा)
ईश्वरं	स्वामीकी	धन आयूंषि	धन, आयुकी
व्रतैः	व्रतोंके द्वारा	परिपान्ति न	रक्षा नहीं कर पाते
आराध्य	आराधना करके	यतः	क्योंकि (वे)
लोके	संसारमें	अस्वतन्त्राः	स्वतन्त्र नहीं
अन्यं पतिं	दूसरा पति		हैं ॥१९॥
आशासते	चाहती हैं,		

स वै पतिः स्यादकुतोभयः स्वयं
समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं
नैवात्मलाभादधि मन्यते परम् ॥२०॥

स वै पतिः स्यात् अकुतः भयः स्वयं समन्ततः पाति भय आतुरं जनं स एक एव इतरथा मिथः भयं न एव आत्मलाभात् अधि मन्यते परम् ॥२०॥

स वै	निश्चय वही	भयः	भय न हो
पतिः स्यात्	(सच्चा) पति	भय आतुरं	भयसे व्याकुल
	(रक्षक) है	जनं	लोगोंकी
स्वयं अकुतः	(जिसे) स्वयं कहींसे	समन्ततः	सब ओरसे

पाति	रक्षा करता है,
स एक एव	वह (तो) एक ही है
इतरया	दूसरेकी सत्ता होने पर
मिथः भयं	(उन्हें) परस्पर (एक दूसरेसे) भय होगा
आत्मलाभात्	(अतः आप) अपनी प्राप्तिसे
परं	बढ़कर कुछ
न एव	नहीं ही
अधि मन्यते	मानते ॥२०॥

या तस्य ते पादसरोरुहार्हणं
निकामयेत्साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो
यद्भग्नयाच्ञा भगवन् प्रतप्यते ॥२१॥

या तस्य ते पाद सरोरुह अर्हणं निकामयेत् सा अखिल काम लम्पटा तत् एव रासि ईप्सितं ईप्सितः अर्चितः यत् भग्न याञ्चा भगवन् प्रतप्यते ॥२१

तस्य ते	ऐसे आपके
पाद सरोरुह	चरण-कमलकी
अर्हणं	पूजा ही
या निकामयेत्	जो (स्त्री) चाहती है
सा अखिल	वह समस्त
काम	कामनाएँ
लम्पटा	चाहने वाली है। (उसकी सब कामनाएँ पूर्ण होती हैं।)
ईप्सितं अर्चितः	अभीष्ट (विशेष) से पूजा किये जानेपर
तत् एव ईप्सितं	वही अभीष्ट (आप)
रासि	दे देते हैं।
भगवन्	भगवन् (पर)
यत् भग्न याञ्चा	क्योंकि वह मांगी वस्तु नष्ट होगी ही (तब वह)
प्रतप्यते	संतप्त होती है ॥२१॥

मत्प्राप्तयेऽजेशसुरासुरादय-
स्तप्यन्त उग्रं तप ऐन्द्रियेधियः ।
ऋते भवत्पादपरायणान्न मां
विन्दन्त्यहं त्वद्धृदया यतोऽजित ॥२२॥

मत् प्राप्तये अज ईश सुर असुरादयः तप्यन्त उग्रं तप ऐन्द्रिय एधियः ऋते भगत् पाद परायणात् न मां विन्दन्ति अहं त्वत् हृदया यतः अजित ॥२२॥

अजित	अजित !	भवत् पाद	आपके चरणोंके
ऐन्द्रिय एधियः	ऐन्द्रियक-सुखमें लगी बुद्धि वाले	परायणात्	परायणोंको
अज ईश	ब्रह्मा, शिव,	ऋते	छोड़कर (दूसरे)
सुर असुरादयः	देवता, असुर आदि	न मां विन्दन्ति	मुझे नहीं पाते
मत् प्राप्तये	मेरी प्राप्तिके लिए	यतः	क्योंकि
उग्रं तप	घोर तपस्या	अहं त्वत् हृदया	मेरा हृदय आपमें लगा है ॥२२॥
तप्यन्त	करते हैं (किन्तु)		

स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं
करास्बुजं यत्त्वदधायि सात्वताम् ।
बिभर्षि मां लक्ष्म वरेण्य मायया
क ईश्वरस्येहितमूहितुं विभुरिति ॥२३॥

स त्वं मम अपि अच्युत शीर्ष्णि वन्दितं करास्बुजं यत् अवधायि सात्वतां बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्य ईहितुं अहितुं विभुः इति ॥२३॥

त्वं यत्	आप तो जिस	लक्ष्म वरेण्य	वरणीय लक्षण (श्रीवत्सके रूपमें)
वन्दितं	वन्दनीय	मां बिभर्षि	(आप) मुझे धारण करते हैं (सो)
करास्बुजं	कर-कमलको		
सात्वतां	भक्तोंके (ऊपर)	विभुः ईश्वरस्य	सर्वव्यापक, सर्व समर्थकी
अवधायि	रखते हैं		
अच्युत	अच्युत !	ईहितुं	चेष्टाको
स मम अपि	वह मेरे भी	क अहितुं	कौन समझ सकता है
शीर्ष्णि	मस्तकपर (रखिये)		
मायया	(अपनी) मायासे	इति	इस प्रकार ॥२३॥

श्रीशुक उवाच–*

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥२४॥

रम्यके च भगवतः प्रियतमं मात्स्यं अवतार रूपं तद् वर्ष पुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीं अपि महता भक्तियोगेन आराधयति इदं च उदाहरति ॥२४॥

रम्यके च	रम्यक वर्षमें भी
तद् वर्ष	उस वर्षके
पुरुषस्य मनोः	पुरुषोंके मनुको
भगवतः	भगवान्ने
प्रियतमं रूपं	(अपना) अत्यन्त प्रिय रूप
मात्स्यं अवतार	मत्स्यावतार
प्राक् प्रदर्शितं	पहिले दिखलाया था,
स इदानीं अपि	वे (मनु) अब भी
महता	महान
भक्तियोगेन	भक्तियोगसे
आराधयति	(उसी रूपकी) आराधना करते हैं
च इदं	और यह
उदाहरति	स्तुति करते हैं ॥२४॥

मनुरुवाच–*

ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥२५॥

ॐ नमः भगवते मुख्यतमाय नमः सत्त्वाय प्राणाय ओजसे सहसे बलाय महामत्स्याय नमः इति ॥२५॥

ॐ भगवते	ओंकार रूप भगवान्
मुख्यतमाय	सबसे प्रमुखको
नमः	नमस्कार।

* यह उवाच अन्य प्रतियोंमें नहीं है।

* यह उवाच अन्य प्रतियोंमें नहीं है।

सत्त्वाय नमः	सत्त्व स्वरूपको नमस्कार।	बलाय	शरीरबल स्वरूप
प्राणाय	प्राणस्वरूप	महामत्स्याय	महामत्स्य भगवान्‌को
ओजसे	मनोवल,	नमः	नमस्कार,
सहसे	इन्द्रियबल	इति	इस प्रकार ॥२५॥

अन्तर्बहिश्चाखिललोकपालकै-
रदृष्टरूपो विचरस्युरुस्वनः।
स ईश्वरस्त्वं य इदं वशेऽनय-
न्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥२६॥

अन्तः बहिः च अखिल लोकपालकैः अदृष्ट रूपः विचरसि उरु स्वनः स ईश्वरः त्वं य इदं वशे अनयत् नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥२६॥

अखिल	सब	यथा नरः	जैसे मनुष्य
लोकपालकैः	लोकपालों द्वारा	दारुमयीं स्त्रियं	कठपुतलीको (नचावे)
अदृष्ट रूपः	जिनका रूप दीखता नहीं	य इदं	जो इस जगत्‌को
अन्तः	(पर प्राणियोंके) भीतर (प्राण रूपसे)	नाम्ना	नाम (रूपी रस्सी)से
च बहिः	और बाहर (वायु रूपसे)	वशे अनयत्	वशमें किये हैं
विचरसि	विचरण करते हैं।	स ईश्वरः त्वं	वे सर्व संचालक आप ही हैं ॥२६॥
उरुस्वनः	(वेदरूप) महाशब्द वाले (आप)		

यं लोकपालाः किल मत्सरज्वरा
हित्वा यतन्तोऽपि पृथक् समेत्य च।
पातुं न शेकुर्द्विपदश्चतुष्पदः
सरीसृपं स्थाणु यदत्र दृश्यते ॥२७॥

यं लोकपालाः किल मत्सर ज्वराः हित्वा यतन्तः अपि पृथक् समेत्य
च पातुं न शेकुः द्विपदः चतुष्पदः सरीसृपं स्थाणु यद् अत्र दृश्यते ॥२७॥

किल	अहो,	चतुष्पदः	चौपायोंको
मत्सर ज्वराः	डाह रूपी ज्वरसे ग्रस्त	सरीसृपं	सरकने वालोंको
लोकपालाः	लोकपाल लोग	स्थाणु	स्थावरोंको
यं हित्वा	जिस (प्राण रूप आप) को छोड़कर	यद् अत्र दृश्यते	(जो कुछ) यहाँ संसारमें दिखलायी पड़ता है,
यतन्तः अपि	प्रयत्न करते हुए भी	पातुं	(किसीकी भी) रक्षा करनेमें
पृथक्	अकेले-अकेले	शेकुः न	समर्थ नहीं हुए ॥२७
च समेत्य	और सब मिलकर भी		
द्विपदः	दो पैर वाले प्राणियोंको,		

भवान् युगान्तार्णव ऊर्मिमालिनि
क्षोणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरु क्रमतेऽज ओजसा
तस्मै जगत्प्राणगणात्मने नम इति ॥२८॥

भवान् युगान्त अर्णव ऊर्मिमालिनि क्षोणीं इमां ओषधि वीरुधां निधिं मया सह उरु क्रमते अज ओजसा तस्मै जगत् प्राणगण आत्मने नमः इति ॥२८॥

अज	अजन्मा प्रभु !	युगान्त अर्णव	प्रलय-समुद्रमें
मया सह	मेरे साथ	ओजसा	उत्साह पूर्वक
ओषधि	औषधियों और	उरु क्रमते	बहुत विहार किया
वीरुधां	क्षुपोंकी	तस्मै	उस
निधिं	खजाना रूप	जगत् प्राणगण	संसारके प्राणोंके
इमां क्षोणीं	इस पृथ्वी (रूप नौका) को	आत्मने	स्वरूपको
		नमः	नमस्कार
ऊर्मिमालिनि	उत्ताल तरंगायमान	इति	इस प्रकार ॥२८॥

श्रीशुक उवाच■

हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ॥२९॥

हिरण्मये अपि भगवान् निवसति कूर्मतनुं बिभ्राणः तस्य तत् प्रियतमां तनुं अर्यमा सह वर्षपुरुषैः पितृगण अधिपतिः उपधावति मन्त्रं इमं च अनुजपति ॥२९॥

हिरण्मये अपि	हिरण्मय वर्षमें भी	अधिपतिः	अधिपति
भगवान्	भगवान्	अर्यमा	अर्यमा
कूर्मतनुं	कूर्म शरीर	वर्षपुरुषैः सह	उस वर्षके पुरुषोंके साथ
बिभ्राणः	धारण करके		
निवसति	निवास करते हैं।	उपधावति	उपासना करते हैं
तस्य तत्	उनके उस	च इमं मन्त्रं	और इस मन्त्रको
प्रियतमां तनुं	अत्यन्त प्रिय स्वरूपकी	अनुजपति	बराबर जपते हैं ॥२९॥
पितृगण	पितरगणोंके		

अर्यमोवाच*

ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ॥३०॥

ॐ नमः भगवते अकूपाराय सर्वसत्त्वगुण विशेषणाय अनुपलक्षित स्थानाय नमः वर्ष्मणे नमः भूम्ने नमो नमः अवस्थानाय नमः ते ॥३०॥

■ यह उवाच अन्य प्रतियोंमें नहीं है।

* यह उवाच अन्य प्रतियोंमें नहीं है।

ॐ भगवते	ओंकार स्वरूप भगवान्
अकूपाराय नमः	कच्छपको नमस्कार
सर्वसत्त्वगुण विशेषणाय	सम्पूर्ण सत्त्वगुणकी विशेषतासे युक्त
अनुपलक्षित	(जलमें रहनेसे) अलक्षित
स्थानाय	निवास वाले (प्रभुको)
नमः	नमस्कार
वर्ष्मणे नमः	कालातीतको नमस्कार
भूम्ने नमो नमः	सर्व व्यापकको बार-बार नमस्कार
ते अवस्थानाय	आप सर्वाधारको
नमः	नमस्कार ॥३०॥

यद्रूपमेतन्निजमायर्यापित-
मर्थस्वरूपं बहुरूपरूपितम् ।
संख्या न यस्यास्त्ययथोपलम्भनात्
तस्मै नमस्तेऽव्यपदेशरूपिणे ॥३१॥

यत् रूपं एतत् निज मायया अर्पितं अर्थस्वरूपं बहुरूपरूपितं संख्या न यस्य अस्ति अयथा उपलम्भनात् तस्मै नमः ते अव्य पदेश रूपिणे ॥३१॥

निज मायया	अपनी मायासे
अर्पितं	दिया हुआ (होनेपर भी)
एतत् यत् रूपं	यह जो (कूर्म) रूप है,
अर्थस्वरूपं	परमार्थ स्वरूप है,
बहुरूपरूपितं	(आपके) बहुत रूप (श्रुतिमें) वर्णित हैं
अयथा	अवास्तविक (माया)
उपलम्भनात्	प्रतीति होनेसे
यस्य संख्या	जिनकी गणना
न अस्ति	नहीं है,
तस्मै	उस
अव्य पदेश	अनिर्देश्य
रूपिणे	रूप
ते नमः	आपको नमस्कार ॥३१॥

जरायुजं स्वेदजमण्डजोद्भिदं
चराचरं देवर्षिपितृभूतमैन्द्रियम् ।
द्यौः खं क्षितिः शैलसरित्समुद्र-
द्वीपग्रहर्क्षेत्यभिधेय एकः ॥३२॥

जरायुजं स्वेदजं अण्डज उद्भिदं चर अचरं देवः ऋषि पितृ भूतं ऐन्द्रियं द्यौः खं क्षितिः शैल सरित् समुद्र द्वीप ग्रह ऋक्ष इति अभिधेयः एकः ॥३२॥

जरायुज	जरायुज,	शैल, सरित्,	पर्वत, नदियां,
स्वेदजं अण्डज	स्वेदज, अण्डज,	समुद्र	समुद्र,
उद्भिदं	उद्भिज,	द्वीप, ग्रह, ऋक्ष	द्वीप, ग्रह, नक्षत्र
चर अचरं	चर, अचर,	इति	इस प्रकार (अनेक नाम रूपोंसे)
देवः ऋषि पितृ	देवता, ऋषि, पितर,	अभिधेयः	कहे जाने वाले
भूतं ऐन्द्रियं	पञ्चमहाभूत, इन्द्रियां,	एकः	एक (आप) ही हैं ॥३२॥
द्यौः खं क्षितिः	स्वर्ग, आकाश, पृथ्वी,		

यस्मिन्नसंख्येयविशेषनाम-
रूपाकृतौ कविभिः कल्पितेयम् ।
संख्या यया तत्त्वदृशापनीयते
तस्मै नमः सांख्यनिदर्शनाय ते इति ॥३३॥

यस्मिन् असंख्येय विशेष नाम रूप आकृतिः कविभिः कल्पिता इयं संख्या यया तत्त्वदृशा अपनीयते तस्मै नमः सांख्य निदर्शनाय ते इति ॥३३॥

यस्मिन्	जिसमें		लेने) से
अयंख्येय	असंख्य	इयं संख्या	यह संख्या
विशेष	विशेष विशेष	अपनीयते	निवृत्त हो जाती है
नाम रूप	नाम, रूप	तस्मै	उस
आकृति	आकृति	सांख्य	संख्याका
कविभिः	विद्वानों द्वारा	निदर्शनाम	तत्त्व निर्दिष्ट करनेवाले
कल्पिता	कल्पित की गई है,		
यया तत्त्वदृशा	जिस तत्त्वको	ते नमः	आपको नमस्कार
	देखने (साक्षात् कर	इति	इस प्रकार ॥३३॥

श्रीशुक उवाच-*

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ।।३४।।

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृत वराहरूपः आस्ते तं तु देवी हि एषा भूः सह कुरुभिः अस्खलित भक्तियोगेन उपधावति इमां च परमां उपनिषदं आवर्तयति ।।३४।।

उत्तरेषु	उत्तरमें	सह कुरुभिः	(वहाँके निवासी) कुरुओंके साथ
कुरुषु च	कुरुमें भी	अस्खलित	अविचल
यज्ञपुरुषः	यज्ञपुरुष	भक्तियोगेन	भक्तिभावसे
भगवान्	भगवान्	उपधावति	उपासना करती हैं।
वराहरूपः कृतः	वाराहरूप धारण करके	च इमां	और इस
आस्ते	रहते हैं,	परमां	सर्वश्रेष्ठ
तं तु	उनका तो	उपनिषदं	उपनिषदकी
एषा हि	यही	आवर्तयति	आवृत्ति (पाठ) करती हैं ।।३४।।
भूः देवी	भू देवी		

भूमिरुवाच-•

ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ।।३५।।

ॐ नमः भगवते मन्त्र तत्त्व लिङ्गाय यज्ञक्रतवे महाध्वर अवयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमः ते ।।३५।।

---

* यह उवाच अन्य प्रतियोंमें नहीं है।

• यह उवाच अन्य प्रतियोंमें नहीं है।

ॐ भगवते	ओंकार स्वरूप भगवान्	महाध्वर अवयवाय	महायज्ञ रूपी अङ्गोंवाले
मन्त्र तत्त्व	मन्त्रोंके तत्त्व (वास्तविक अर्थ)	महापुरुषाय नमः	महापुरुषको नमस्कार।
लिङ्गाय	स्वरूप	कर्मशुक्लाय	सात्विक कर्मस्वरूप,
नमः	(आप)को नमस्कार।	त्रियुगाय	त्रियुग मूर्ति
यज्ञक्रतवे	यज्ञ (हवनात्मक) ऋतु (कथात्मक) स्वरूप	ते नमः	आपको नमस्कार ॥३५॥

यस्य स्वरूपं कवयो विपश्चितो
गुणेषु दारुष्विव जातवेदसम्।
मथ्नन्ति मथ्ना मनसा दिदृक्षवो
गूढं क्रियार्थैर्नम ईरितात्मने ॥३६॥

यस्य स्वरूपं कवयः विपश्चितः गुणेषु दारुषु इव जातवेदसं मथ्नन्ति मथ्ना मनसा दिदृक्षवः गूढं क्रिया अर्थैः नमः ईरित आत्मने ॥३६॥

दारुषु	काष्ठमें	गूढं	(रूपमें) छिपेको
मथ्ना	मथानी(अरणि)से	मनसा मथ्नन्ति	मनसे मथते (मनन करते) हैं,
जातवेदसं	अग्नि	ईरित आत्मने	(इस प्रकार) अपनेको प्रकट करनेवाले
इव	की भाँति	नमः	(आपको) नमस्कार ॥३६॥
विपश्चितः	विवेकी		
कवयः	बुद्धिमान		
यस्य स्वरूपं	जिसके स्वरूपको		
दिदृक्षवः	देखनेकी इच्छासे		
गुणेषु	गुणोंमें		
क्रिया अर्थैः	क्रिया और उसके प्रयोजन (फल)के		

द्रव्यक्रियाहेत्वयनेशकर्तृभि-
र्मायागुणैर्वस्तुनिरीक्षितात्मने ।
अन्वीक्षयाङ्गातिशयात्मबुद्धिभि-
र्निरस्तमायाकृतये नमो नमः ॥३७॥

द्रव्य क्रियाहेतु अयन ईश कर्तृभिः मायागुणैः वस्तु निरीक्षित आत्मने अन्वीक्षया अङ्ग अतिशय आत्मबुद्धिभिः निरस्त मायाकृतये नमो नमः ॥३७॥

द्रव्य क्रिया	पदार्थ, क्रिया,
हेतु अयन	हेतु (इन्द्रिय) अयन (शरीर)
ईश कर्तृभिः	ईश्वर और कर्ता (अहंकार)
मायागुणैः	(आदि) मायाके गुण (कार्य)के द्वारा
वस्तु निरीक्षित	वस्तु-तत्त्वको देखनेमें
आत्मने	अपनेमें ही
अन्वीक्षया	अन्वेषण (मनन) करनेसे
अङ्ग अतिशय	साधनोंकी विशेषतासे
आत्मबुद्धिभिः	(शुद्ध) अपनी बुद्धिसे
मायाकृतये	मायाकी कृति (रचना)को
निरस्त	निरस्तकर देनेपर (शेष)
नमो नमः	आपको बार-बार नमस्कार ॥३७॥

करोति विश्वस्थितिसंयमोदयं
यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ।
माया यथायो भ्रमते तदाश्रयं
ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥३८॥

करोति विश्व स्थिति संयम उदयं यस्य ईप्सितं न ईप्सितं ईक्षितुः गुणैः माया यथा अयः भ्रमते तत् आश्रयं ग्राव्णो नमः ते गुणकर्म साक्षिणे ॥३८॥

यथा अयः	जैसे लोहा	विश्व	संसारकी
तत् आश्रयं	उसके आश्रय (चुम्बक) के घूमनेसे	स्थिति संयम	स्थिति, प्रलय,
भ्रमते	घूमता है (ऐसे ही)	उदयं	सृष्टि
यस्य ईक्षुतुः	जिस साक्षीके	करोति	करती है,
न ईप्सितं	अपने लिए अभीष्ट न होनेपर भी	गुणकर्म	उस गुणों एवं कर्मोंके
ईप्सितं	(सब प्राणियोंके लिए) अभीष्ट	साक्षिणे	साक्षी
गुणैः	प्रभावसे	ग्राव्णो	भगवान् वाराह
माया	माया	ते नमः	आपको नमस्कार ॥३८॥

प्रमथ्य दैत्यं प्रतिवारणं मृधे
यो मां रसाया जगदादिसूकरः ।
कृत्वाग्रदंष्ट्रे निरगादुदन्वतः
क्रीडन्निवेभः प्रणतास्मि तं विभुमिति ॥३९॥

प्रमथ्य दैत्यं प्रतिवारणं मृधे यः मां रसाया जगत् आदि सूकरः कृत्वा अग्र दंष्ट्रे निरगात् उदन्वतः क्रीडन् इव इभः प्रणतः आस्मि तं विभुम् इति ॥३९॥

मृधे	युद्धमें	यः	जो
प्रतिवारणं	रोकनेवाले	जगत् आदि	जगतके कारण
दैत्यं	दैत्य (हिरण्याक्ष) को	सूकरः	भगवान् वाराह
प्रमथ्य	मथ (मार) कर	मां	मुझे

अग्र दंष्ट्रे कृत्वा	दाढ़की नोकपर रखकर
	रसातलसे
रसाया	समुद्रसे
उन्वतः	हाथीके समान
इभः इव	खेल-सा करते
क्रीडन्	

निरगात्	निकले
तं विभुं	(उस) आप सर्व-व्यापकको
प्रणतः अस्मि	प्रणाम करती हूँ
इति	इस प्रकार ॥३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भुवनकोशवर्णनं नामाष्टादशोऽध्यायः ॥१८॥

अथैकोनविंशोऽध्यायः

श्रीशुक उवाच-

किम्पुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनुमान् सह किम्पुरुषैरविरतभक्तिरुपास्ते ।।१।।

किम्पुरुषे वर्षे भगवन्तं आदिपुरुषं लक्ष्मण अग्रजं सीता अभिरामं रामं तत् चरण संनिकर्ष अभिरतः परमभागवतः हनुमान् सह किम्पुरुषैः अविरत भक्तिः उपास्ते ।।१।।

किम्पुरुषे वर्षे	किम्पुरुष वर्षमें	**संनिकर्ष**	सान्निध्यमें
भगवन्तं	भगवान्	**अभिरतः**	भलीप्रकार लगे
आदिपुरुषं	आदिपुरुष	**परमभागवतः**	परमभगवद-भक्त
लक्ष्मण अग्रजं	लक्ष्मणजीके बड़े भाई	**हनुमान्**	हनुमानजी
सीता अभिरामं	सीताजीको प्रसन्न करनेवाले	**किम्पुरुषैः सह**	किम्पुरुषोंके साथ
रामं	श्रीरामकी	**अविरत भक्तिः**	अविचल भक्तिसे
तत् चरण	उनके चरणोंके	**उपास्ते**	उपासना करते हैं ।।१।।

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ।।२।।

आर्ष्टिषेणेन सह गन्धर्वैः अनुगीयमानां परमकल्याणीं भर्तृ भगवत्-कथां समुपशृणोति स्वयं च इदं गायति ।।२।।

सह गन्धर्वैः	गन्धर्वोंके साथ	**अनुगीयमानां**	नित्य गायी जाती
आर्ष्टिषेणेन	आर्ष्टिसेन द्वारा	**परमकल्याणीं**	परमकल्याणदायिनी

भर्तुं भगवत्कथां	अपने स्वामी भगवान्‌की कथा	**स्वयं च**	स्वयं भी
समुपशृणोति	भली प्रकार सुनते हैं।	**इदं गायति**	यह गाते हैं ॥२॥

श्रीहनुमान उवाच-*

ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥३॥

ॐ नमः भगवते उत्तमश्लोकाय नमः आर्य लक्षणशील व्रताय नमः उपशिक्षित आत्मन उपासित लोकाय नमः साधुवाद निकषणाय नमः ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नमः इति ॥३॥

ॐ भगवते	ओंकार स्वरूप भगवान्	**साधुवाद**	सत्पुरुषताकी (परीक्षाके लिए)
उत्तम श्लोकाय	उत्तम कीर्तिको	**निकषणाय नमः**	कसौटीके समानको नमस्कार।
नमः	नमस्कार,	**ब्रह्मण्यदेवाय**	ब्राह्मणोंको देवता माननेवाले
आर्यं	सत्पुरुषोंके	**महापुरुषाय**	महापुरुष (पुरुषोत्तम)
लक्षणशील	लक्षण, आचरण,	**महाराजाय**	महाराजको
व्रताय नमः	नियमनिष्ठको नमस्कार,	**नमः**	नमस्कार।
उपशिक्षित	संयत	**इति**	इस प्रकार ॥३॥
आत्मन	चित्त		
उपासितलोकाय नमः	लोकाराधकको नमस्कार।		

* यह उवाच अन्य प्रतियोंमें नहीं है।

यत्तद्विशुद्धानुभवमात्रमेकं
स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक् प्रशान्तं सुधियोपलम्भनं
ह्यनामरूपं निरहं प्रपद्ये ॥४॥

यत् तत् विशुद्ध अनुभव मात्रं एकं स्वतेजसा ध्वस्त गुण व्यवस्थं प्रत्यक् प्रशान्तं सुधियः उपलम्भनं हि अनाम रूपं निः अहं प्रपद्ये ॥४॥

यत्	जो	प्रत्यक्	अन्तरात्मा,
विशुद्ध अनुभव	अनुभव	प्रशान्तं	अत्यन्त शान्त
मात्रं	स्वरूप,	सुधियः	शुद्ध बुद्धिमें
एकं	अद्वितीय	उपलम्भनं	लक्षित होनेवाले
स्वतेजसा	अपने तेजसे	हि अनाम रूपं	क्योंकि नाम-रूप
गुण व्यवस्थं	त्रिगुणोंकी व्यवस्था		रहित हैं
	(प्रपंच)का	तत् निः अहं	उस अहंकारहीनकी
ध्वस्त	निरास किए	प्रपद्ये	शरण हूँ ॥४॥

मर्त्यावतारस्त्विह मर्त्यशिक्षणं
रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्याद्रमतः स्व आत्मनः
सीताकृतानि व्यसनानीश्वरस्य ॥५॥

मर्त्य अवतारः तु इह मर्त्यशिक्षणं रक्षः वधाय एव न केवलं विभोः कुतः अन्यथा स्यात् रमतः स्व आत्मनः सीताकृतानि व्यसनानि ईश्वरस्य ॥५॥

विभोः	सर्वव्यापकका	मर्त्यशिक्षणं	मनुष्योंको शिक्षा
इह	इस पृथ्वीपर		देनेके लिए हुआ।
मर्त्य अवतारः	मनुष्यावतार	केवलं	केवल
तु	तो		

रक्षः वधाय एव	राक्षसोंको मारनेके लिए ही
न	नहीं हुआ,
अन्यथा	नहीं तो
स्व आत्मनः	अपने आत्मामें ही
रमतः	रमण करते हुए
सीताकृतानि	सीताजीके द्वारा (उनके वियोगमें)
व्यसनानि	दुःख
ईश्वरस्य	सर्वेश्वरको
कुतः	कहांसे होंगे ॥५॥

न वै स आत्माऽऽत्मवतां सुहृत्तमः
सक्तस्त्रिलोक्यां भगवान् वासुदेवः ।
न स्त्रीकृतं कश्मलमश्नुवीत
न लक्ष्मणं चापि विहातुमर्हति ॥६॥

न वै स आत्मा आत्मवतां सुहृत्तमः सक्तः त्रिलोक्यां भगवान् वासुदेवः न स्त्रीकृतं कश्मलं अश्नुवीत न लक्ष्मणं च अपि विहातुं अर्हति ॥६॥

स वै	वे निश्चय ही
आत्मवतां	धीर-पुरुषोंके
आत्मा	आत्मा (तथा)
सुहृत्तमः	परम-सुहृद
भगवान्	भगवान्
वासुदेवः	वासुदेव
त्रिलोक्यां	त्रिलोकीमें (कहीं भी)
सक्तः न	आसक्त नहीं होते
	(अतः)
स्त्रीकृतं	पत्नीके लिए
कश्मलं	कष्ट
न अश्नुवीत	नहीं पा सकते
च लक्ष्मणं	और लक्ष्मणको
अपि	भी
विहातुं	त्याग
न अर्हति	नहीं सकते ॥६॥

न जन्म नूनं महतो न सौभगं
न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः ।
तैर्यद्विसृष्टानपि नो वनौकस-
श्चकार सख्ये बत लक्ष्मणाग्रजः ॥७॥

न जन्म नूनं महतः न सौभगं न वाङ् न बुद्धिः न आकृतिः तोष हेतुः तैः यत् विसृष्टान् अपि नः वनौकसः चकार सख्ये बत लक्ष्मण अग्रजः ॥७॥

तोष हेतुः	(आपको) सन्तुष्ट करनेका कारण	**यत्**	क्योंकि
नूनं	निश्चय	**तैः**	इन
महतः जन्म न	उत्तम कुलमें जन्म नहीं,	**विसृष्टान्**	सबसे रहित होनेपर
सौभगं न	सुन्दरता नहीं,	**अपि**	भी
वाङ् न	बोलनेकी चतुराई नहीं,	**नः वनौकसः**	हम वन-वासियोंसे
बुद्धिः न	बुद्धिमानो नहीं	**लक्ष्मण अग्रजः**	लक्ष्मणजी के बड़े भाईने
आकृतिः न	आकृति नहीं होती	**बत**	अहो,
		सख्ये चकार	मित्रता की ॥७॥

सुरोऽसुरो वाप्यथ वानरो नरः
सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं
य उत्तराननयत्कोसलान्दिवमिति ॥८॥

सुरः असुरः वा अपि अथ वानरः नरः सर्वात्मना यः सुकृतज्ञं उत्तमं भजेत रामं मनुज आकृतिं हरिं यः उत्तरान् अनयत् कोसलान् दिवं इति ॥८॥

सुरः	देवता हो	**भजेत**	भजन करे
वा असुरः	या असुर,	**मनुज**	(वे) मनुष्य
वानरः	वानर हो	**आकृतिं**	रूपमें
अथ नरः	या मनुष्य	**हरिं**	श्रीहरि हैं
अपि यः	कोई भी जो	**यः उत्तरान्**	जो उत्तरी
सर्वात्मना	सम्पूर्ण हृदयसे	**कोसलान्**	कोसल (अयोध्या) वासियोंको
उत्तमं	सर्वश्रेष्ठ		
सुकृतज्ञं	अत्यन्त कृतज्ञ	**दिवं अनयत्**	अपने धाम ले गये,
रामं	श्रीरामका	**इति**	इस प्रकार ॥८॥

श्रीशुक उवाच-*

भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलम्भनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ॥९॥

भारते अपि वर्षे भगवान् नर नारायण आख्य आकल्पान्तं उपचित धर्म ज्ञान वैराग्य ऐश्वर्य उपशमः परमात्म उपलम्भनं अनुग्रहाय आत्मवतां अनुकम्पया तपः अव्यक्त गतिः चरति ॥९॥

भारते वर्षे अपि	भारत वर्षमें भी	धर्म ज्ञान	धर्म, ज्ञान,
नर	नर	वैराग्य	वैराग्य
नारायण आख्य	नारायण नामसे	ऐश्वर्य	ऐश्वर्य,
भगवान्	भगवान्	उपशमः	शान्ति (तथा)
अनुग्रहाय	दयावश	परमात्म	परमात्माको
आत्मवतां	संयमी पुरुषोंपर	उपलम्भनं	प्राप्त कराने वाला
अनुकम्पया	कृपा करके	तपः	तप
आकल्पान्तं	कल्पके प्रारम्भसे अन्त तक	अव्यक्त गतिः	अव्यक्त रहकर
		चरति	करते हैं ॥९॥

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥१०॥

तं भगवान् नारदः वर्ण आश्रमवतीभिः भारतीभिः प्रजाभिः भगवत् प्रोक्ताभ्यां सांख्य योगाभ्यां भगवत् अनुभाव उपवर्णनं सावर्णेः उपदेक्ष्यमाणः परमभक्ति भावेन उपसरति इदं च अभिगृणाति ॥१०॥

* यह उवाच अन्य प्रतियोंमें नहीं है ।

भगवान् नारदः	भगवान् नारद
भगवत्	(स्वयं) भगवान्के द्वारा
प्रोक्ताभ्यां	उपदिष्ट
सांख्य योगाभ्यां	सांख्य और योग-शास्त्र सहित
भगवत्	भगवान्के
अनुभाव	प्रभावका
उपवर्णनं	वर्णन (करनेवाले पाञ्चरात्र) का
सावर्णेः	(आगामी मनु) सावर्णिको
उपदेक्ष्यमाणः	उपदेश करते हुए
वर्ण आश्रम-वतीभिः	वर्ण-आश्रम धर्मका पालन करनेवाली
भारतीभिः	भारतीय
प्रजाभिः	प्रजाके साथ
परमभक्ति	परमभक्ति
भावेन	भावसे
तं उपसरति	उन (नर-नारायण) के समीप जाकर
इदं च	यह (जप) करते
अभिगृणाति	और गाते हैं ॥१०॥

नारद उवाच■

ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिञ्चनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥११॥

ॐ नमः भगवते उपशम शीलाय उपरत अनात्म्याय नमः अकिञ्चन वित्ताय ऋषिऋषभाय नरनारायणाय परमहंस परमगुरवे आत्माराम अधिपतये नमो नमः इति ॥११॥

ॐ भगवते	ॐ स्वरूप भगवान्
उपशम शीलाय	शान्त स्वरूपको
नमः	नमस्कार
उपरत	अनात्म
अनात्म्याय	पदार्थोंसे विरक्त
अकिञ्चन	निर्धनोंके
वित्ताय नमः	परम-धनको नमस्कार
ऋषिऋषभाय	ऋषिश्रेष्ठ
परमहंस	परमहंसोंके
परमगुरवे	परमगुरु
आत्माराम	आत्मारामोंके
अधिपतये	अधीश्वर
नरनारायणाय	नर-नारायणको
नमो नमः	बार-बार नमस्कार ॥११॥

■ यह उवाच अन्य प्रतियोंमें नहीं है।

गायति चेवम्—

गायति च इदं•

यह । गायति च गाते भी हैं

इदं
कर्तास्य सर्गादिषु यो न बध्यते
न हन्यते देहगतोऽपि दैहिकैः ।
द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते
तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥१२॥

कर्ता अस्य सर्गादिषु यः न बध्यते न हन्यते देहगतः अपि दैहिकैः द्रष्टुः न दृक् यस्य गुणैः विदूष्यते तस्मै नमः असक्त विविक्त साक्षिणे ॥१२॥

अस्य सर्गादिषु	इस संसारकी सृष्टि आदिके	यस्य द्रष्टुः	जिस द्रष्टाकी
कर्ता	कर्ता होनेपर भी	द्रक् गुणैः	दृष्टि गुणोंसे
यः न बध्यते	जो (कर्म) बन्धनमें नहीं पड़ते,	विदूष्यते न	दूषित नहीं होती,
देहगतः अपि	शरीरोंमें रहनेपर भी	तस्मै	उन
दैहिकैः	शरीरके धर्म (भूख-प्यासादि) से	असक्त	अनासक्त
हन्यते न	पीड़ित नहीं होते,	विविक्त साक्षिणे	विशुद्ध साक्षी स्वरूपको
		नमः	नमस्कार ॥१२॥

इदं हि योगेश्वर योगनैपुणं
हिरण्यगर्भो भगवाञ्जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो
भक्त्या दधीतोज्झितदुष्कलेवरः ॥१३॥

• यह वाक्य श्रीशुकदेवजीका है; किन्तु इतने अंशके लिए उवाच पृथक करना उपयुक्त नहीं लगता ।

इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भः भगवान् जगाद यत् यत् अन्तकाले त्वयि निर्गुणे मनः भक्त्या दधीत उज्झित दुष्कलेवरः ॥१३॥

योगेश्वर	योगेश्वर !	यत् अन्तकाले	जो अन्त (मरने) के समय
इदं हि	यही	उज्झित	देहाभिमान
योगनैपुणं	योग साधनकी निपुणता हैं	दुष्कलेवरः	त्यागकर
यत्	जिसे	भक्त्या	भक्तिसे
भगवान्	भगवान्	त्वयि निर्गुणे	आप निर्गुणमें
हिरण्यगर्भः	ब्रह्माने	मनः दधीत	मन लगावे ॥१३॥
जगाद	बतलाया है		

यथैहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्ययाद्
यस्तस्य यत्नः श्रम एव केवलम् ॥१४॥

यथा ऐहिक अमुष्मिक कामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् शङ्केत विद्वान् कुकलेवर अत्ययात् यः तस्य यत्नः श्रम एव केवलम् ॥१४॥

यथा	जैसे	विद्वान्	(वैसे ही) विद्वान् (यदि)
ऐहिक	लौकिक,	कुकलेवर	(इस) निन्दित शरीरकी
अमुष्मिक	पारलौकिक	अत्ययात्	मरणकी
कामलम्पटः	भोगेच्छु	शङ्केत	चिन्ता करे तो
सुतेषु दारेषु	पुत्र-स्त्री	तस्य यः यत्नः	उसका जो साधन है
धनेषु	धनकी	केवलं श्रम एव	केवल परिश्रम ही (व्यर्थ) है ॥१४॥
चिन्तयन्	चिन्ता करता रहता है		

तन्नः प्रभो त्वं कुकलेवरार्पितां
त्वन्माययाहंममतामधोक्षज ।

भिन्द्याम येनाशु वयं सुदुर्भिदां
विधेहि योगं त्वयि नः स्वभावमिति ॥१५॥

तत् नः प्रभो त्वं कुकलेवर अर्पितां त्वत् मायया अहं ममतां अधोक्षज भिन्द्याम येन आशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावम् इति ॥१५॥

अधोक्षज	अधोक्षज !
प्रभो	प्रभो !
तत्	अतः
त्वत् मायया	आपकी मायासे
कुकलेवर	इस निन्दित शरीरमें
अर्पितां	लगायी
नः	हमारी
अहं ममतां	अहंता-ममताको
सुदुर्भिदां	बहुत कठिनाईसे कटनेवाली
येन	(गांठको) जिससे
वयं आशु	हम शीघ्र
भिन्द्याम	काट सकें (वह)
त्वयि योगं	आपमें लगे रहें
इति	ऐसा
नः स्वभावं	हमारा स्वभाव
विधेहि	बना दीजिये ॥१५॥

श्रीशुक उवाच-*

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याताः ॥१६॥

---

* यह उवाच अन्य प्रतियोंमें नहीं है ।

भारते अपि अस्मिन् वर्षे सरित् शैलाः सन्ति बह्वः मलयः मङ्गलप्रस्थः मैनाकः त्रिकूट ऋषभः कूटकः कोल्लकः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः वेङ्कटः महेन्द्रः वारिधारः विन्ध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्धनः रैवतकः ककुभः नीलः गोकामुखः इन्द्रकीलः कामगिरिः इति च अन्ये च शतसहस्रशः शैलाः तेषां नितम्बप्रभवा नदा नद्यः च सन्ति असङ्ख्याताः ॥१६॥

अस्मिन्	इस
भारते वर्षे अपि	भारतवर्षमें भी
सरित् शैलाः	नदियाँ और पर्वत
बह्वः सन्ति	बहुतसे हैं (जैसे)
मलयः	मलय,
मङ्गलप्रस्थः	मङ्गलप्रस्थ,
मैनाकः	मैनाक,
त्रिकूटः	त्रिकूट,
ऋषभः	ऋषभ,
कूटकः	कूटक,
कोल्लकः	कोल्लक,
सह्यः	सह्य,
देवगिरिः	देवगिरि,
ऋष्यमूकः	ऋष्यमूक
श्रीशैलः	श्रीशैल,
वेङ्कटः	वेङ्कट,
महेन्द्रः	महेन्द्र,
वारिधारः	वारिधार,
विन्ध्यः	विन्ध्य,
शुक्तिमान्	शुक्तिमान,
ऋक्षगिरिः	ऋक्षगिरि,
पारियात्रः	परियात्र,
द्रोणः	द्रोण,
चित्रकूटः	चित्रकूट,
गोवर्धनः	गोवर्धन,
रैवतकः	रैवतक,
ककुभः नीलः	ककुभ, नील,
गोकामुखः	गोकामुख,
इन्द्रकीलः	इन्द्रकील,
कामगिरिः	कामगिरि
इति	इसप्रकार (ये)
च अन्ये	और दूसरे
शतसहस्रशः	सैकड़ों-हजारों
शैलाः	पर्वत हैं।
तेषां	उनके
नितम्बप्रभवा	मध्यभागसे निकलनेवाली
नदा नद्यः च	नद और नदियां भी
असंख्याताः	असंख्य
सन्ति	हैं ॥१६॥■

■ पर्वतोंके तथा नदियोंके भी वर्तमान नाम तथा स्थानका पता भूगोलके विद्वानोंके शोधका विषय है। इनमें अनेक लुप्त हो गये हो सकते हैं।

एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ।।१७।।

एतासां अपः भारत्यः प्रजा नामभिः एव पुनन्तीनां आत्मना च उपस्पृशन्ति ।।१७।।

नामभिः	(केवल) नामसे	भारत्यः प्रजा	भारतीय प्रजा
एव	ही	आत्मना च	शरीरसे भी
पुनन्तीनां	पवित्रकर देनेवाली	उपस्पृशन्ति	स्पर्श करती है ।।१७।।
एतासां	इनके		
अपः	जल		

चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धा शोणश्च नदौ महानदी वेदस्मृतिरृषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिन्की विश्वेति महानद्यः ।।१८।।

चन्द्रवसा, ताम्रपर्णी, अवटोदा, कृतमाला, वैहायसी, कावेरी, वेणी, पयस्विनी, शर्करावर्ता, तुङ्गभद्रा, कृष्णा, वेण्या, भीमरथी, गोदावरी, निर्विन्ध्या, पयोष्णी, तापी, रेवा, सुरसा, नर्मदा, चर्मण्वती, सिन्धुः अन्धः, शोणः च नदौ (ये नद हैं।) महानदी, वेदस्मृतिः, ऋषिकुल्या, त्रिसामा, कौशिकी, मन्दाकिनी, यमुना, सरस्वती, दृषद्वती, गोमती, सरयू, रोधस्वती, सप्तस्वती, सुषोमा, शतद्रूः चन्द्रभागा, मरुद्वृधा, वितस्ता, असिन्की, विश्वा, इति महानद्यः ।।१८।।

इति महानद्यः ये महानदियाँ हैं ।।१८।।

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथावर्णविधानमपवर्गश्चापि भवति ॥१९॥

अस्मिन् एव वर्षे पुरुषैः लब्ध जन्मभिः शुक्ललोहित कृष्ण वर्णेन स्व आरब्धेन कर्मणा दिव्य मानुष नारक गतयः बह्व्य आत्मन आनुपूर्व्येण सर्वा हि एव सर्वेषां विधीयन्ते यथा वर्ण विधानं अपवर्गः च अपि भवति ॥१९॥

अस्मिन् एव वर्षे	इस वर्षमें ही	**आत्मन**	अपने
लब्ध जन्मभिः	जन्म लेने वाले	**आनुपूर्व्येण**	क्रमानुसार
पुरुषैः	पुरुषोंको	**सर्वा हि एव**	सभी ही (गतियां)
स्व आरब्धेन	अपने किये हुये	**सर्वेषां**	सबकी
शुक्ललोहित	सात्त्विक, राजस,	**विधीयन्ते**	होती हैं।
कृष्ण	तामस	**च यथा वर्णं**	और अपने वर्णके
कर्मणा	कर्मोंके अनुसार	**विधानं**	अनुसार (धर्माचरण
दिव्य मानुष	देवता, मनुष्य		करनेसे)
नारक	और नारकीय	**अपवर्गः**	मोक्ष
बह्व्य गतयः	बहुत-सी गतियां	**अपि भवति**	भी होता है ॥१९॥

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः ॥२०॥

यः असौ भगवति सर्वभूत आत्मनि अनात्म्ये अनिरुक्ते अनिलयने परमात्मनि वासुदेवे अनन्य निमित्त भक्तियोग लक्षणः नानागति निमित्त अविद्या ग्रन्थि रन्धन द्वारेण यदा हि महापुरुष पुरुष प्रसङ्गः ॥२०

यः असौ	जो यह (मोक्ष है वह)
सर्वभूत	समस्त प्राणियोंके
आत्मनि	आत्मा
अनात्म्ये	सर्वदोष रहित,
अनिरुक्ते	अनिर्वचनीय,
अनिलयने	निराधार,
परमात्मनि	परमात्मा
वासुदेवे	वासुदेवमें
अनन्य निमित्त	अनन्य निष्काम भावसे
भक्तियोग लक्षणः	भक्ति-योग स्वरूप ही है।

नानागति	नाना गतियोंके
निमित्त	कारण
अविद्या ग्रन्थि	अविद्या ग्रन्थिको
रन्धन द्वारेण	भस्म कर देनेके मार्गसे (प्राप्त होती है)
हि यदा	क्योंकि जब
महापुरुष पुरुष	पुरुषोत्तम भगवान्‌के भक्तोंका
प्रसङ्गः	सङ्ग मिलता है (तब वह भक्ति प्राप्त होती है) ॥२०

एतदेव हि देवा गायन्ति—

एतत् एव हि देवा गायन्ति—

देवा	देवता
हि	इसीलिए
एतत् एव	इसी प्रकार
गायन्ति	गाते हैं।

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि नः ॥२१॥

अहो अमीषां किं अकारि शोभनं प्रसन्न येषां स्वित् उत स्वयं हरिः यैः जन्म लब्धं नृषु भारत अजिरे मुकुन्दसेवा उपयिकं स्पृहा हि नः ॥२१॥

अहो अमीषां	अहो, इन लोगोंने
किं शोभनं	क्या पुण्य
अकारि	किया है
उत स्वित	अथवा तो
येषां स्वयं हरिः	जिनपर स्वयं श्रीहरि
प्रसन्न	प्रसन्न हैं,
यैः	जिससे

मुकुन्दसेवा	श्रीमुकुन्दकी सेवाके	जन्म लब्धं	जन्म पाया,
उपयिकं	उपयुक्त	हि नः स्पृहा	क्योंकि हम भी (इस सौभाग्यकी) स्पृहा करते हैं ॥२१॥
भारत अजिरे	भारतवर्षके आंगनमें		
नृषु	मनुष्य-योनिमें		

किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कज-
स्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात् ॥२२॥

किं दुष्करैः नः क्रतुभिः तपः व्रतैः दानादिभिः वा द्युजयेन फल्गुना न यत्र नारायण पादपङ्कज स्मृतिः प्रमुष्टा अतिशय इन्द्रिय उत्सवात् ॥२२॥

नः	हमारे	नारायण	श्रीनारायणके
फल्गुना	तुच्छ	पादपङ्कज	चरण-कमलकी
द्युजयेन	स्वर्गदायी	स्मृतिः	स्मृति
दुष्करैः	कठिनाईसे किये गये	अतिशय	बहुत अधिक
क्रतुभिः	यज्ञोंसे,	इन्द्रिय	ऐन्द्रियक
तपः व्रतैः	तपस्यासे, व्रतसे,	उत्सवात्	भोग भोगनेसे
वा दानादिभिः	अथवा दानादिसे,	प्रमुष्टा	छिन गयी,
किं	क्या लाभ	न	नहीं रही ॥२२॥
यत्र	जहां		

कल्पायुषां स्थानजयात्पुनर्भवात्
क्षणायुषां भारतभूजयो वरम् ।
क्षणेन मर्त्येन कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः ॥२३॥

कल्प आयुषां स्थान जयात् पुनर्भवात् क्षण आयुषां भारत भूजयः वरं क्षणेन मर्त्येन कृतं मनस्विनः सन्यस्य संयाति अभयं पदं हरेः ॥२३॥

आयुषां	कल्प पर्यन्त आयु वालोंके	मनस्विनः	मनस्वी
नजयात्	स्थान (ब्रह्मलोक) पानेसे,	मर्त्येन	मनुष्य
पुनर्भवात्	जहाँसे फिर जन्म लेना पड़ता है	क्षणेन	एक क्षणमें
आयुषां	क्षण जीवियोंकी	कृतं संन्यस्य	अपने सब कर्म (भगवत्) अर्पित करके
भारतभूजयः	भारत भूमि पाना श्रेष्ठ है (क्योंकि)	हरेः अभयं पदं	श्रीहरिके अभय पदको
रं		संयान्ति	पहुँच जाते हैं ॥२३॥

न यत्र वैकुण्ठकथासुधापगा
न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः ।
सुरेशलोकोऽपि न वै स सेव्यताम् ॥२४॥

न यत्र वैकुण्ठ कथा सुधा आपगा न साधवः भागवताः तत् आश्रयाः
न यत्र यज्ञेश मखा महोत्सवाः सुरेश लोकः अपि न वै स सेव्यताम् ॥२४॥

यत्र	जहाँ	यत्र यज्ञेश	जहाँ यज्ञेश भगवान्के
वैकुण्ठ कथा	भगवान् वैकुण्ठनाथ की कथा रूपी	मखाः	यज्ञोंका
सुधा आपगा न	अमृत-सरिता नहीं है,	महोत्सवाः	महोत्सव
		न	नहीं होता
तत् आश्रयाः	उनकी ही शरणमें रहने वाले	स वै	वह निश्चय
		सुरेशः लोकः	इन्द्रलोक हो तो
भागवताः	भगवद्-भक्त	अपि	भी
साधवः न	साधु नहीं है,	न सेव्यतां	(उसका) सेवन मत करे ॥२४॥

प्राप्ता नृजातिं त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम् ।

न वै यतेरन्नपुनर्भवाय ते
भूयो वनौका इव यान्ति बन्धनम् ॥२५॥

प्राप्ता नृजातिं तु इह ये च जन्तवः ज्ञान क्रिया द्रव्य कलाप सम्भृतां न वै यतेरन् अपुनर्भवाय ते भूयः वनौका इव यान्ति बन्धनम् ॥२५॥

इह तु ये	इस भारतमें हो जो	**अपुनर्भवाय**	मोक्षके लिए
जन्तवः	प्राणी	**न च यतेरन्**	प्रयत्न नहीं ही करते
ज्ञान क्रिया	ज्ञान (बुद्धि) कर्म	**ते भूयः**	वे फिरसे
द्रव्य कलाप	पदार्थादि सामग्रीसे	**वनौका इव**	जंगली-पशु-पक्षियोंके समान
सम्भृतां	सम्पन्न		
नृजातिं प्राप्ता	मनुष्य-जन्म पाकर	**बन्धनं यान्ति**	बन्धनमें पड़ते हैं ॥२५॥
वै	निश्चित रूपसे		

यैः श्रद्धया बर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।
एकः पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥२६॥

यैः श्रद्धया बर्हिषि भागशः हविः निरुप्तम् इष्टं विधि मन्त्र वस्तुतः एकः पृथङ् नामभिः आहुतः मुदा गृह्णाति पूर्णः स्वयं आशिषां प्रभुः ॥२६॥

यैः	जिन (भारत वासियों) के द्वारा	**मन्त्र वस्तुतः**	मन्त्र, पदार्थ पूर्वक
		निरुप्तं आहुतः	निरूपित करके आहुति देनेपर
श्रद्धया	श्रद्धापूर्वक		
पृथङ् नामभिः	(इन्द्रादि) अलग-अलग नामोंसे	**एकः पूर्णः**	एक परिपूर्ण
		स्वयं आशिषां	स्वयं सब कामनाओंके
बर्हिषि	यज्ञमें	**प्रभुः**	स्वामी (प्रदाता)
भागशः हविः	विभाग पूर्वक हवि	**मुदा**	प्रसन्नता पूर्वक
इष्टं विधि	देवता, विधि,	**गृह्णाति**	ग्रहण करते हैं ॥२६॥

सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत्पुनरर्थिता यतः ।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ।।२७।।

सत्यं दिशति अर्थितं अर्थितः नृणां न एव अर्थदः यत् पुनः अर्थिता
यतः स्वयं विधत्ते भजतां अनिच्छतां इच्छापिधानं निज पादपल्लवम् ।।२७।।

सत्यं	यह सच है कि		जाता है (अतः)
नृणां अर्थितः	मनुष्योंके चाहनेसे	**स्वयं**	भगवान् स्वयं
अर्थितं	उनके चाहे पदार्थ	**इच्छापिधानं**	इच्छाओंको बन्द
न दिशति	(भगवान्) नहीं देते		कर देनेवाले
अर्थदः	भोग-पदार्थ देने	**निज**	अपने
	वाले (वे)	**पादपल्लवं**	चरण-पल्लव
न एव	नहीं ही हैं।	**भजतां**	भजन करनेवालेको
यतः	क्योंकि (पानेवाला)	**अनिच्छतां**	न चाहनेपर भी
पुनः अर्थिता	फिर मंगन ही रह	**विधत्ते**	प्रदान करते हैं ।।२७

यद्यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्
वर्षे हरिर्यद्भजतां शं तनोति ।।२८।।

यत् अत्र नः स्वर्गसुख अवशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं
तेन अजनाभे स्मृतिमत् जन्म नः स्यात् वर्षे हरिः यत् भजतां शं तनोति ।।२८

अत्र नः	यहाँ हमारा	**कृतस्य**	कर्मोंका
स्वर्गसुख	स्वर्ग-सुख (भोगनेसे)	**शोभनं**	पुण्य
यत् स्विष्टस्य	जो (पूर्वकृत)	**अवशेषितं**	बचा हो
	यज्ञका	**तेन**	उस (के फल) से
सूक्तस्य	प्रवचनका,	**अजनाभे**	अजनाभ (भारत) में

नः स्मृतिमत्	हमारा (भगवान्‌की) स्मृति युक्त	**भजतां**	भजन करनेवालों को
जन्म स्यात्	जन्म हो,	**यत्**	जो
वर्षे	जिस वर्षमें	**हरिः शं तनोति**	श्रीहरि कल्याण करते हैं ॥२८॥

श्रीशुक उवाच–

जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥२९॥

जम्बूद्वीपस्य च राजन् उपद्वीपान् अष्टौ ह एक उपदिशन्ति सगर आत्मजैः अश्व अन्वेषण इमां महीं परितः निखनत्‌भिः उपकल्पितान् ॥२९॥

राजन्	परीक्षित् !	**निखनत्‌भिः**	खोदते समय
सगर आत्मजैः	राजा सागरके पुत्रों द्वारा	**उपकल्पितान्**	बनाये गये
अश्व अन्वेषण	(यज्ञीय) अश्वके ढूंढनेमें	**जम्बूद्वीपस्य**	जम्बूद्वीपके
इमां महीं	इस पृथ्वीको	**ह एक**	निश्चित कोई
परितः	चारों ओरसे	**अष्टौ उपद्वीपान्**	आठ उपद्वीप
		उपदिशन्ति	बतलाते हैं ॥२९॥

तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥३०॥

तत् यथा स्वर्णप्रस्थः चन्द्रशुक्लः आवर्तनः रमणकः मन्दरहरिणः पाञ्चजन्यः सिंहलः लङ्का इति ॥३०॥

तत् यथा	वे जैसे कि	**मन्दरहरिणः**	मन्दरहरिण,
स्वर्णप्रस्थः	स्वर्णप्रस्थ	**पाञ्चजन्यः**	पाञ्चजन्य
चन्द्रशुक्लः	चन्द्रशुक्ल,	**सिंहलः**	सिंहल
आवर्तनः	आवर्तन,	**लङ्का इति**	लङ्का, इस प्रकार हैं ॥३०॥
रमणकः	रमणक,		

एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो यथोपदेश-मुपवर्णित इति ॥३१॥

एवं तव भारत उत्तम जम्बूद्वीप वर्षविभागः यथा उपदेशं उपवर्णित इति ॥३१॥

भारत उत्तम	भरतवंशमें श्रेष्ठ परीक्षित !	जम्बूद्वीप	जम्बूद्वीपके
एवं तव	इस प्रकार तुमसे	वर्षविभागः	वर्षोंका विभाग
यथा उपदेशं	गुरु-मुखसे जैसा सुना था वैसा	उपवर्णित इति	वर्णन कर दिया है ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे जम्बूद्वीपवर्णनं नामैएकोनविंशोऽध्यायः ॥ ३१ ॥

अथ विंशोऽध्यायः

श्रीशुक उवाच-

अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ।।१।।

अतः परं प्लक्ष आदीनां प्रमाण लक्षण संस्थानतः वर्ष विभाग उपवर्ण्यते ।।१।।

अतः परं	इसके पश्चात्	संस्थानतः	स्थितिके अनुसार
प्लक्ष आदीनां	प्लक्ष आदि द्वीपोंका	वर्षविभाग	वर्ष-विभाग
प्रमाण	परिमाण	उपवर्ण्यते	वर्णन किया जा रहा है ।।१।।
लक्षण	चिह्न		

जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन। प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ।।२।।

जम्बूद्वीपः अयं यावत् प्रमाण विस्तारः तावता क्षार उदधिना परिवेष्टितः यथा मेरुः जम्बू आख्येन लवण उदधिः अपि ततः द्विगुण विशालेन प्लक्ष आख्येन परिक्षिप्तः यथा परिखा बाह्य उपवनेन। प्लक्षः जम्बू प्रमाणः द्वीप आख्यकरः हिरण्मय उत्थितः यत्र अग्निः उपास्ते सप्तजिह्वः तस्य अधिपतिः प्रियव्रत आत्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्त वर्षनामभ्यः आत्मजेभ्यः आकलय्य स्वयं आत्मयोगेन उपरराम ।।२।।

अयं जम्बूद्वीपः — यह जम्बूद्वीप
यावत् प्रमाण — जितने परिमाणमें
विस्तारः — विस्तृत है
तावता — उतने ही बड़े
क्षार उदधिना — खारे समुद्रसे
परिवेष्टितः — चारों ओरसे घिरा है,
यथा मेरुः — जैसे सुमेरु
जम्बू आख्येन — जम्बू नामके द्वीपसे
लवण उदधिः — क्षार-समुद्र
अपि — भी
ततः — उस (समुद्र) से
द्विगुण विशालेन — दुगुने बड़े
प्लक्ष आख्येन — प्लक्ष नाम वाले (द्वीप) से
परिक्षिप्तः — चारों ओरसे घिरा है,
यथा परिखा — जैसे परकोटा
बाह्य उपवनेन — बाहरी बगीचेसे (घिरा होता है)
द्वीप आख्यकरः — उस द्वीपके नामका कारण,
हिरण्मय — स्वर्णमय
उत्थितः — और ऊँचा
प्लक्षः जम्बू-प्रमाणः — (जम्बूद्वीप वाले) जामुनके पेड़के बराबर वहां पाकड़ का पेड़ है।
यत्र सप्तजिह्वः — जहां सात जिह्वा वाले
अग्निः उपास्ते — अग्निकी उपासना होती है।
तस्य अधिपतिः — उस (द्वीप) के स्वामी
प्रियव्रत आत्मज — प्रियव्रतके पुत्र
इध्मजिह्वः — इध्मजिह्वने
स्वं द्वीपं — अपने (इस) द्वीपको
सप्त वर्षाणि — सात वर्षों (देशों) में
विभज्य — बांटकर
वर्षनामभ्यः — उन वर्षोंके ही नाम वाले
सप्त आत्मजेभ्य — अपने सात पुत्रोंको
आकलय्य — सौंपकर
स्वयं — स्वयं
आत्मयोगेन — आत्मयोगके द्वारा
उपरराम — उपरत हो गये ॥२॥

शिवं यवसं सुभद्रं शान्तं क्षेमममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥३॥

शिवं यवसं सुभद्रं शान्तं क्षेमं अमृतं अभयं इति वर्षाणि तेषु गिरयः नद्यः च सप्त एव अभिज्ञाताः ॥३॥

शिवं यवसं	शिव, यवस,	तेषु गिरयः	उनमें पर्वत
सुभद्रं शान्तं	सुभद्र, शान्त,	च नद्यः	और नदियां
क्षेमं अमृतं	क्षेम, अमृत,	सप्त एव	सात-सात ही
अभयं	अभय	अभिज्ञाताः	प्रसिद्ध हैं ॥३॥
इति वर्षाणि	इस नामके वर्ष (देश) हैं।		

मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा इति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते ॥४॥

मणिकूटः वज्रकूटः इन्द्रसेनः ज्योतिष्मान् सुपर्णः हिरण्यष्ठीवः मेघमाल इति सेतुशैलाः। अरुणा नृम्णा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा इति महानद्यः यासां जल उपस्पर्शन विधूत रजः तमसः हंस पतङ्ग ऊर्ध्वायन सत्याङ्ग संज्ञाः चत्वारः वर्णाः सहस्र आयुषः विबुध उपम सन्दर्शन प्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यं आत्मानं यजन्ते ॥४॥

मणिकूटः	मणिकूट,	सावित्री	सावित्री,
वज्रकूटः	वज्रकूट,	सुप्रभाता	सुप्रभाता,
इन्द्रसेनः	इन्द्रसेन,	ऋतम्भरा	ऋतम्भरा,
ज्योतिष्मान्	ज्योतिष्मान्	सत्यम्भरा	सत्यम्भरा,
सुपर्णः	सुपर्ण,	इति महानद्यः	इस प्रकार (ये सात) महानदियां हैं।
हिरण्यष्ठीवः	हिरण्यष्ठीव,		
मेघमाल इति	मेघमाल, इस प्रकार	यासां जल	जिनके जलमें
सेतुशैलाः	(सात) मर्यादा गिरि हैं।	उपस्पर्शन	स्नान करनेसे
		विधूत रजः	धुले रजोगुण,
अरुणा नृम्णा	अरुणा, नृम्णा,	तमसः	तमोगुण
आङ्गिरसी	आङ्गिरसी,	हंस पतङ्ग	हंस, पतङ्ग,

ऊर्ध्वायन	ऊर्ध्वायन,
सत्याङ्ग संज्ञाः	सत्याङ्ग नामवाले
चत्वारः वर्णाः	चारों वर्णोंके लोग
सहस्र	एक हजार वर्षकी
आयुषः	आयुवाले,
विबुध उपम	देवताओंके समान
सन्दर्शन	रूपवाले (तथा उन्हींके समान)
प्रजननाः	सन्तान उत्पन्न करनेवाले
त्रय्या विद्यया	त्रयी (कर्म, ज्ञान, उपासनारूप वेद) विद्या द्वारा
स्वर्गद्वारं	स्वर्गके द्वार भूत
आत्मानं	आत्मस्वरूप
भगवन्तं सूर्यं	भगवान सूर्यको
यजन्ते	उपासना करते हैं ।।४।।

प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः ।
अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ।।५।।

प्रत्नस्य विष्णोः रूपं यत् सत्यस्य ऋतस्य ब्रह्मणः अमृतस्य च मृत्योः च सूर्यं आत्मानं ईमहि इति ।।५।।

इति	इस प्रकार (वे स्तुति करते हैं)
यत् प्रत्नस्य	जो पुराण-पुरुष
विष्णोः	भगवान् विष्णुके,
सत्यस्य	सत्य अनुष्ठान योग्य धर्म) के
ऋतस्य	ऋत (प्रतीत होने वाले धर्म) के,
अमृतस्य	अमरत्व (मोक्ष) के,
च मृत्योः	तथा मृत्युके
ब्रह्मणः	ब्रह्म (ज्योति-स्वरूप) के
रूपं	रूप हैं
आत्मानं सूर्यं	(उन) आत्मस्वरूप सूर्यकी
ईमहि	(हम) शरण हैं ।।५।।

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धि-विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ।।६।।

प्लक्ष आदिषु पञ्चसु पुरुषाणां आयुः इन्द्रियं ओजः सहः बलं बुद्धिः विक्रम इति च सर्वेषां औत्पत्तिकी सिद्धिः अविशेषेण वर्तते ।।६।।

प्लक्ष आदिषु	प्लक्षसे लेकर	ओजः	ओज (मनोबल)
पञ्चसु	पांच (द्वीपों) में	सहः	सह (इन्द्रिय-बल)
सर्वेषां	सभी	बलं	(शरीर) बल,
पुरुषाणां	पुरुषोंको	बुद्धिः	बुद्धि,
औत्पत्तिकी	जन्मसे ही	विक्रम	पराक्रमकी
अविशेषेण	समान रूपसे	सिद्धिः	सिद्धि प्राप्त
आयु इन्द्रिय	आयु, इन्द्रिय,	वर्तते	रहती है ॥६॥

प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शालमलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृंक्ते ॥७॥

प्लक्षः स्वसमानेन इक्षुरस उदेन आवृतः यथा तथा द्वीपः अपि शाल्मलः द्विगुण विशालः समानेन सुरोदेन आवृतः परिवृङ्क्ते ॥७॥

यथा प्लक्षः	जैसे प्लक्ष-द्वीप	विशालः	बड़ा
स्वसमानेन	अपने बराबरके	समानेन	अपने बराबरके
इक्षुरस	गन्नेके रसके	सुरोदेन	मदिरा-सागरसे
उदेन	समुद्रसे	आवृतः	घिरा
आवृतः	घिरा है	परिवृङ्क्ते	(इक्षुरस समुद्रके) चारों ओर स्थित है ॥७॥
तथा शाल्मलः	वैसे ही शाल्मली		
द्वीपः अपि	द्वीप भी		
द्विगुण	उससे दोगुना		

यत्र ह वै शालमली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छन्दःस्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥८॥

यत्र ह वै शालमली प्लक्ष आयामा यस्यां वाव किल निलयं आहुः भगवतः छन्दः स्तुतः पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥८॥

यत्र ह वै	जहाँ तो निश्चय		बराबरका
प्लक्ष आयामा	प्लक्ष वृक्षके	शालमली	सेमरका वृक्ष है।

यस्यां	जिसपर	निलयं आहुः	निवास कहा गया है।
वाव किल	अरे निश्चय ही	सा	वह (शाल्मलिवृक्ष)
भगवतः	भगवान् (विष्णु)की	द्वीपहूतये	द्वीपके नामका हेतु
छन्दः स्तुतः	(अपने पंखोंसे) वेद-मन्त्रोंद्वारा स्तुति करनेवाले	उपलक्ष्यते	दिखायी पड़ता है ॥८॥
पतत्त्रिराजस्य	पक्षिराज (गरुड़)का		

तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥९॥

तत् द्वीप अधिपतिः प्रियव्रत आत्मजः यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यः तत् नामानि सप्तवर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रं आप्यायनं अविज्ञातं इति ॥९॥

तत् द्वीप	उस द्वीपके	सुरोचनं	सुरोचन,
अधिपतिः	स्वामी	सौमनस्यं	सौमनस्य,
प्रियव्रत	प्रियव्रतके	रमणकं	रमणक,
आत्मजः	पुत्र	देववर्षं	देववर्ष,
यज्ञबाहुः	यज्ञबाहुने	पारिभद्रं	पारिभद्र,
स्वसुतेभ्यः	अपने पुत्रोंको	आप्यायनं	आप्यायन,
तत् नामानि	उनके ही नामवाले	अविज्ञातं इति	अविज्ञात इसप्रकार (उनके नाम हैं) ॥९॥
सप्तवर्षाणि	सातवर्ष		
व्यभजत्	बाँट दिये,		

तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृङ्गो वामदेवः कुन्दो मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति । अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥१०॥

तेषु वर्ष अद्रय: नद्य: च सप्त एव अभिज्ञाता: स्वरस: शतशृङ्ग: वामदेव: कुन्द: मुकुन्द: पुष्पवर्ष: सहस्रश्रुति: इति। अनुमति: सिनीवाली सरस्वती कुहू रजनी नन्दा राका इति ॥१०॥

तेषु	उन
वर्ष अद्रय:	वर्षोंमें पर्वत
च नद्य:	तथा नदियां
सप्त एव	सात-सात ही
अभिज्ञाता:	प्रसिद्ध हैं।
स्वरस:	स्वरस,
शतशृङ्ग:	शतशृंग,
वामदेव: कुन्द:	वामदेव, कुन्द,
मुकुन्द:	मुकुन्द,
पुष्पवर्ष:	पुष्पवर्ष,
सहस्रश्रुति:	सहस्रश्रुति
इति	ये (पर्वत) हैं।
अनुमति:	अनुमति,
सिनीवाली	सिनीवाली,
सरस्वती कुहू	सरस्वती, कुहू,
रजनी नन्दा	रजनी, नन्दा,
राका इति	राका ये (नदियां) हैं ॥१०॥

तद्वर्षपुरुषाः श्रुतधरवीर्यंधरवसुन्धरेषन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥११॥

तद् वर्ष पुरुषाः श्रुतधर वीर्यंधर वसुन्धर इषन्धर संज्ञा भगवन्तं वेदमयं सोमं आत्मानं वेदेन यजन्ते ॥११॥

तद्	उस
वर्ष पुरुषा:	वर्षके पुरुष
श्रुतधर	श्रुतधर,
वीर्यंधर	वीर्यंधर,
वसुन्धर	वसुन्धर,
इषन्धर	इषन्धर,
संज्ञा	नामक (चार वर्णके)
भगवन्तं	भगवान्
वेदमयं	वेदमय
आत्मानं	आत्मस्वरूप
सोमं	चन्द्रमाकी
वेदेन यजन्ते	वेदके द्वारा यजन करते हैं ॥११॥

स्वगोभि: पितृदेवेभ्यो विभजन् कृष्णशुक्लयो:।
प्रजानां सर्वासां राजान्धः सोमो न आस्त्विति ॥१२॥

स्वगोभि: पितृदेवेभ्य: विभजन् कृष्णशुक्लयो: प्रजानां सर्वासां राजा अन्धः सोम: न: अस्तु इति ॥१२॥

स्व गोभिः	अपनी किरणों द्वारा	प्रजानां	प्रजाको भी
कृष्णशुक्लयोः	कृष्णपक्ष और शुक्ल पक्षका	अन्धः	अन्न (आहार) देनेवाले,
विभजन्	विभाग करके	सोमः नः	चन्द्रमा हमारे
पितृदेवेभ्यः	पितरों तथा देवताओंको	राजा अस्तु	राजा हों
सर्वासां	सब	इति	इसप्रकार (प्रार्थना करते हैं) ॥१२॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥१३॥

एवं सुरोदात् बहिः तत् द्विगुणः समानेन आवृतः घृतोदेन यथा पूर्वः कुशद्वीपः यस्मिन् कुशस्तम्बः देवकृतः तत् द्वीप आख्याकरः ज्वलन इव अपरः स्वशष्परोचिषा दिशः विराजयति ॥१३॥

एवं	इसी प्रकार	आख्याकरः	नामका कारण
सुरोदात्	मदिरा सागरके	देवकृतः	भगवान्‌का बनाया
बहिः	बाहर	अपरः	दूसरे
तत् द्विगुणः	उससे दुगुना	ज्वलन इव	अग्निके समान
समानेन	अपने बराबरके	कुशस्तम्बः	कुशका खम्भे जैसा (वृक्ष) है,
घृतोदेन	घृत-समुद्रसे		
आवृतः	घिरा हुआ	स्वशष्परोचिषा	अपनी टहनियोंकी कान्तिसे
यथा पूर्वः	पहिलोंके समान		
कुशद्वीपः	कुश-द्वीप है,	दिशः	दिशाओंको
यस्मिन्	जिसमें	विराजयति	शोभित करता है ॥१३॥
तत् द्वीप	उस द्वीपके		

तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत वसु-वसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥१४॥

तत् द्वीपपतिः प्रैयव्रतः राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यः यथाभागं विभज्य स्वयं तप आतिष्ठत वसु वसुदान दृढरुचि नाभिगुप्त स्तुत्यव्रत विविक्त वामदेव नामभ्यः ॥१४॥

राजन्	परीक्षित !
तत् द्वीपपतिः	उस द्वीपके स्वामी
प्रैयव्रतः	प्रियव्रतके पुत्र
हिरण्यरेता	हिरण्यरेता
नाम	नामकने
स्वं द्वीपं	अपने द्वीपको
वसु वसुदान	वसु, वसुदान,
दृढरुचि	दृढरुचि,
नाभिगुप्त	नाभिगुप्त,
स्तुत्यव्रत	स्तुत्यव्रत,
विविक्त	विविक्त
वामदेव	वामदेव,
नामभ्यः	नामवाले
स्वपुत्रेभ्यः	अपने पुत्रोंको
यथाभागं	विभागके अनुसार
विभज्य	बाँटकर
स्वयं	स्वयं
तप आतिष्ठत	तप करने लगे ॥१४॥

तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव चक्रश्चतुःश्रृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति ॥१५॥

तेषां वर्षेषु सीमागिरयः नद्यः च अभिज्ञाताः सप्त सप्त एव चक्रः चतुः शृङ्गः कपिलः चित्रकूटः देवानीक, ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतचयुता मन्त्रमाला इति ॥१५॥

तेषां वर्षेषु	उनके वर्षोंमें
सीमागिरयः	सीमा-पर्वत
च नद्यः	तथा नदियां
सप्त सप्त एव	सात-सात ही
अभिज्ञाताः	प्रसिद्ध हैं,
चक्रः चतुः	चक्र, चतु,
शृङ्गः कपिलः	शृंग, कपिल,
चित्रकूटः	चित्रकूट,
देवानीक	देवानीक,
ऊर्ध्वरोमा	ऊर्ध्वरोम,
द्रविण	द्रविण
इति	ये (सात पर्वत) हैं,
रसकुल्या	रसकुल्या,
मधुकुल्या	मधुकुल्या
मित्रविन्दा	मित्रविन्दा,

श्रुतविन्दा	श्रुतविन्दा	**मंत्र माला इति**	मन्त्रमाला ये (सात नदियां) हैं ॥१५॥
देवगर्भा	देवगर्भा		
घृतच्युता	घृतच्युता,		

यासां पयोभिः कुशद्वीपौकशः कुशलकोविदाभियुक्तकुलक-संज्ञा भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ॥१६॥

यासां पयोभिः कुशद्वीप ओकशः कुशलकोविदाः अभियुक्त कुलक संज्ञा भगवन्तं जातवेदस रूपिणं कर्मकौशलेन यजन्ते ॥१६॥

कुशलकोविदा	कुशल, कोविद,	**जातवेदस**	अग्नि
अभियुक्त कुलक	अभियुक्त, कुलक	**रूपिणं**	स्वरूपकी
संज्ञा	नामके (चार वर्णके)	**कर्मकौशलेन**	(यज्ञादि) कर्म निपुणतासे
कुशद्वीप ओकशः	कुशद्वीपवासी	**यजन्ते**	भजन करते हैं ॥१६
यासां पयोभिः	जिनके जलसे		
भगवन्तं	भगवान्		

परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् ।
देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेति ॥१७॥

परस्य ब्रह्मणः साक्षात् जातवेदः असि हव्यवाट् देवानां पुरुष अङ्गानां यज्ञेन पुरुषं यज इति ॥१७॥

जातवेदः	अग्निदेव (आप)	**देवानां**	देवताओंका (तथा)
साक्षात्	साक्षात्	**पुरुषं**	परमपुरुषका
परस्य ब्रह्मणः	परमब्रह्मको	**यज्ञेन यज**	यज्ञके द्वारा भजन कीजिये,
हव्यवाट्	हवि पहुँचानेवाले		
असि	हो अतः	**इति**	इस प्रकार (स्तुति करते हैं) ॥१७॥
पुरुष	(विराट्) पुरुषके		
अङ्गानां	अंगभूत		

तथा घृतोदाब्दहिः क्रौञ्चदीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वतक आस्ते ॥१८॥

तथा घृतोदात् बहिः क्रौञ्चद्वीपः द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तः वृतः यथा कुशद्वीपः घृतोदेन यस्मिन् क्रौञ्चः नाम पर्वतराजः द्वीपनाम निर्वतक आस्ते ॥१८॥

यथा	जैसे	क्षीरोदेन	क्षीर-समुद्रसे
कुशद्वीपः	कुशद्वीप	परित उपक्लृप्तः	चारों ओरसे
घृतोदेन	घृत-सागरसे (घिरा है)	वृतः	घिरा है
तथा	वैसे ही	यस्मिन्	जिसमें
घृतोदात् बहिः	घृत-सागरसे बाहर	द्वीपनाम	द्वीपके नामका
क्रौञ्चद्वीपः	क्रौञ्चद्वीप	निर्वतक	कारण
स्वमानेन	अपने परिमाणसे	क्रौञ्चः नाम	क्रौञ्च नामका
द्विगुणः	दो गुने	पर्वतराजः	पर्वतराज
		आस्ते	है ॥१८॥

योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥१९॥

यः असौ गुहप्रहरण उन्मथित नितम्ब कुञ्जः अपि क्षीरोदेन आसिच्यमानः भगवता वरुणेन अभिगुप्तः विभयः बभूव ॥१९॥

यः असौ	जो यह (पर्वत)	क्षीरोदेन	क्षीर-समुद्र द्वारा
गुहप्रहरण	(पहिले) कुमार कार्तिकके शस्त्र प्रहारसे	आसिच्यमानः	सिञ्चित होते रहनेसे
उन्मथित	क्षत-विक्षत	भगवता वरुणेन	(तथा) भगवान् वरुण द्वारा
नितम्ब	मध्य भाग	अभिगुप्तः	संरक्षित होनेसे
कुञ्जः अपि	(तथा) कुञ्जोंके होने पर भी	विभयः बभूव	निर्भय हो गया ॥१९॥

तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ॥२०॥

तस्मिन् अपि प्रैयव्रतः घृतपृष्ठः नाम अधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याण यशसः आत्मभूतस्य हरेः चरणारविन्दं उपजगाम ॥२०॥

तस्मिन् अपि	उसमें भी
घृतपृष्ठः नाम	घृतपृष्ठ नामके
प्रैयव्रतः	प्रियव्रतके पुत्र
अधिपतिः	स्वामी थे,
स्वे द्वीपे	अपने द्वीपको
सप्त वर्षाणि	सात वर्षोंमें
विभज्य	विभाजित करके
पुत्रनामसु तेषु	पुत्रोंके नामवाले उनमें
सप्त रिक्थादान्	सात उत्तराधिकारियोंको
वर्षपान् निवेश्य	वर्षपाल नियुक्त करके
स्वयं भगवान्	स्वयं ऐश्वर्य सम्पन्न होनेपर भी
भगवतः	भगवान्
परमकल्याण	परम कल्याणदायी
यशसः	सुयशवाले
आत्मभूतस्य	आत्मस्वरूप
हरेः	श्रीहरिके
चरणारविन्दं	पाद-पद्मोंकी
उपजगाम	शरण ली ॥२०॥

आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन उपबर्हिणो नन्दो नन्दनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति ॥२१॥

आमः मधुरुहः मेघपृष्ठः सुधामा भ्राजिष्ठः लोहितार्णः वनस्पतिः इति घृतपृष्ठसुताः तेषां वर्षगिरयः सप्त सप्त एव नद्यः च अभिख्याताः शुक्लः वर्धमानः भोजनः उपबर्हिणः नन्दः नन्दनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्ला इति ॥२१॥

आमः मधुरुहः	आम, मधुरुह,
मेघपृष्ठः	मेघपृष्ठ,
सुधामा	सुधामा,
भ्राजिष्ठः	भ्राजिष्ठ,

लोहितार्णः	लोहितार्ण	उपबर्हिणः	उपबर्हिण,
वनस्पतिः इति	वनस्पति इस प्रकार (सात)	नन्दः नन्दनः	नन्द, नन्दन,
घृतपृष्ठसुताः	घृतपृष्ठके पुत्र हैं।	सर्वतोभद्र इति	सर्वतोभद्र ये (पर्वत) हैं
तेषां वर्षगिरयः	उनके वर्षके मर्यादा पर्वत	अभया अमृतौघा	अभया, अमृतौघा
		आर्यका	आर्यका,
च नद्यः	और नदियां भी	तीर्थवती	तीर्थवती,
सप्त सप्त एव	सात सात ही	वृत्तिरूपवती,	वृत्तिरूपवती,
अभिख्याताः	प्रसिद्ध हैं।	पवित्रवती	पवित्रवती,
शुक्लः वर्धमानः	शुक्ल, वर्धमान,	शुक्ला इति	शुक्ला ये (नदियां) हैं ॥२१॥
भोजन	भोजन,		

यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ॥२२॥

यासां अम्भः पवित्रं अमलं उपयुञ्जानाः पुरुष ऋषभ द्रविण देवक संज्ञा वर्षपुरुषाः आपोमयं देवं अपां पूर्णेन अञ्जलिना यजन्ते ॥२२॥

यासां	जिनके	वर्षपुरुषाः	उस वर्षके पुरुष
पवित्रं अमलं	पवित्र निर्मल	अपां पूर्णेन	जलसे भरी
अम्भः	जलका	अञ्जलिना	अञ्जलिसे
उपयुञ्जानाः	उपयोग करनेवाले	आपोमयं देवं	जलमय परमात्माकी
पुरुष ऋषभ	पुरुष, ऋषभ,	यजन्ते	पूजा करते हैं ॥२२॥
द्रविण देवक संज्ञा	द्रविण, देवक नामके (चारों वर्णके)		

आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः सुवः।
ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥२३॥

आपः पुरुषवीर्याः स्थ पुनन्तीः भूः भुवः स्वः ता नः पुनीतां इव अम्नीः स्पृशतां आत्मना भुव इति ॥२३॥

आपः	जल
पुरुषवीर्याः स्थ	विराट्-पुरुषमें स्थित उसका वीर्य है।
भूः भुवः स्वः	भू, भुवः स्वर्गको
पुनन्ती:	पवित्र करता है,
ता नः	वह हम
भुव स्पृशतां	शरीरसे स्पर्श करने वालोंको
अघ्नीः इव	पापहारीकी भांति
आत्मना	अपनी शक्तिसे
पुनीतां	पवित्र करें।
इति	इस प्रकार (स्तुति करते हैं) ॥२३॥

एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परीतो यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति ॥२४॥

एवं पुरस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपः द्वात्रिंशत् लक्ष योजन आयामः समानेन च दधिमण्डोदेन परीतः यस्मिन् शाकः नाम महीरुहः स्वक्षेत्र व्यपदेशकः यस्य ह महासुरभि गन्धः तं द्वीपं अनुवासयति ॥२४॥

एवं क्षीरोदात्	इसी प्रकार क्षीर-समुद्रसे
पुरस्तात्	आगे
परित	चारों ओरसे
उपवेशितः	घेरे हुए
शाकद्वीपः	शाकद्वीप
द्वात्रिंशत् लक्ष	बत्तीस लाख
योजन आयामः	योजन विस्तारवाला
समानेन च	अपने बराबरके ही
दधिमण्डोदेन	मट्ठेके समुद्रसे
परीतः	घिरा हुआ है,
स्वक्षेत्र	अपने क्षेत्रके
व्यपदेशकः	नामका सूचक
यस्मिन्	जिसमें
शाकः नाम	शाक नामक
महीरुहः	वृक्ष है,
यस्य ह	जिसकी ही
महासुरभि।	महान् सौरभ
गन्धः	गन्ध
तं द्वीपं	उस द्वीपको
अनुवासयति	सर्वत्र सुवासित करती है ॥२४॥

तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधि-पतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥२५॥

तस्य अपि प्रैयव्रत एव अधिपतिः नाम्ना मेधातिथिः सः अपि विभज्य सप्त वर्षानि पुत्रनामानि तेषु स्व आत्मजान् पुरोजव मनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वधार संज्ञान् निधाप्य अधिपतीन् स्वयं भगवति अनन्त आवेशित मतिः तपोवनं प्रविवेश ॥२५॥

तस्य अपि	उस (द्वीप) के भी
मेधातिथिः	मेधा तिथि नामके
नाम प्रैयव्रत	प्रियव्रतके
एव	पुत्र ही
अधिपतिः	स्वामी थे।
स अपि	उन्होंने भी
पुत्र नामानि	पुत्रोंके नामसे
सप्त वर्षानि	सात वर्षोंका
विभज्य	विभाजन करके
तेषु	उनमें
स्व आत्मजान्	अपने पुत्र
पुरोजव	पुरोजव,
मनोजव	मनोजव,
पवमान	पवमान,
धूम्रानीक	धूम्रानीक,
चित्ररेफ	चित्ररेफ,
बहुरूप	बहुरूप,
विश्वधार	विश्वधार
संज्ञान्	नाम वालोंको
अधिपति	अधिपति
निधाप्य	स्थापित करके
स्वयं	स्वयं
भगवयि अनन्त	भगवान् अनन्तमें
आवेशितः मतिः	बुद्धि लगाकर
तपोवनं	तपोवनमें
प्रविवेश	प्रवेश कर लिया ॥२५॥

एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुश्रृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति अनघाऽऽयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निज-धृतिरिति ॥२६॥

एतेषां वर्षमर्यादा गिरयः नद्यः च सप्त सप्त एव ईशानः उरुशृङ्गः
बलभद्रः शतकेसरः सहस्रस्रोतः देवपालः महानस इति अनघा आयुर्दा
उभयस्पृष्टिः अपराजिता पञ्चपदी सहस्रस्रुतिः निजधृतिः इति ॥२६॥

एतेषां	इनमें
वर्षमर्यादा	वर्ष सीमा बनाने वाले पर्वत
गिरयः	और नदियां
च नद्यः	
सप्त सप्त एव	सात-सात ही हैं।
ईशानः	ईशान,
उरुशृङ्गः	उरुशृङ्ग,
बलभद्रः	बलभद्र,
शतकेसरः	शतकेसर,
सहस्रस्रोतः	सहस्रस्रोत,
देवपालः	देवपाल,
महानस इति	महानस ये (पर्वत) हैं,
अनघा आयुर्दा	अनघा, आयुर्दा,
उभयस्पृष्टिः	उभयस्पृष्टि,
अपराजिता	अपराजिता,
पञ्चपदी	पञ्चपदी,
सहस्रस्रुतिः	सहस्रस्रुति,
निजधृतिः इति	निजधृति ये (नदियां हैं ॥२६॥

तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो
भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना
यजन्ते ॥२७॥

तत् वर्ष पुरुषाः ऋतव्रत सत्यव्रत दानव्रत अनुव्रत नामानः भगवन्तं
वायु आत्मकं प्राणायाम विधूत रजः तमसः परम समाधिना यजन्ते ॥२७॥

ऋतव्रत	ऋतव्रत,
सत्यव्रत	सत्यव्रत,
दानव्रत अनुव्रत	दानव्रत, अनुव्रत
नामानः	नामक (चार वर्णोंके)
तत् वर्ष पुरुषाः	उस वर्षके पुरुष
वायु आत्मकं	वायु स्वरूप
भगवन्तं	भगवान्‌की
प्राणायाम	प्राणायाम द्वारा
रजः तमसः	रजोगुण, तमोगुण
विधूत	नष्ट करके
परम समाधिना	परम समाधि द्वारा
यजन्ते	आराधना करते हैं ॥२७॥

अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः।
अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥२८॥

अन्तः प्रविश्य भूतानि यः बिभर्ति आत्मकेतुभिः अन्तर्यामी ईश्वरः साक्षात् पातु नः यत् वशे स्फुटम् ॥२८॥

आत्मकेतुभिः	(प्राणदि रूप) अपनी ध्वजाओं द्वारा	यत् वशे स्फुटं	जिसके वशमें जगत् है (वह)
भूतानि अन्तः	प्राणियोंके भीतर	साक्षात्	साक्षात्
प्रविश्य	प्रवेश करके	अन्तर्यामी	अन्तर्यामी
यः बिभर्ति	जो उनका धारण करता है,	ईश्वरः	सर्वसञ्चालक
		नः पातु	हमारी रक्षा करें ॥२८॥

एवमेव दधिमण्डोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥२९॥

एवं एव दधिमण्डोदात् परतः पुष्कर द्वीपः ततः द्विगुण आयामः समन्ततः उपकल्पितः समानेन स्वादु उदकेन समुद्रेण बहिः आवृतः यस्मिन् बृहत् पुष्करं ज्वलन शिखा अमल कनकपत्र अयुत अयुतं भगवतः कमलासनस्य अध्यासनं परिकल्पितं ॥२९॥

एवं एव	इस प्रकार ही	समानेन	(वह) अपने बराबरके
दधिमण्डोदात्	मट्ठेके समुद्रसे	स्वादु उदकेन	स्वादिष्ट जलके
परतः	आगे	समुद्रेण	समुद्रसे
ततः द्विगुण	उससे दुगुने	बहिः आवृतः	बाहरसे घिरा है।
आयामः	विस्तार वाला	यस्मिन्	जिसमें
पुष्कर द्वीपः	पुष्कर द्वीप	अमल ज्वलन	अग्निकी निर्मल
समन्ततः	चारों ओर	शिखा	लपटके समान
उपकल्पितः	स्थित है,	कनकपत्र	स्वर्णमय

अयुत अयुतं	लाखों दलोंका	कमलासनस्य	ब्रह्माका
बृहत् पुष्करं	बहुत बड़ा कमल है।	अध्यासनं	बैठनेका आसन
भगवतः	(वह) भगवान्	परिकल्पितं	बनाया गया है॥२९

तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात्सूर्यरथस्य मेरु परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥३०॥

तत् द्वीपमध्ये मानसोत्तर नाम एक एव अर्वाचीन पराचीन वर्षयोः मर्यादा अचलः अयुत योजन उच्छ्राय आयामः यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानां इन्द्रादीनां यत् उपरिष्टात् सूर्यरथस्य मेरु परिभ्रमतः संवत्सर आत्मकं चक्रं देवानां अहः रात्राभ्यां परिभ्रमति ॥३०॥

तत् द्वीपमध्ये	उस द्वीपके बीचमें	अयुत योजन	दस हजार योजन
अर्वाचीन	(उसके) पूर्वीय	उच्छ्राय	ऊँचा (उतना ही)
पराचीन	और पश्चिमी	आयामः	फैलाव वाला है।
वर्षयोः	प्रदेशको (पृथक करनेवाला)	यत्र तु	जहाँ तो
मानसोत्तर	मानसोत्तर	चतसृषु दिक्षु	चारों दिशाओंमें
नाम	नामका	इन्द्रादीनां	इन्द्र आदि
एक एव	एक ही	लोकपालानां	लोकपालोंकी
मर्यादा अचलः	मर्यादा पर्वत है।	चत्वारि पुराणि	चार पुरियां हैं■

■ यहांके लोकपालोंकी पुरियां ब्रह्माजीके स्थानका वर्णन इसी स्कन्धके अध्याय १६ के गद्य २८-२९ के साथ देखते योग्य है। वहाँ जम्बूद्वीपके इलावृतके मध्यमें सुमेरुके ऊपर ब्रह्मपुरी और उसके चारों ओर लोकपाल पुरियोंका वर्णन है।

यत् उपरिष्टात्	जिनके ऊपर	चक्र	चक्र
मेरुं परिभ्रमतः	सुमेरुके चारों ओर घूमते	देवानां	देवताओंका
सूर्यरथस्य	सूर्यके रथके	अहः रात्राभ्यां	दिन-रात बनाता
संवत्सर आत्मकं	संवत्सर स्वरूप	परिभ्रमति	घूमता है ॥३०॥

तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते ॥३१॥

तत् द्वीपस्य अपि अधिपतिः प्रैयव्रतः वीतिहोत्रः नाम एतस्य आत्मजौ रमणक धातकि नामानौ वर्षपती नियुज्य स स्वयं पूर्वजवत् भगवत् कर्मशील एव आस्ते ॥३१॥

तत् द्वीपस्य	उस द्वीपके	नामानौ	नाम वालोंको
अपि	भी	वर्षपती	वर्षोंका स्वामी
अधिपतिः	अधिपति	नियुज्य	बनाकर
प्रैयव्रतः	प्रियव्रतके पुत्र	स पूर्वजवत्	वे (अपने) पूर्वजोंके समान
वीतिहोत्रः	वीतिहोत्र		
नाम	नामक थे।	भगवत्	भगवान्‌की
एतस्य आत्मजौ	उनके पुत्र	कर्मशील	सेवारूप कर्ममें
रमणक	रमणक और	एव आस्ते	ही लगे रहे ॥३१
धातकि	धातकि		

तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेण कर्मणाऽऽराधयन्तीदं चोदाहरन्ति ॥३२॥

तत् वर्ष पुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेण कर्मणा आराधयन्ति इदं च उदाहरन्ति ॥३२॥

तत् वर्ष पुरुषा	उस वर्षके निवासी	कर्मणा	कर्मों द्वारा
ब्रह्मरूपिणं	ब्रह्मा स्वरूप	आराधयन्ति	आराधना करते हैं।
भगवन्तं	भगवान्‌की	च इदं	और यह
सकर्मकेण	सकाम	उदाहरन्ति	स्तुति करते ॥३२॥

यत्तत्कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चयेत् ।
एकान्तमद्वयं शान्तं तस्मै भगवते नम इति ॥३३॥

यत् तत् कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनः अर्चयेत् एकान्तं अद्वयं शान्तं तस्मै भगवते नमः इति ॥३३॥

यत् कर्ममयं	जो कर्ममय
लिङ्गं	प्रतीक हैं
तत्	उन
ब्रह्मलिङ्गं	ब्रह्म स्वरूप (भगवान्) की
जनः अर्चयेत्	लोगोंको अर्चना करनी चाहिए।
तस्मै	उन
एकान्तं	नैष्ठिक
अद्वयं	अद्वितीय
शान्तं	शान्त
भगवते	भगवान्‌को
नमः	नमस्कार।
इति	इस प्रकार (स्तुति करते हैं) ॥३३॥

श्रीशुक उवाच-*

ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ॥३४॥

ततः परस्तात् लोकालोक नाम अचलः लोक अलोकयोः अन्तराले परित उपक्षिप्तः ॥३४॥

ततः परस्तात्	उसके आगे
लोक	लोक (सूर्यादि द्वारा प्रकाशित)
अलोकयोः	अलोक (अप्रकाशित भाग) के
अन्तराले	बीचमें
परित	सब ओर
उपक्षिप्तः	(सर्वेश्वर द्वारा) डाला हुआ
लोकालोक नाम	लोकालोक नामक
अचलः	पर्वत है ॥३४॥

* अन्य प्रतियोंमें यहाँ 'ऋषिरुवाच' है।

यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्या-ऽऽदर्शतलोपमा यस्यां प्रहितः पदार्थो न कथञ्चित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृताऽऽसीत् ॥३५॥

यावत् मानसोत्तर मेरोः अन्तरं तावती भूमिः काञ्चन्यन्या आदर्श-तल उपमा यस्यां प्रहितः पदार्थः न कथञ्चित् पुनः प्रति उपलभ्यते तस्मात् सर्व सत्त्व परिहृता आसीत् ॥३५॥

यावत्	जितना	पदार्थः	पदार्थ
मानसोत्तर	मानसोत्तरसे	कथञ्चित् पुनः	कभी भी फिर
मेरोः अन्तरं	मेरुका अन्तर है	न प्रति	लौटकर नहीं
तावती भूमिः	उसका स्थल (शुद्धोदकके पार) है	उपलभ्यते	मिलता
काञ्चन्यन्या	वह स्वर्णमय है,	तस्मात्	इसलिए
आदर्शतल	दर्पणके समान	सर्व	सब
उपमा	(स्वच्छ) है,	सत्त्व परिहृता	प्राणियोंने छोड़ी
यस्यां प्रहितः	जिसमें पहुँचा (गिरा)	आसीत्	है (वहां कोई नहीं रहता) ॥३५॥

लोकालोक इति समाख्या यदनेनाचलेन लोकालोक-स्यान्तर्वर्तिनावस्थाप्यते ॥३६॥

लोकालोक इति समाख्या यत् अनेन अचलेन लोक अलोकस्य अन्तर्वर्तिना अवस्थाप्यते ॥३६॥

लोकालोक	लोकालोक	लोक	लोक और
इति समाख्या	यह नाम पड़नेका कारण है	अलोकस्य	अलोकके
यत् अनेन	क्योंकि यह	अन्तर्वर्तिना	मध्यमें
अचलेन	पर्वत	अवस्थाप्यते	स्थित है ॥३६॥

स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रींल्लोकानावितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥३७॥

स लोकत्रय अन्ते परित ईश्वरेण विहितः यस्मात् सूर्य आदीनां ध्रुव अपवर्गाणां ज्योतिर्गणानां गभस्तयः अर्वाचीनाः त्रीन्लोकान् अवितन्वाना न कदाचित् पराचीना भवितुं उत्सहन्ते तावत् उन्नहन आयामः ॥३७॥

स लोकत्रय	वह (पर्वत) तीनों लोकोंके अन्तमें	अर्वाचीनाः	नीचे ही
अन्ते	चारों ओर	त्रीन्लोकान्	तीनों लोकोंमें
परति	परमेश्वर द्वारा	अवितन्वाना	फैलती हुई
ईश्वरेण	बनाया है।	कदाचित्	कभी
विहितः	जिससे	पराचीना भवितुं	पार होनेका
यस्मात्	सूर्य आदि	उत्सहन्ते न	उत्साह नहीं करतीं
सूर्य आदीनां	ध्रुव पर्यन्त	तावत्	वहीं तक
ध्रुव अपवर्गाणां	ज्योतिर्मण्डलकी	उन्नहन आयामः	ऊपर जानेका (उनका) विस्तार है ॥३७॥
ज्योतिर्गणानां गभस्तयः	किरणें		

एतावांल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥३८॥

एतावान् लोकविन्यासः मान लक्षण संस्थाभिः विचिन्तितः कविभिः स तु पञ्चाशत् कोटि गणितस्य भूगोलस्य तुरीय भागः अयं लोकालोक अचलः ॥३८॥

कविभिः	विद्वानों द्वारा	एतावान्	इतना ही
मान लक्षण	परिमाण, लक्षण,	लोकविन्यासः	लोकोंकी स्थिति
संस्थाभिः	स्थितिके द्वारा	विचिन्तितः	सोची गयी है।

स तु	वह तो	भूगोलस्य	(समस्त इस) भूगोलका
गणितस्य	गणितसे	तुरीय भागः	चौथाई भाग
पञ्चाशत् कोटि	पचास करोड़ योजन है।	अयं लोकालोक	यह लोकालोक
		अचलः	पर्वत है ॥३८॥

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥३९॥

तत् उपरिष्टात् चतसृषु आशासु आत्मयोनिना अखिल जगत् गुरुणा अधिनिवेशिता ये द्विरद पतयः ऋषभः पुष्कर चूडः वामनः अपराजितः इति सकललोक स्थिति हेतवः ॥३९॥

अखिल जगत्	सम्पूर्ण विश्वके	स्थिति हेतवः	स्थितिके लिए
गुरुणा	गुरु	ये द्विरद पतयः	जो गजराज
आत्मयोनिना	स्वयम्भू (ब्रह्माजी) द्वारा	अधिनिवेशिता	नियुक्त किये हैं
		इति	(वे) इस प्रकार हैं
तत् उपरिष्टात्	उस (लोका-लोक) के ऊपर	ऋषभः	ऋषभ,
		पुष्करचूडः	पुष्करचूड,
चतसृषु आशासु	चारों दिशाओंमें	वामनः	वामन और
सकललोक	सब लोकोंकी	अपराजितः	अपराजित ॥३९॥

तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः सन्धारयमाणस्तस्मिन् गिरिवरे समन्तात्सकललोकस्वस्तय आस्ते ॥४०॥

तेषां स्वविभूतीनां लोक पालानां च विविधवीर्यं उपबृंहणाय भगवान् परम महापुरुषः महाविभूति पतिः अन्तर्यामी आत्मनः विशुद्ध सत्त्वं धर्म ज्ञान वैराग्य ऐश्वर्यं आदि अष्टमहासिद्धि उपलक्षणं विष्वक्सेन आदिभिः स्वपार्षदप्रवरैः परिवारितः निजवर आयुध उपशोभित निजभुज-दण्डैः सन्धारयमाणः तस्मिन् गिरिवरे समन्तात् सकल लोक स्वस्तय आस्ते ॥४०॥

तेषां	उन (दिग्गजों) की
च स्वविभूतीनां	तथा अपनी विभूति रूप
लोक पालानां	लोकपालोंकी
विविधवीर्यं	अनेक प्रकारकी शक्तियोंको
उपबृंहणाय	बढ़ानेके लिए (तथा)
सकल लोक	सब लोकोंके
स्वस्तय	कल्याणके लिए
भगवान्	भगवान्
परम	सर्वोपरि
महापुरुषः	महापुरुष,
महाविभूति पतिः	महान् ऐश्वर्यके स्वामी,
अन्तर्यामी	अन्तर्यामी
विशुद्ध सत्त्वं	विशुद्ध सत्त्व
आत्मनः	विग्रह (श्रीहरि)
धर्म ज्ञान	धर्म, ज्ञान,
वैराग्य ऐश्वर्य	वैराग्य, ऐश्वर्य
आदि	आदि
अष्टमहासिद्धि	आठ महासिद्धियोंसे
उपलक्षणं	उपलक्षित,
स्वपार्षदप्रवरैः	अपने पार्षद श्रेष्ठ
विष्वक्सेन	विष्वक्सेन
आदिभिः	आदिसे
परिवारितः	घिरे हुए,
निजवर आयुध	अपने श्रेष्ठ आयुध (शंखचक्र आदि)
उपशोभित	सुशोभित
निजभुजदण्डैः	अपनी भुजाओंसे
सन्धारयमाणः	धारण किये
तस्मिन् गिरिवरे	उस श्रेष्ठ पर्वत (लोकालोक) पर
समन्तात् आस्ते	सब ओर विराजमान हैं ॥४०॥

आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीयायेत्यर्थः ॥४१॥

आकल्पं एवं वेषं गतः एष भगवान् आत्म योगमायया विरचित विविध लोकयात्रा गोपीथाय इति अर्थः ॥४१॥

आत्म	अपनी	इति अर्थः	इसी प्रयोजनसे
योगमायया	योगमाया द्वारा	एष भगवान्	ये भगवान्
विरचित	निर्मित	आकल्पं	कल्प पर्यन्त
विविध	अनेक प्रकारके	एवं वेष गतः	इसी वेशमें रहते हैं ॥४१॥
लोकयात्रा	लोक-व्यवहारकी		
गोपीयाय	रक्षाके लिए		

योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् । ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥४२॥

यः अन्तः विस्तार एतेन हि अलोक परिमाणं च व्याख्यातं यत् बहिः लोकालोक अचलात् ततः परस्तात् योगेश्वरगतिं विशुद्धां उदाहरन्ति ॥४२॥

यः	जो (लोकालोकके)	अलोक	अलोकके
अन्तः विस्तार	भीतरी भागका विस्तार है,	परिमाणं च	परिमाणको भी
एतेन हि	इसके द्वारा ही	व्याख्यातं	बतला दिया (गया)
यत्	जो	ततः परस्तात्	उससे आगे
लोकालोक	लोकालोक	विशुद्धां	ठीक-ठीक
अचलात्	पर्वतसे	योगेश्वरगतिं	योगेश्वरोंकी ही गति
बहिः	बाहर है (उस)	उदाहरन्ति	कही जाती है ॥४२॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् ।
सूर्याण्डगोलयोर्मध्ये कोटचः स्युः पञ्चविंशतिः ॥४३॥

अण्डमध्य गतः सूर्यः द्यावा भूम्योः यत् अन्तरं सूर्य अण्डगोलयोः मध्ये कोटचः स्युः पञ्चविंशतिः ॥४३॥

द्यावा	स्वर्ग	अण्डमध्य	(उस) ब्रह्माण्डके मध्य (केन्द्र) में
भूम्योः	पृथ्वीके		
यत् अन्तरं	मध्यका जो भाग है		

सूर्यः गतः	सूर्य स्थित है।
सूर्य	सूर्य तथा
अण्डगोलयोः	ब्रह्माण्ड-गोलकके
मध्ये	बीचमें
पञ्चविंशतिः	पच्चीस
कोटयः स्युः	करोड़ योजन है ॥४३॥

मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः ।
हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥४४॥

मृते अण्ड एष एतस्मिन् यत् अभूत् ततः मार्तण्ड इति व्यपदेशः हिरण्यगर्भ इति यत् हिरण्य अण्ड समुद्भवः ॥४४॥

एष यत्	यह क्योंकि
एतस्मिन्	इस
मृते अण्ड	मरे हुए अण्ड (ब्रह्माण्ड) से
अभूत्	उत्पन्न हुआ,
ततः मार्तण्ड	इसलिए मार्तण्ड
इति व्यपदेशः	इस प्रकार निर्दिष्ट हुआ।
हिरण्यगर्भ	हिरण्यगर्भ
इति यत्	इस प्रकार (कहा गया) क्योंकि
हिरण्य अण्ड	स्वर्णिम (ज्योतिमय) अण्डसे
समुद्भवः	उत्पन्न हुए ॥४४॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा ।
स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥४५॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौः मही भिदा स्वर्ग अपवर्गौ नरका रसा ओकांसि च सर्वशः ॥४५॥

हि सूर्येण	क्योंकि सूर्यके द्वारा ही
दिशः खं	दिशाओं, आकाश,
द्यौः मही	द्युलोक (अन्तरिक्ष) भूलोक
स्वर्गं	स्वर्ग
अपवर्गौ	मोक्षके प्रदेश (वैकुण्ठादि)
नरका	नरक
रसा ओकांसि	रसातलादि
सर्वशः	सभी
भिदा	भागोंका
विभज्यन्ते	विभाजन होता है ॥४५॥

देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् ।
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥४६॥

देव तिर्यक् मनुष्याणां सरीसृप सवीरुधां सर्वजीव निकायानां सूर्य आत्मा दृक् ईश्वरः ॥४६॥

देव तिर्यक्	देवता, तिर्यक् (पशु-पक्षी)	**निकायानां**	समूहोंका
मनुष्याणां	मनुष्योंके साथ	**सूर्य आत्मा**	सूर्य आत्मा और
सरीसृप	सरकने वाले प्राणी,	**दृक् ईश्वरः**	नेत्रोंके अधिष्ठाता हैं ॥४६॥
सवीरुधां	वनस्पतियोंके साथ		
सर्वजीव	सभी जीव		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भुवनकोशवर्णने समुद्वर्षसंनिवेशपरिमाणलक्षणो विंशोऽध्यायः ॥४६॥

अथ एकविंशोऽध्याय:

श्रीशुक उवाच-

एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः ॥१॥

एतावान् एव भूवलयस्य संनिवेशः प्रमाण लक्षणतः व्याख्यातः ॥१॥

एतावान् एव	इतना ही	प्रमाण लक्षणतः	परिमाण और लक्षण सहित
भूवलयस्य	भू-मण्डलका	व्याख्यातः	(वह) बतला दिया गया ॥१॥
सन्निवेशः	विस्तार है,		

एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसन्धितम् ॥२॥

एतेन हि दिवः मण्डलमानं तद् विद उपदिशन्ति यथा द्विदलयोः निष्पाः आदीनां ते अन्तरेण अन्तरिक्षं तत् उभय सन्धितम् ॥२॥

हि	क्योंकि	यथा निष्पाः	जैसे दालोंवाले
एतेन	इसीके अनुसार	द्विदलयोः	(चना, मटर आदि) द्विदलोंमें होते हैं
दिवः	द्यु लोक		
मण्डलमानं	मण्डलका परिमाण	ते अन्तरेण	उनके मध्यमें
तद् विद	उसे जाननेवाले (विद्वान्)	अन्तरिक्षं	अन्तरिक्ष है,
		तत् उभय	वह दोनोंका
उपदिशन्ति	बतलाते हैं,	सन्धितं	सन्धि स्थान है ॥२॥

यन्मध्यगतो भगवांस्तपताम्पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥३॥

यत् मध्यगतः भगवान् तपतां पतिः तपन आतपेन त्रिलोकीं प्रतपति अवभासयति आत्मभासा स एष उदगयन दक्षिणायन वैषुवत संज्ञाभिः मान्द्य शैघ्र्य समानाभिः गतिभिः आरोहण अवरोहण समान स्थानेषु यथा सवनं अभिपद्यमानः मकर आदिषु राशिषु अहः रात्राणि दीर्घं ह्रस्व समानानि विधत्ते ॥३॥

यत् मध्यगतः	जिसके मध्यमें स्थित
तपतां पतिः	तपाने वालों (ग्रह नक्षत्रादि) के स्वामी
भगवान् तपन	भगवान् सूर्य
आतपेन	(अपनी) धूपसे
त्रिलोकीं	तीनों लोकोंको
प्रतपति	तपाते हैं,
आत्मभासा	अपने प्रकाशसे
अवभासयति	प्रकाशित करते हैं।
स एष	वह ये
उदगयन	उत्तरायण,
दक्षिणायन	दक्षिणायन,
वैषुवत	विषुवत
संज्ञाभिः	नामवाली (क्रमशः)
मान्द्य शैघ्र्य	मन्द, शीघ्र,
समानाभिः	समान
गतिभिः	गतिसे
मकर आदिषु	मकर आदि
राशिषु	राशियोंमें (चलते हुए)
आरोहण	ऊँचे चढ़ते,
अवरोहण	नीचे उतरते,
समान स्थानेषु	समान स्थानमें
यथा सवनं	समयानुसार
अभिपद्यमानः	पहुँचकर
अहः रात्राणि	दिन-रात्रिको
दीर्घं ह्रस्व	बड़ी, छोटी या
समानानि	समान
विधत्ते	बनाते हैं ॥३॥

यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥४॥

यदा मेष तुलयोः वर्तते तदा अहः रात्राणि समानानि भवन्ति यदा वृषभ आदिषु पञ्चषु च राशिषु चरति तदा अहानि एव वर्धन्ते ह्रसति च मासि मासि एक एका घटिका रात्रिषु ॥४॥

यदा	जब (सूर्य)		कर्क, सिंह, कन्या)
मेष तुलयोः	मेष या तुला राशिमें	पञ्चषु राशिषु	पांच राशियोंमें
वर्तते	रहते हैं,	चरति	चलते हैं
तदा	तब	तदा अहानि एव	तब दिन ही
अहः रात्राणि	दिन और रात्रियां	वर्धन्ते	बढ़ते हैं।
समानानि	बराबर	च मासि मासि	तथा प्रत्येक महीने
भवन्ति	होते हैं,	एक एका घटिका	एक एक घड़ी
च यदा	और जब	रात्रिषु	रात्रियोंकी
वृषभ आदिषु	वृषभ आदि (मिथुन,	ह्रसति	घटती जाती है ॥४॥

यदा वृश्चिकादिषु पञ्चसु वर्तते तदाहोरात्राणि विपर्ययाणि भवन्ति ॥५॥

यदा वृश्चिक आदिषु पञ्चसु वर्तते तदा अहः रात्राणि विपर्ययाणि भवन्ति ॥५॥

यदा वृश्चिक	जब वृश्चिक	तदा अहः	तब दिन और
आदिषु	आदि	रात्राणि	रात्रियां
पञ्चसु	पांच (वृश्चिक, धनु, मकर, कुम्भ, मीन) राशियोंमें	विपर्ययाणि	उलटे (दिन घटते, रात्रियां बढ़ती)
वर्तते	रहते हैं	भवन्ति	होती हैं ॥५॥

यावद्दक्षिणायनमहानि वर्धन्ते यावदुदगयनं रात्रयः ॥६॥

यावत् दक्षिणायनं अहानि वर्धन्ते यावत् उदगयनं रात्रयः ॥६॥

दक्षिणायनं	(सूर्यके) दक्षिणायन । यावत्		आरम्भ होने तक

अहानि वर्धन्ते	दिन बढ़ते हैं	रात्रयः	रात्रियां (बढ़ती हैं) ॥६॥
उदगयनं	उत्तरायण		
यावत्	आरम्भ होने तक		

एवं नव कोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥७॥

एवं नव कोटय एकपञ्चाशत् लक्षाणि योजनानां मानसोत्तर गिरि परिवर्तनस्य उपदिशन्ति तस्मिन् ऐन्द्रीं पुरीं पूर्वस्मात् मेरोः देवधानीं नाम दक्षिणतः याम्यां संयमनीं नाम पश्चात् वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासु उदय मध्याह्न अस्तमय निशीथानि इति भूतानां प्रवृत्ति निवृत्ति निमित्तानि समय विशेषेण मेरोः चतुर्दिशम् ॥७॥

एवं	इस प्रकार	देवधानीं नाम	देवधानी नामकी है।
नव कोटि	नौ करोड़	दक्षिणतः	दक्षिणकी ओर
एकपञ्चाशत्	इक्यावन	याम्यां संयमनीं	यमकी संयमनी
लक्षाणि	लाख	नाम	नामक पुरी है।
योजनानां	योजन	पश्चात्	पीछे (पश्चिम) की ओर
मानसोत्तर	मानसोत्तर		
गिरि	गिरिकी		
परिवर्तनस्य	परिक्रमा (मार्ग) को	वारुणीं	वरुणकी
उपदिशन्ति	(जानकार) बतलाते हैं,	निम्लोचनीं	निम्लोचनी
		नाम	नामकी पुरी है।
तस्मिन्	उस (पर्वत) पर	उत्तरतः	उत्तरकी ओर
मेरोः पूर्वस्मात्	सुमेरुसे पूर्वकी ओर	सौम्यां	चन्द्रमाकी पुरी
ऐन्द्रीं पुरीं	इन्द्रकी पुरी		

विभावरी नाम	विभावरी नामकी है।*
तासु	इन (पुरियोंमें)
समय विशेषेण	विशेष समयके अनुसार
मेरोः चतुर्दिशं	सुमेरुके चारों ओर
उदय मध्याह्न	सूर्योदय, मध्याह्न,
अस्तमय	सायंकाल,
निशीथानि	अर्धरात्रि
इति	इस प्रकार
भूतानां	प्राणियोंकी
प्रवृत्ति निवृत्ति	प्रवृत्ति, निवृत्तिके
निमित्तानि	निमित्त (होते रहते हैं) ॥७॥

तत्रत्यानां दिवसमध्यङ्गत एव सदाऽऽदित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥८॥

तत्रत्यानां दिवस मध्यंगत एव सदा आदित्यः तपति सव्येन अचलं दक्षिणेन करोति ॥८॥

तत्रत्यानां	वहाँ (मानसोत्तर गिरिपर) रहने वालोंके लिए
सदा	सर्वदा
दिवस	दिनके
मध्यंगत एव	मध्याह्न कालीन ही
आदित्यः तपति	सूर्य तपते हैं।
सव्येन अचलं	पर्वतके बायेंसे (चलते)
दक्षिणेन करोति	अपने दाहिने करते हैं ॥८॥

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समनुपश्येरन् ॥९॥

यत्र उदेति तस्य ह समान सूत्र निपाते निम्लोचति यत्र क्वचन स्यन्देन अभितपति तस्य हि एष समान सूत्र निपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समनु पश्येरन् ॥९॥

---

* वरुणकी पुरीका नाम विभावरी आया है ३।१७।२६

यस्य	जिसका		रखा है,
एकं चक्रं	एक चक्र	इतर भागः	दूसरा भाग (गिरि
द्वादशारं	बारह (मासरूप) अरे,	मानसोत्तरे कृतः	मानसोत्तर गिरि-पर रखा है।
षट् नेमिः	छः (ऋतु रूप) नेमि (हाल)	यत्र प्रोतं	जिसमें पिरोया
त्रिणाभि	तीन (चौमासे रूप) नाभि वाला	रविरथचक्रं	सूर्यके रथका पहिया
संवत्सर आत्मकं	संवत्सर स्वरूप	तैलयन्त्र	कोल्हूके
समामनन्ति	मानते हैं।	चक्रवत्	पहियेके समान
तस्य अक्षः	उसकी धुरीका एक सिरा	भ्रमन्	घूमता हुआ
मेरोः मूर्ध निकृतः	सुमेरुकी चोटीपर	मानसोत्तर	मानसोत्तर
		गिरौ	पर्वतके
		परिभ्रमति	चारों ओर घूमता है ॥१३॥

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन सम्मितस्तैलयन्त्राक्षवद् ध्रुवे कृतोपरिभागः ॥१४॥

तस्मिन् अक्षे कृतमूलः द्वितीयः अक्षः तुर्यमानेन सम्मितः तैलयन्त्र अक्षवत् ध्रुवे कृत उपरिभागः ॥१४॥

तस्मिन अक्षे	उस धुरीमें	सम्मितः	बराबर है
कृतमूलः	मूल भाग जुड़ी	तैलयन्त्र	तेलके कोल्हूके
द्वितीयः अक्षः	दूसरी धुरी	अक्षवत्	धुरीके समान
तुर्यमानेन	उससे चौथाई परिमाण	उपरिभागः	उसका ऊपरी भाग
		ध्रुवे कृत	ध्रुवपर रखा है॥१४

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीय भागविशालस्तावान् रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥१५॥

रथनीडः तु षट्त्रिंशत् लक्ष योजन आयतः तत् तुरीय भाग विशालः तावान् रविरथ युगः यत्र हयाः छन्दो नामानः सप्त अरुण योजिता वहन्ति देवं आदित्यम् ॥१५॥

रथनीडः तु	रथमें बैठनेका स्थान तो
षट्त्रिंशत् लक्ष योजन	छत्तीस लाख योजन
आयतः	लम्बा
तत् तुरीय भाग	उसका चौथाई (नौ लाख योजन) भाग
विशालः	विशाल (चौड़ा) है,
तावान्	उतना ही (छत्तीस लाख योजन)
रविरथ युगः	सूर्य-रथका जूआ है।
यत्र	जिसमें
छन्दो नामानः	(गायत्री आदि) छन्दोंके नाम वाले
सप्त हयाः	सात घोड़े
अरुण योजिता	(सारथि) अरुण द्वारा जोते
देवं आदित्यं	सूर्य देवको
वहन्ति	ढोते हैं ॥१५॥

पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥१६॥

पुरस्तात् सवितुः अरुणः पश्चात् च नियुक्तः सौत्ये कर्मणि किल आस्ते ॥१६॥

सवितुः पुरस्तात्	सूर्यके आगे
पश्चात् च	पीछेकी (सूर्यकी) ओर (मुख किये)
सौत्ये कर्मणि	सारथिके काममें
नियुक्तः	नियुक्त
अरुणः किल	अरुण ही
आस्ते	हैं ॥१६॥

तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥१७॥

तथा वालखिल्या ऋषयः अङ्गुष्ठ पर्व मात्राः षष्टि सहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥१७॥

तथा	इसी प्रकार
षष्टि सहस्राणि	साठ हजार
अङ्गुष्ठ पर्व	अँगूठेके पोर
मात्राः	बराबर
वालखिल्या	वालखिल्य
ऋषयः	ऋषिगण

सूर्यं पुरतः	सूर्यके आगे	नियुक्ताः	नियुक्त
सूक्तवाकाय	स्वस्ति वाचनके लिए	संस्तुवन्ति	(उनकी) स्तुति करते रहते हैं ॥१७॥

तथान्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक् कर्मभिर्द्वन्द्वश उपासते ॥१८॥

तथा अन्ये च ऋषयः गन्धर्वाः अप्सरसः नागाः ग्रामण्यः यातुधानाः देवाः इति एक एकशः गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यं आत्मानं नाना नामानं पृथक् नाना नामानः पृथक् कर्मभिः द्वन्द्वशः उपासते ॥१८॥

तथा अन्ये च	इसी प्रकार दूसरे भी	नाना नामानं	अनेक नामवाले
ऋषयः गन्धर्वाः	ऋषि, गन्धर्व,	भगवन्तं सूर्यं	भगवान् सूर्यकी
नागाः ग्रामण्यः	नाग, यक्ष,	आत्मानं पृथक्	अपने भी अलग-अलग
यातु धानाः	राक्षस,		
देवाः	देवता	नाना नामानः	अनेक नामवाले
इति एक एकशः	इस प्रकार प्रत्येक	पृथक कर्मभिः	अलग-अलग कर्मों द्वारा
सप्त गणाः	(जोड़ेसे रहनेसे) सात गण	द्वन्द्वशः उपासते	दो-दो मिलकर उपासना करते हैं ॥१८॥
चतुर्दश	(कुल) चौदह		
मासि मासि	प्रत्येक महीनेमें		

लक्षोत्तरं सार्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥१९॥

लक्ष उत्तरं सार्धं नवकोटि योजन परिमण्डलं भूवलयस्य क्षणेन सगव्यूति उत्तरं द्विसहस्र योजनानि स भुङ्क्ते ॥१९॥

स	वे (सूर्य भगवान्)
भूमण्डलस्य	भूमण्डलके
लक्ष उत्तरं	एक लाख ऊपर
सार्धं नवकोटि	आधा अधिक नौ करोड़ (नौ करोड़ इक्यावन लाख)
योजन	योजन
परिमण्डलं	घेरेमें
सगव्यूति उत्तरं	दो ऊपर
द्विसहस्र	दो सहस्र
योजनानि	योजन
क्षणेन भुङ्क्ते	एकक्षणमें भोगते (जाते) हैं ॥१९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नामएकविंशोऽध्यायः ॥ १९ ॥

अथ द्वाविंशोऽध्यायः

राजोवाच

यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥१॥

यद् एतद् भगवतः आदि त्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतः राशीनां अभिमुखं प्रचलितं च प्रदक्षिणं भगवतः उपवर्णितं अमुष्य वयं कथं अनुमीमही इति ॥१॥

भगवतः	भगवन्	राशीनां	तथा राशियोंके
उपवर्णितं	आपके द्वारा वर्णित	अभिमुखं	सम्मुख
यद् एतद्	यह जो	प्रचलितं	चलते हुए
भगवतः	भगवान्	च प्रदक्षिणं	भी उनके बराबर
आदि त्यस्य	सूर्यके		दाहिने रहते हैं
मेरुं च ध्रुवं	सुमेर और ध्रुवकी	अमुष्य	इसका
प्रदक्षिणेन	प्रदक्षिणा करते	इति वयं कथं	इस प्रकार हम कैसे
परिक्रामतः	उनके चारों ओर घूमते हैं	अनुमीमही	अनुमान करें ॥१॥

श्रीशुक उवाच-*

यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन

* अन्य प्रतियोंमें यहाँ 'स होवाच' है।

परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ॥२॥

यथा कुलाल चक्रेण भ्रमता सह भ्रमतां तत् आश्रयाणां पिपीलिका आदीनां गतिः अन्य एव प्रदेश अन्तरेषु अपि उपलभ्य मानत्वात् एवं नक्षत्र राशिभिः उपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तत् आश्रयाणां सूर्यं आदीनां ग्रहाणां गतिः अन्य एव नक्षत्र अन्तरे राशि अन्तरे च उपलभ्यमान त्वात् ॥२॥

यथा कुलाल	जैसे कुम्हारके
चक्रेण	चाकके
भ्रमता सह	घूमते समय उसके साथ
भ्रमतां	घूमते
तत् आश्रयाणां	उसीपर स्थित
पिपीलिका	चींटी
आदीनां	आदि जीवोंकी
गतिः	चाल
अन्य एव	दूसरे ही
प्रदेश अन्तरेषु	भिन्न स्थानसे
उप लभ्यमान	जान
त्वात्	पड़ती है
एव नक्षत्र	ऐसे ही नक्षत्र तथा
राशिभिः	राशियों द्वारा
उपलक्षितेन	पहिचाने जानेवाले
कालचक्रेण	काल-चक्रके
ध्रुवं च मेरुं	ध्रुव और सुमेरुकी
प्रदक्षिणेन	प्रदक्षिणा करते
परिधावता	दौड़ते हुएके
सह	साथ
परिधावमानानां	दौड़नेवाले
तत् आश्रयाणां	उसी (काल-चक्र) में स्थित रहनेवाले
सूर्यं आदीनां	सूर्य आदि
ग्रहाणां	ग्रहोंकी
गतिः अन्य एव	गति दूसरे ही
नक्षत्र अन्तरे	नक्षत्रोंमें
च राशि अन्तरे	तथा भिन्न राशियोंमें
उपलभ्य	उपलब्ध
मानत्वात्	होनेके कारण (इसका अनुमान होता है) ॥२॥

स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यथोपजोषमृतुगुणान् विदधाति ॥३॥

स एष भगवान् आदिपुरुषः एव साक्षात् नारायणः लोकानां स्व
आत्मानं त्रयीमयं कर्मविशुद्धि निमित्तं कविभिः अपि च वेदेन विजि
मानः द्वादशधा विभज्य षट्सु वसन्त आदिषु ऋतुषु यथा उपजोषं ऋतुगु
विदधाति ।।३।।

स एष	वह ये
आदिपुरुषः	आदि-पुरुष
साक्षात्	साक्षात्
भगवान्	भगवान्
नारायणः एव	नारायण ही
लोकानां	लोकोंके
स्वस्तय	कल्याणके लिए
कर्मविशुद्धि	कर्मोंकी सम्पूर्ण शुद्धिके
निमित्तं	निमित्त
त्रयीमयं	वेदमय (क्योंकि)
कविभिः अपि	विद्वानों द्वारा भी
वेदेन	वेदके द्वारा
विजिज्ञास्यमानः	उनको जाननेकी इच्छा की जाती
आत्मानं	अपनेको
द्वादशधा	बारह रूपोंमें
विभज्य	बाँटकर
षट्सु	छहो
वसन्त आदिषु	वसन्त आदि
ऋतुषु	ऋतुओंमें
यथा उपजोषं	उनके योग्य
ऋतुगुणान्	ऋतुओंके गुणोंका
विदधाति	विधान करते हैं।

तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ।।४।।

तं एतं इह पुरुषाः त्रय्या विद्यया वर्ण आश्रम आचार अनुपथा उच्च अवचैः कर्मभिः आम्नातैः योगवितानैः च श्रद्धया यजन्तः अञ्जसा श्रेयः सम अधिगच्छन्ति ।।४।।

इह	इस (भारतवर्ष) में
वर्ण आश्रम	वर्ण आश्रमके
आचार	आचार
अनुपथाः	मार्गसे चलनेवाले
पुरुषाः	मनुष्य
तं एतं	उन इन (सूर्य भगवान्) की
त्रय्या विद्यया	वेदत्रयी द्वारा प्रतिपादित
उच्च अवचैः	बड़े-छोटे

कर्मभिः	कर्मोंसे,
आम्नातैः	वेद विहित
योगवितानैः च	योगके साधनोंसे भी
श्रद्धया यजन्तः	श्रद्धापूर्वक पूजन करते हुए
अञ्जसा	सरलतासे
श्रेयः	परम कल्याण
सम	भली
अधिगच्छन्ति	प्रकार पा लेते हैं ॥४॥

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते राशिसंज्ञान् संवत्सरावयवान्मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वय-मुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥५॥

अथ स एष आत्मा लोकानां द्यावा पृथिव्योः अन्तरेण नभोवलयस्य कालचक्र गतः द्वादश मासान् भुङ्क्ते राशिसंज्ञान् संवत्सर अवयवान् मासः पक्षद्वयं दिवा नक्तं च इति सपाद् अर्क्ष द्वयं उपदिशन्ति यावता षष्ठं अंशं भुञ्जीत स वै ऋतुः इति उपदिश्यते संवत्सर अवयवः ॥५॥

अथ स एष	अतः वे यही (सूर्य भगवान्)
लोकानां आत्मा	सम्पूर्ण लोकोंके आत्मा हैं।
द्यावा पृथिव्योः	द्यु लोक ओर पृथ्वीके
अन्तरेण	मध्यमें
नभोवलयस्य	आकाश-मण्डलके
कालचक्र गतः	कालचक्रमें स्थित होकर
संवत्सर	संवत्सरके
अवयवान्	अंगरूप
राशिसंज्ञान्	राशि कहे जानेवाले
द्वादश मासान्	बारह महीनोंको
भुङ्क्ते	भोगते हैं,
मासः पक्षद्वयं	(इनमें-से प्रत्येक) महीना दो पक्षका होता है।
दिवा च नक्तं	(पितृ मानसे) दिन और रात
इति	इस प्रकार,
सपाद् अर्क्ष द्वयं	(सौरमानसे) सवा दो नक्षत्रका
उपदिशन्ति	बतलाया जाता है,
यावता	जब तक
संवत्सर	संवत्सरके
अवयवः	अंगका
षष्ठं अंशं	छठवां भाग

भुञ्जीत	(सूर्य) भोगते हैं,	उपविश्यते	कहा जाता है ॥५॥
स वै	वही		
ऋतुः इति	ऋतु इस प्रकार		

अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ॥६॥

अथ च यावत् अर्धेन नभः वीथ्यां प्रचरति तं कालं अयनं आ चक्षते ॥६॥

अथ च	ऐसे ही	प्रचरति	चलते हैं,
यावत्	जब तक	तं कालं	उतने समयको
नभः वीथ्यां	आकाश-मार्गका	अयनं	अयन
अर्धेन	आधा भाग	आचक्षते	कहते हैं ॥६॥

अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कात्स्न्र्येन स ह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति ॥७॥

अथ च यावत् नभोमण्डलं सह द्यावा पृथिव्योः मण्डलाभ्यां कात्स्न्र्येन स ह भुञ्जीत तं कालं संवत्सरं परिवत्सरं इडावत्सरं वत्सरं वत्सरं इति भानो मान्द्य शैघ्र्य सम गतिभिः समामनन्ति ॥७॥

अथ च	इस प्रकार ही	मण्डलाभ्यां	मण्डलोंके
भानोः	सूर्य देव (अपनी)	सह	सहित
मान्द्य शैघ्र्य	मन्द, तीव्र,	कात्स्न्र्येन	सम्पूर्ण
सम	सम	नभोमण्डलं	आकाश-मण्डलका
गतिभिः	गतिसे	स ह	वे (सूर्य) तो
यावत्	जब तक	भुञ्जीत	भोग करते (चक्कर लगा जाते) हैं
द्यावा पृथिव्योः	द्युलोक, पृथ्वी		

तं कालं	उतने समयको (भावान्तर भेदसे)	इडावत्सरं	इडावत्सर,
संवत्सरं	संवत्सर,	अनुवत्सरं	अनुवत्सर,
परिवत्सरं	परिवत्सर,	वत्सरं इति	वत्सर इस प्रकार
		समामनन्ति	कहा जाता है ॥७॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥८॥

एवं चन्द्रमा अर्क गभस्तिभ्यः उपरिष्टात् लक्षयोजनतः उपलभ्यमानः अर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपाद् अर्क्षाभ्यां दिनेन एव पक्षभुक्तिं अग्रचारी द्रुततरगमनः भुङ्क्ते ॥८॥

एवं	इसीप्रकार	पक्षाभ्यां	दोनों पक्षों (एक महीने) में,
अर्क गभस्तिभ्यः	सूर्यकी किरणोंसे	मासभुक्तिं	एक महीनेके मार्गको
लक्षयोजनतः	एक लाख योजन		
उपरिष्टात्	ऊपर		
उपलभ्यमानः	मिलनेवाला	सपाद्	सवा दो
चन्द्रमा	चन्द्रमा	अर्क्षाभ्यां	दिनमें,
द्रुततरगमनः	बहुत तीव्र गतिसे चलनेवाला	पक्षभुक्तिं	एक पक्षके मार्गको
		दिनेन एव	एक दिनमें ही
अग्रचारी	सब (ग्रह-नक्षत्रों)से आगे रहनेवाला	भुङ्क्ते	भोग लेता (पार कर लेता) है ॥८॥
अर्कस्य	सूर्यके		
संवत्सरभुक्तिं	एक वर्षके भोग (मार्ग) को		

अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुङ्क्ते ॥९॥

अथ च आपूर्य माणाभिः च कलाभिः अमराणां क्षीयमाणाभिः च कलाभिः पितृणां अहः रात्राणि पूर्व पक्ष अपर पक्षाभ्यां वितन्वानः सर्व जीवनिवह प्राणः जीवः च एकं एकं नक्षत्रं त्रिंशता मुहूर्तैः भुङ्क्ते ॥९॥

अथ च	यह तो	अमराणां	देवताओंका
पूर्व पक्ष	पहिले कृष्णपक्षमें	अहः रात्राणि	दिन-रात
क्षीयमाणाभिः	घटती हुई	वितन्वानः	विभाग करता है।
कलाभिः च	कलाओंके द्वारा ही	सर्वजीवनिवहः	सम्पूर्ण प्राणि समूहका
पितृणां	पितरोंके	प्राणः जीवः च	प्राण और जीवन है।
च अपर	और दूसरे	एकं एकं नक्षत्रं	एक-एक नक्षत्रको
पक्षाभ्यां	(शुक्लपक्षमें)	त्रिंशता मुहूर्तैः	तीस मुहूर्तमें
आपूर्य माणाभिः	बढ़ती हुई	भुङ्क्ते	पार करता है ॥९॥
कलाभिः	कलाओंसे		

य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति ॥१०॥

य एष षोडशकलः पुरुषः भगवान् मनोमयः अन्नमयः अमृतमयः देव पितृ मनुष्य भूत पशु पक्षि सरीसृप वीरुधां प्राण आप्यायन शीलत्वात् सर्वमय इति वर्णयन्ति ॥१०॥

य एष	यह जो	भूत पशु पक्षि	भूत, पशु, पक्षी,
षोडशकलः	सोलह कलाओंवाले	सरीसृप वीरुधां	सरीसृप तथा पौधोंके
मनोमयः	मनोमय,	प्राण आप्यायन	प्राणोंको परितृप्त करनेवाले
अन्नमयः	अन्नमय,	शीलत्वात्	स्वभावके होनेसे (इन्हें)
अमृतमयः	अमृतमय	सर्वमय इति	सर्वमय-इस प्रकार
पुरुषः भगवान्	पुरुष भगवान् (चन्द्र) हैं	वर्णयन्ति	वर्णन करते हैं ॥१०॥
देव पितृ	देवता, पितर,		
मनुष्य,	मनुष्य,		

तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥११॥

ततः उपरिष्टात् त्रिलक्षयोजनतः नक्षत्राणि मेरुं दक्षिणेन एव काल अयन ईश्वर योजितानि सह अभिजित् अष्ट आविंशतिः ॥११॥

ततः	उन (चन्द्र) से	योजितानि	लगाये
त्रिलक्षयोजनतः	तीन लाख योजन	काल अयन	कालचक्रमें
उपरिष्टात्	ऊपर	मेरुं	सुमेरुको
सह अभिजित्	अभिजित्के साथ	दक्षिणेन एव	दाहिनी ओर रखकर ही (घूमते हैं) ॥११॥
अष्ट आविंशतिः	अट्ठाइस		
नक्षत्राणि	नक्षत्र		
ईश्वर	परमेश्वरके		

तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥१२॥

ततः उपरिष्टात् उशना द्विलक्ष योजनतः उपलभ्यते पुरतः पश्चात् सह एव व अर्कस्य शैघ्र्य मान्द्य साम्याभिः गतिभिः अर्कवत् चरति लोकानां नित्यदा अनुकूल एव प्रायेण वर्षयत् चारेण अनुमीयते स वृष्टि वृष्टम्भ ग्रह उपशमनः ॥१२॥

ततः द्विलक्ष	उससे दो लाख	अर्कस्य	सूर्यकी
योजनतः	योजन	शैघ्र्य मान्द्य	शीघ्र, मन्द,
उपरिष्टात्	ऊपर	साम्याभिः	समान
उशना	शुक्र पाया	गतिभिः	गतिसे
उपलभ्यते	जाता है,	अर्कवत्	सूर्यके समान

सह एव	(उनके) साथ ही	नित्यदा	सदा ही
पुरतः पश्चात्	आगे, पीछे,	अनुकूल	अनुकूल ही
व एव	या साथ ही	अनुमीयते	अनुमान किया जाता है।
चरति	चलता है।	वृष्टि विष्टम्भ	वर्षा रोकनेवाले
प्रायेण वर्षयत्	प्रायः वर्षा करते	ग्रह उपशमनः	ग्रहोंको शान्त करनेवाला
चारेण	चलनेके कारण		
लोकानां	लोगोंके	स	वह है ॥१२॥

उशनसा बुधो व्याख्यातस्तत उपरिष्टाद् द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद् व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥१३॥

उशनसा बुधः व्याख्यातः ततः उपरिष्टात् द्विलक्ष योजनतः बुधः सोमसुतः उपलभ्यमानः प्रायेण शुभकृत् यदा अर्कात् व्यतिरिच्येत तदा अतिवात अभ्रप्राय अनावृष्टि आदि भयं आशंसते ॥१३॥

उशनसा	शुक्र (की गति) द्वारा	उपलभ्यमानः	मिलते हैं,
बुधः	बुध (की गति) की	प्रायेण शुभकृत्	प्रायः शुभ करने-वाले हैं।
व्याख्यातः	व्याख्या हो गयी।	यदा अर्कात्	जब सूर्यसे
ततः	उस	व्यतिरिच्येत	पृथक पड़ते हैं
द्विलक्ष योजनतः	(शुक्र) से दो लाख योजन	तदा अतिवात	तब आंधी,
		अभ्रप्राय	मेघहीनताप्राय
उपरिष्टात्	ऊपर	अनावृष्टि	अनावृष्टि
सोमसुतः	चन्द्रमाके पुत्र	आदि भयं	आदि भय
बुधः	बुध	आशंसते	सूचित करते हैं ॥१

अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ॥१४॥

अत ऊर्ध्वं अङ्गारकः अपि योजन लक्ष द्वितय उपलभ्यमानः त्रिभिः त्रिभिः पक्षैः एक एकशः राशीन् द्वादश अनुभुङ्क्ते यदि न वक्रेण अभिवर्तते प्रायेण अशुभ ग्रहः अघशंसः ॥१४॥

अत	इस (बुध) से
लक्ष द्वितय	दो लाख
योजन	योजन
ऊर्ध्वं	ऊपर
अङ्गारकः अपि	मंगल भी
उपलभ्यमानः	मिलता है,
त्रिभिः त्रिभिः	तीन तीन
पक्षैः	पक्षोंमें
एक एकशः	एक-एक करके
द्वादश राशीन्	बारहो राशियोंको
अनुभुङ्क्ते	पार करता है।
यदि वक्रेण	यदि वक्री होकर
न अभिवर्तते	नहीं चलता तो
प्रायेण	प्रायः
अशुभ ग्रहः	अशुभ ग्रह है,
अघशंसः	अमङ्गल सूचक है ॥१४॥

तत उपरिष्टाद् द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥१५॥

ततः उपरिष्टात् द्विलक्ष योजन अन्तरगतः भगवान् बृहस्पतिः एक एकस्मिन् राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेण अनुकूलः ब्राह्मणकुलस्य ॥१५॥

ततः द्विलक्ष	उस (मंगल) से दो लाख
योजन	योजन
अन्तरगतः	दूरीपर
उपरिष्टात्	ऊपर
भगवान्	भगवान्
बृहस्पतिः	बृहस्पति
एक एकस्मिन्	एक-एक
राशौ	राशिमें
यदि न वक्रः	यदि वक्री न
स्यात्	हों
परिवत्सरं	एक-एक

परिवत्सरं	वर्ष*	ब्राह्मणकुलस्य	ब्राह्मण-कुलके
चरति	चलते हैं।	अनुकूलः	अनुकूल रहते हैं ॥१५॥
प्रायेण	प्रायः		

तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान् विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ॥१६॥

ततः उपरिष्टात् योजन लक्षद्वयात् प्रतीयमानः शनैःचर एक एकस्मिन् राशौ त्रिंशत् मासान् विलम्बमानः सर्वान् एव अनुपर्येति तावत्भिः अनुवत्सरैः प्रायेण हि सर्वेषां अशान्तिकरः ॥१६॥

ततः उपरिष्टात्	उस (बृहस्पति) से ऊपर	विलम्बमानः	रुकता हुआ
लक्षद्वयात्	दो लाख	तावत्भिः	उतने ही (तीस)
योजन	योजनपर	अनुवत्सरैः	वर्षोंमें
प्रतीयमानः	प्रतीत होता	सर्वान् एव	सभी (राशियों) पर
शनै.चर	शनिश्चर	अनुपर्येति	घूम आता है,
एक एकस्मिन्	एक-एक	प्रायेण हि	प्रायः ही (यह)
राशौ	राशिपर	सर्वेषां	सबके लिए
त्रिंशत् मासान्	तीस-तीस महीने	अशान्तिकरः	अशान्ति कारक है ॥१६॥

तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥१७॥

ततः उत्तरस्मात् ऋषयः एकादश लक्ष योजन अन्तर उपलभ्यन्ते य एव लोकानां शं अनुभावयन्तः भगवतः विष्णोः यत् परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥१७॥

---

* बृहस्पतिके एक वर्षको परिवत्सर कहते हैं।

ततः उत्तरस्मात्	उस (शनिश्चर) के ऊपर
एकादश लक्ष	ग्यारह लाख
योजन अन्तर	योजनकी दूरीपर
ऋषयः	सप्तर्षि
उपलभ्यन्ते	मिलते हैं,
य एव लोकानां	जो सभी लोकोंकी
शं	शान्ति
अनुभावयन्तः	कामना करते हुए
यत् भगवतः	जो भगवान्
विष्णोः	विष्णुका
परमं पदं	परम-पद (ध्रुव-लोक) है
प्रदक्षिणं	(उसकी)
प्रक्रमन्ति	प्रदक्षिणा करते रहते हैं ॥१७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥७१॥

अथ त्रयोविंशोऽध्यायः

श्रीशुक उवाच—

अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः
परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादि-
रग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः
सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य
उपास्ते तस्येहानुभाव उपवर्णितः ॥१॥

अथ तस्मात् परतः त्रयोदशलक्ष योजन अन्तरतः यत् तत् विष्णोः
परमं पदं अभिवदन्ति यत्र ह महाभागवतः ध्रुवः औत्तानपादिः अग्निना
इन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः
क्रियमाण इदानीं अपि कल्पजीविनां आजीव्य उपास्ते तस्य इह अनुभावः
उपवर्णितः ॥१॥

अथ तस्मात्	फिर उन (सप्तर्षियों) से
त्रयोदशलक्ष	तेरह लाख
योजन अन्तरतः	योजनकी दूरीपर
यत् विष्णोः	जो भगवान् विष्णुका
परमं पदं	परम-पद
अभिवदन्ति	कहा जाता है
यत्र ह	वहाँ तो
महाभागवतः	परम-भगवद्-भक्त
औत्तानपादिः	उत्तानपादके पुत्र
ध्रुवः	ध्रुव (रहते हैं)

तत्	उनकी
अग्निना इन्द्रेण	अग्नि, इन्द्र,
प्रजापतिना	प्रजापति
कश्यपेन	कश्यप
च धर्मेण	तथा धर्म द्वारा
समकालयुग्भिः	एक ही समय एक साथ
सबहुमानं	बहुत आदर सहित
दक्षिणतः	प्रदक्षिणा की
क्रियमाण	जाती है।
इदानीं अपि	अब भी

कल्पजीविनां	कल्प पर्यन्त जीवन वालोंके	तस्य इह	उनके इस लोकका
	आधार रूपसे	अनुभावः	प्रभाव
आजीव्य उपास्ते	उपासित होते हैं।	उपवर्णितः	(चतुर्थ स्कन्धमें) वर्णन कर चुके हैं।।१

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ-ईश्वरेण विहितः शश्वदवभासते ।।२।।

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्र आदीनां अनिमिषेण अव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुः इव अवष्टम्भः ईश्वरेण विहितः शश्वत् अवभासते ।।२।।

अनिमिषेण	सदा जागनेवाले	ईश्वरेण विहितः	परमात्माके विधानसे बना
अव्यक्तरंहसा	अव्यक्त गति		
भगवता	भगवान्	स्थाणु इव	ठूंठके समान
कालेन	कालके द्वारा	अवष्टम्भः	रोकनेवाला आधार है,
भ्राम्यमाणानां	घुमाये जाते हुए		
सर्वेषां	सभी	शश्वत्	(अतः) सदा (एक स्थानपर रहकर)
ग्रहनक्षत्र	ग्रह, नक्षत्र		
आदीनां	आदि	अवभासते	प्रकाशित होता है ।।२।।
ज्योतिर्गणानां	ज्योतिर्गणोंका		
हि स	क्योंकि वही (ध्रुवलोक)		

यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्त्येवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः

प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ॥३॥

यथा मेढी स्तम्भ आक्रमण पशवः संयोजिताः त्रिभिः त्रिभिः सवनैः यथा स्थानं मण्डलानि चरन्ति एवं भगणा ग्रहादयः एतस्मिन् अन्तः बहिः योगेन कालचक्र आयोजिता ध्रुवं एव अवलम्ब्य वायुना उदीर्यमाणा आकल्पान्तं परिचङ्क्रमन्ति, नभसि यथा मेघाः श्येन आदयः वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृति पुरुष संयोग अनुगृहीताः कर्मनिर्मित गतयः भुवि न पतन्ति ॥३॥

यथा मेढी	जैसे दाँवके बीचके	उदीर्यमाणाः	प्रेरित होकर
स्तम्भ	खम्भेके	आकल्पान्तं	कल्पान्त पर्यन्त
आक्रमण पशवः	चारों ओर घूमने-वाले पशु	परिचङ्	परिक्रमा
त्रिभिः त्रिभिः	तीन-तीन	क्रमन्ति	करते रहते हैं।
सवनैः	रस्सियोंसे	यथा मेघाः	जैसे मेघ (और)
संयोजिताः	बँधे हुए	श्येन आदयः	बाज आदि (पक्षी)
यथा स्थानं	अपने स्थानके अनुसार	वायुवशाः	वायुके वशमें रहते,
मण्डलानि	घेरेमें	कर्मसारथयः	अपने कर्मोंके द्वारा संचालित
चरन्ति	चलते हैं	परिवर्तन्ते	घूमते रहते हैं,
एवं भगणा	इसी प्रकार नक्षत्र और	एवं	इसी प्रकार
ग्रहादयः	ग्रह आदि	प्रकृति पुरुष	प्रकृति-पुरुषके
अन्तः बहिः	भीतर बाहरके	संयोग	संयोगसे
योगेन	क्रमसे	अनुगृहीताः	उत्पन्न
कालचक्र	कालचक्रमें	ज्योतिर्गणाः	ज्योतिर्गण
आयोजिताः	नियुक्त होकर	कर्मनिर्मित	कर्मसे बनायी
ध्रुवं एव	ध्रुव-लोकका ही	गतयः	गतिवाले
अवलम्ब्य	सहारा लेकर	भुवि न पतन्ति	पृथ्वीपर नहीं गिरते॥३॥
वायुना	वायुसे		

केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥४॥

केचन एतत् ज्योतिः अनीकं शिशुमार संस्थानेन भगवतः वासुदेवस्य योगधारणायां अनुवर्णयन्ति ॥४॥

केचन	कोई लोग	भगवतः	भगवान्
एतत्	इस	वासुदेवस्य	वासुदेवको
ज्योतिः अनीकं	ज्योतिः-चक्रका	योगधारणायां	योग धारणाके अनुसार■
शिशुमार	घड़ियालके		
संस्थानेन	रूपमें	अनुवर्णयन्ति	वर्णन करते हैं ॥४॥

यस्य पुच्छाग्रेऽवाकशिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः। तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति दक्षिणायनानि तु सव्ये। यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥५॥

यस्य पुच्छ अग्रे अवाक शिरसः कुण्डलीभूत देहस्य ध्रुव उपकल्पितः तस्य लाङ्गूल प्रजापतिः अग्निः इन्द्रः धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः तस्य दक्षिणावर्त कुण्डलीभूत शरीरस्य यानि उदगयनानि दक्षिण पार्श्वे तु नक्षत्राणि उपकल्पयन्ति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डल आभोग सन्निवेशस्य पार्श्वयोः उभयोः अपि अवयवाः समसंख्या भवन्ति पृष्ठे तु अजवीथी आकाशगङ्गा च उदरतः ॥५

■ शिशुमार रूपमें यह ज्योतिः-चक्र आकाशमें न स्थित है और न रहता है; क्योंकि ग्रह एक स्थानपर नहीं रहते। कभी-कभी दो या अधिक आठ ग्रह तक एकत्र हो जाते हैं। यह वर्णन धारणा (भावना) द्वारा योग (ध्यान) के सहायक रूपमें करनेके लिए है।

अवाक शिरसः	नीचे सिर किये
यस्य	जिसके
कुण्डलीभूत	कुण्डली मारे
देहस्य	शरीरके
पुच्छ अग्रे	पूंछकी नोकपर
ध्रुव	ध्रुवकी
उपकल्पितः	कल्पना की गयी है।
तस्य लाङ्गूले	उसकी पूंछपर
प्रजापतिः	प्रजापति,
अग्निः	अग्नि,
इन्द्रः धर्म इति	इन्द्र और धर्म इसी क्रमसे है।
पुच्छमूले	पूंछकी जड़के पास
धाता विधाता	धाता, विधाता
च कट्यां	तथा कमरपर
सप्तर्षयः	सप्तर्षि हैं।
तस्य दक्षिणावर्त	उसके दाहिनी ओर
कुण्डलीभूत	कुण्डली बने
शरीरस्य	शरीरपर
यानि	जो (अभिजितसे पुनर्वसु तकके)
उदगयनानि	उत्तरायणके (चौदह)
नक्षत्राणि	नक्षत्रोंको
दक्षिण पार्श्वे तु	दाहिने बगलमें ही
दक्षिणायनानि तु	दक्षिणायनके (पुष्यसे उत्तराषाढ़ाके चौदह नक्षत्रोंको) तो
सव्ये	बायें (पार्श्वमें)
उपकल्पयन्ति	कल्पित करते हैं।
यथा	जैसे
कुण्डल आभोग	कुण्डली मारे
सन्निवेशस्य	पड़े हुए
शिशुमारस्य	घड़ियालके
उभयोः	दोनों
पार्श्वयोः	बगलोंमें
समसंख्या	बराबर संख्याके
अवयवाः	अंग
भवन्ति	होते हैं।
पृष्ठे तु	पीठपर तो
अजवीथी	अजवीथी
च उदरतः	और पेटपर
आकाशगङ्गा	आकाशगङ्गा है ॥५॥

पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगय-

नानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ॥६॥

पुनर्वसु पुष्यौ दक्षिण वामयोः श्रोण्योः आर्द्रा अश्लेषे च दक्षिण वामयोः पश्चिमयोः पादयोः अभिजित् उत्तराषाढे दक्षिण वामयोः नासिकयोः यथा संख्यं श्रवण पूर्वाषाढे दक्षिण वामयोः लोचनयोः धनिष्ठा मूलं च दक्षिण वामयोः कर्णयोः मघा आदीनि अष्ट नक्षत्राणि दक्षिणायनानि वाम पार्श्ववङ्क्रिषु युञ्जीत तथा एव मृगशीर्ष आदीनि उदगयनानि दक्षिण पार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषा ज्येष्ठे स्कन्धयोः दक्षिण वामयोः न्यसेत् ॥६॥

यथा संख्यं — क्रमशः
पुनर्वसु पुष्यौ — पुनर्वसु, पुष्य
दक्षिण वामयोः — दाहिने, बायें
श्रोण्योः — नितम्ब भागपर
आर्द्रा अश्लेषे — आर्द्रा, अश्लेषा
दक्षिण वामयोः — दाहिने, बायें
पश्चिमयोः — पिछले
पादयोः — पैरोंपर,
अभिजित् — अभिजित्
उत्तराषाढे — उत्तराषाढ़ा
दक्षिण वामयोः — दाहिनी, बायीं
नासिकयोः — नासिका (छिद्र) पर,
श्रवण पूर्वाषाढे — श्रवण पूर्वाषाढ़ा
दक्षिण वामयोः — दाहिने, बायें
लोचनयोः — नेत्रोंपर,
धनिष्ठा मूलं च — धनिष्ठा और मूल
दक्षिण वामयोः — दाहिने, बायें
कर्णयोः — कानोंपर,
मघा आदीनि — मघा आदि
दक्षिणायनानि — दक्षिणायनके
अष्ट नक्षत्राणि — आठ नक्षत्रोंको
वाम — बायीं
पार्श्ववङ्क्रिषु — ओरकी पसलियोंपर
युञ्जीत — उपयोग करे,
तथा एव — इसी प्रकार
मृगशीर्ष — मृगशीर्ष
आदीनि — आदि
उदगयनानि — उत्तरायणके (आठ नक्षत्रोंको)
प्रातिलोम्येन — विपरीत क्रमसे
दक्षिण — दाहिनी
पार्श्ववङ्क्रिषु — ओरकी पसलियोंपर
प्रयुञ्जीत — प्रयुक्त करे,
शतभिषा ज्येष्ठे — शतभिषा, ज्येष्ठा
दक्षिण वामयोः — दाहिने, बायें
स्कन्धयोः — कन्धोंपर
न्यसेत् — रखे ॥६॥

उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥७॥

उत्तराहनाः अगस्तिः अधराहनौ यमः मुखेषु च अङ्गारकः शनैश्चरः उपस्थे बृहस्पतिः ककुदि वक्षसि आदित्यः हृदये नारायणः मनसि चन्द्रः नाभ्यां उशना स्तनयोः अश्विनौ बुधः प्राण अपानयोः राहुः गले केवतः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥७॥

उत्तराहनाः	ऊपरकी थूथनीमें	मनसि	मनमें
अगस्तिः	अगस्त्य,	चन्द्रः	चन्द्रमा,
अधराहनौ	नीचेकी ठोड़ीमें (नक्षत्र रूप) यम,	नाभ्यां	नाभिमें
		उशना	शुक्र,
मुखेषु च	मुखपर तो	स्तनयोः	स्तनोंपर
अङ्गारकः	मंगल,	अश्विनौ	दोनों अश्विनी कुमार
उपस्थे	मूत्रेन्द्रियपर		
शनैश्चरः	शनैश्चर,	प्राण अपानयोः	प्राण अपानमें
ककुदि	ककुदपर	बुधः	बुध,
बृहस्पतिः	बृहस्पति,	गले राहुः	गलेमें राहु,
वक्षसि	वक्षस्थलपर	सर्वाङ्गेषु	सब अंगोंमें
आदित्यः	सूर्य	केतवः	केतु समूह,
हृदये	हृदयमें	रोमसु	रोमोंमें
नारायणः	नारायण,	सर्वे तारागणाः	सब तारागण हैं ॥७

एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधी- महीति ॥८॥

एतद् उ ह एव भगवतः विष्णोः सर्वदेवतामयं रूपं अहरहः सन्ध्यायां प्रयतः वाक्यतः निरीक्षमाणः उपतिष्ठेत नमः ज्योतिः लोकाय काल अयनाय अनिमिषां पतये महापुरुषाय अभिधीमहि इति ॥८॥

उ ह एव	निश्चय ही यह	उपतिष्ठेत	उपासना करें
भगवतः विष्णोः	भगवान् विष्णुका	ज्योतिः लोकाय	ज्योतिर्गणोंके प्रकाशक,
सर्वदेवतामयं	सर्वदेवमय	काल अयनाय	कालचक्र स्वरूप,
रूपं	रूप है ।	अनिमिषां पतये	सर्वदेवाधिपति,
एतद्	इसको	महापुरुषाय	परम पुरुषको
अहरहः	प्रतिदिन	नमः	नमस्कार पूर्वक
सन्ध्यायां	सन्ध्याके समय	अभिधीमहि	(हम) ध्यान करते हैं ॥८॥
प्रयतः	एकाग्रता पूर्वक		
वाक्यतः	मौन होकर		
निरीक्षमाणः	देखते हुए		
इति	इस प्रकार		

प्रहर्क्षतारामयमाधिदैविकं
पापापहं मन्त्रकृतां त्रिकालम् ।
नमस्यतः स्मरतो वा त्रिकालं
नश्येत तत्कालजमाशु पापम् ॥९॥

प्रह अर्क्ष तारामयं आधिदैविकं पाप अपहं मन्त्रकृतां त्रिकालं नमस्यतः स्मरतः वा त्रिकालं नश्येत तत्कालजं आशु पापम् ॥९॥

प्रह अर्क्ष	ग्रह, नक्षत्र	नमस्यतः	नमस्कार करनेवाले
तारामयं	तारामय	वा	अथवा
आधिदैविकं	आधिदैविक	त्रिकालं	तीनों समय
पाप अपहं	पाप-नाशक (यह रूप)	स्मरतः	स्मरण करनेवालेका
त्रिकालं	तीनों समय (प्रातः, दोपहर, शाम) को	तत् कालजं	उस समय किया
मन्त्रकृतां	मन्त्र जप करते	पापं	पाप
		आशु	तुरन्त
		नश्येत	नष्ट हो जाता है ॥९

अथ चतुर्विंशोऽध्यायः

श्रीशुक उवाच-

अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः ॥१॥

अधस्तात् सवितुः योजन अयुते स्वर्भानुः नक्षत्रवत् चरति इति एके यः असौ अमरत्वं ग्रहत्वं च अलभत भगवत् अनुकम्पया स्वयं असुर अपसदः सैंहिकेयः हि अतदर्हः तस्य तात जन्म कर्माणि च उपरिष्टात् वक्ष्यामः ॥१॥

सवितुः	सूर्यसे	अलभत	प्राप्त किया है।
योजन अयुते	दस हजार योजन	हि स्वयं	क्योंकि स्वयं (तो)
अधस्तात्	नीचे	सैंहिकेयः	(यह) सिंहिका का पुत्र
स्वर्भानुः	राहु	असुर अपसदः	असुराधम
नक्षत्रवत्	नक्षत्रोंके समान	अतदर्हः	इसके योग्य नहीं था।
चरति	घूमता है	तात	तात (परीक्षित)!
इति एके	इस प्रकार कोई (कहते हैं)	तस्य जन्म	उसको जन्म
यः असौ	जिस इस (राहु) नें	च कर्माणि	और कर्मोंका
भगवत्	भगवान्के	उपरिष्टात्	आगे
अनुकम्पया	अनुग्रहसे	वक्ष्यामः	वर्णन करेंगे ॥१॥
अमरत्वं	अमरता		
च ग्रहत्वं	और ग्रहत्व		

यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति ॥२॥

यद् अदः तरणेः मण्डलं प्रतपतः तत् विस्तरतः योजन अयुतं आचक्षते द्वादश सहस्रं सोमस्य त्रयोदश सहस्रं राहोः यः पर्वणि तत् व्यवधानकृत् वैर अनुबन्धः सूर्याचन्द्रमसा: अभिधावति ॥२॥

यद् अदः	यह जो	तत्	वह (राहु)
प्रतपतः	तपता हुआ	व्यवधानकृत्	(अपने अमृतपानमें) बाधा डालने वालेसे
तरणेः मण्डलं	सूर्य-मण्डल है,	वैर अनुबन्धः	बद्ध वैर होनेसे
तत् विस्तरतः	वह विस्तारमें	पर्वणि	पर्व (अमावस्या-पूर्णिमा) पर
योजन अयुतं	दस हजार योजन	सूर्याचन्द्रमसा	सूर्य या चन्द्रमाकी ओर
आचक्षते	कहा जाता है,	अभिधावति	(उन्हें ग्रसने) दौड़ता है ॥२॥
सोमस्य	चन्द्रमाका (मण्डल)		
द्वादश सहस्रं	बारह हजार (योजन)*		
राहोः	राहुका (मण्डल)		
त्रयोदश सहस्रं	तेरह हजार (योजन) है।		

तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदन्ति लोकाः ॥३॥

तत् निशम्य उभयत्र अपि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितं अस्त्रं तत् तेजसा दुर्विषहं मुहुः परिवर्तमानं अभ्यवस्थितः मुहूर्तं उद्विजमानः चकित हृदयः आरात् एव निवर्तते तत् उपरागं इति वदन्ति लोकाः ॥३॥

* पिछले अध्यायका और यहाँका भी यह खगोल-वर्णन वर्तमान विज्ञान तथा भारतीय-ज्योतिषसे भी भिन्न है। यहां चन्द्रमाको सूर्यसे दो हजार योजन स्वतन्त्र ग्रह बतलाया है, जब कि ज्योतिष भी चन्द्रको छोटा तथा पृथ्वीका उपग्रह मानता है। अतः इस पौराणिक खगोलका रहस्य समझमें नहीं आता।

तत् निशम्य	यह देखकर	तेजसा	तेजसे
उभयत्र अपि	(सूर्य-चन्द्र) दोनोंकी ही	उद्विजमानः	उद्विग्न होकर
रक्षणाय	रक्षाके लिए	चकित हृदयः	चकित-चित्त
भगवता प्रयुक्तं	भगवान्‌के द्वारा नियुक्त	मुहूर्तं	एक मुहूर्त
भागवतं	भगवान्‌का	अभ्यवस्थितः	उनके सामने टिककर
दयितं अस्त्रं	प्रिय अस्त्र	आरात् एव	समीपसे ही
सुदर्शनं नाम	सुदर्शन नामका (चक्र)	निवर्तते	लौट आता है,
मुहुः परिवर्तमानं	बराबर घूमता रहता है।	तत् लोकाः	इसीको लोग
तत् दुर्विषहं	उसके असह्य	उपरागं इति	ग्रहण लगा, इस प्रकार
		वदन्ति	कहते हैं ॥३॥

ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥४॥

ततः अधस्तात् सिद्ध चारण विद्याधराणां सदनानि तावत् मात्र एव ॥४॥

ततः	उस (राहु) से	सिद्ध चारण	सिद्ध, चारण,
तावत् मात्र एव	उतने ही (दस हजार योजन)	विद्याधराणां	विद्याधरोंके
अधस्तात्	नीचे	सदनानि	निवास हैं ॥४॥

ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते ॥५॥

ततः अधस्तात् यक्ष रक्षः पिशाच प्रेत भूतगणानां विहार अजिरं अन्तरिक्षं यावत् वायुः प्रवाति यावत् मेघाः उपलभ्यन्ते ॥५॥

ततः अधस्तात्	उसके नीचे	यक्ष रक्षः	यक्ष, राक्षस,
यावत् वायुः	जहां तक वायु	पिशाच प्रेत	पिशाच, प्रेत
प्रवाति	चलता है,	भूतगणानां	भूतगणोंका
यावत् मेघाः	जहाँ तक मेघ	विहार अजिरं	क्रीड़ाङ्गण
उपलभ्यन्ते	पाये जाते हैं	अन्तरिक्षं	अन्तरिक्ष है ॥५॥

ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी यावद्धंसभासश्येन-सुपर्णादयः पतत्त्रिप्रवरा उत्पतन्तीति ॥६॥

ततः अधस्तात शतयोजन अन्तर इयं पृथिवी यावत् हंस भास श्येन सुपर्ण आदयः पतत्रि प्रवराः उत्पतन्ति इति ॥६॥

ततः अधस्तात	उसके नीचे	यावत् हंस	जहाँ तक हंस,
शतयोजन	सौ योजनकी	भास श्येन	गिद्ध, बाज,
अन्तरं	दूरीपर	सुपर्ण आदयः	गरुड़ आदि
इयं पृथिवी	यह पृथ्वी है।	पतत्रि प्रवराः	श्रेष्ठ पक्षी
इति	इस प्रकार	उत्पतन्ति	उड़ सकते हैं ॥६॥

उपवर्णितं भूमेर्यथासंनिवेशावस्थानमवनेरप्यधस्तात् सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ता अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥७॥

उपवर्णितं भूमेः यथा संनिवेश अवस्थानं अवनेः अपि अधस्तात् सप्त भूविवराः एक एकशः योजन अयुत अन्तरेण आयाम विस्तारेण उपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालं इति ॥७

संनिवेश	विस्तार और	अपि	भी
अवस्थानं यथा	स्थितिके अनुसार	सप्त भूविवराः	सात भू-विवर
भूमेः उपवर्णितं	पृथ्वीका वर्णन हो चुका		(भू-गर्भ स्थित लोक) हैं
अवनेः अधस्तात्	भूमिके नीचे		

अतलं वितलं	अतल, वितल,	योजन अयुत	दस हजार योजनकी
सुतलं तलातलं	सुतल, तलातल,	अन्तरेण	(परस्पर) दूरीपर
महातलं रसातलं	महातल, रसातल,	आयाम	(इतने ही)
पातालं इति	पाताल इस प्रकार	विस्तारेण	लम्बाई-चौड़ाईके
एक एकशः	प्रत्येक	उपलकृप्ताः	स्थित हैं ॥७॥

एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानन्दभूति-विभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय ईश्वराद-प्यप्रतिहतकामा मायाविनोदा निवसन्ति ॥८॥

एतेषु हि बिलस्वर्गेषु स्वर्गात् अपि अधिक कामभोग ऐश्वर्य आनन्द भूति विभूतिभिः सुसमृद्ध भवन उद्यान आक्रीड विहारेषु दैत्य दानव काद्रवेया नित्य प्रमुदित अनुरक्त कलत्र अपत्य बन्धु सुहृत् अनुचराः गृहपतयः ईश्वरात् अपि प्रतिहत कामाः माया विनोदाः निवसन्ति ॥८॥

हि एतेषु	क्योंकि इन	काद्रवेया	कद्रूकी सन्तान (नाग)
बिलस्वर्गेषु	बिल स्वर्गोंमें	नित्य प्रमुदितः	सदा प्रसन्न रहते हैं।
स्वर्गात् अपि	स्वर्गसे भी	गृहपतयः	(वे) गृहस्वामी (गृहस्थ) हैं,
अधिक	अधिक	कलत्र अपत्य	स्त्री, पुत्र,
कामभोग	विषय-भोग,	बन्धु सुहृत्	सम्बन्धी, मित्र
ऐश्वर्य आनन्द	ऐश्वर्य, आनन्द,	अनुचराः	सेवक-वर्ग,
भूति विभूतिभिः	सन्तान-सुख, धन-सम्पत्तिसे	अनुरक्त	(उनसे) प्रेम करते हैं।
सुसमृद्ध	पूर्ण सम्पन्न,	ईश्वरात् अपि	ईश्वर द्वारा भी
भवन	भवन हैं,	कामाः	उनके भोगोंमें
उद्यान आक्रीड	बगीचों, क्रीड़ा-स्थलों,		
विहारेषु	घूमनेके मैदानोंमें		
दैत्य दानव	दैत्य, दानव		

प्रतिहत	बाधा नहीं दी जाती।	निवसन्ति	(वहाँ) निवास करते हैं ॥८॥
माया विनोदाः	मायामयी क्रीड़ा करते हुए		

येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नाना-मणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरा-यतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभि-र्विवरेश्वरगृहोत्तमैः समलङ्कृताश्चकासति ॥९॥

येषु महाराज मयेन मायाविना विनिर्मिताः पुरः नाना मणि प्रवर प्रवेक विरचित विचित्र भवन प्राकार गोपुर सभा चैत्य चत्वर आयतन आदिभिः नाग असुर मिथुन पारावत शुकसारिका कीर्ण कृत्रिम भूमिभिः विवर ईश्वर गृह उत्तमैः समलङ् कृताः चकासति ॥९॥

महाराज	महाराज !	चत्वर आयतन	चबूतरे, आँगन
येषु	जिन (लोकों)में	आदिभिः	आदिसे
मायाविना	मायावी	विरचित	बनी हैं (उनमें)
मयेन	मयके द्वारा	नाग असुर	नाग और असुरोंके
विनिर्मिताः	बनायी	मिथुन	जोड़े
पुरः चकासति	पुरियां जगमगा रही हैं।	पारावत, शुक	कबूतर, तोते,
		सारिका कीर्ण	मैनासे भरे हैं।
नाना	अनेक प्रकारके	कृत्रिम भूमिभिः	(ये)बनायी गयी भूमि
मणि प्रवर	श्रेष्ठ मणियोंसे	विवर	विवर (गुफामें)
प्रवेक	जड़ित	ईश्वर गृह	वहाँके स्वामियोंके
विचित्र भवन	विचित्र भवन	उत्तमैः	उत्तम भवनोंसे
प्राकार गोपुर	परकोटे, नगर-द्वार,	समलंकृताः	भली प्रकार अलंकृत हैं ॥९॥
सभा चैत्य	सभाभवन, मन्दिर		

उद्यानानि चातितरां मनइन्द्रियानन्दिभिःकुसुमफलस्तबक-सुभगकिसलयावनतरुचिरविटपविटपिनां लताङ्गालिङ्गितानां

श्रीभिः समिथुनविविधविहङ्गमजलाशयानाममलजलपूर्णानां झष-कुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहि-तशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वना-दिभिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥१०॥

उद्यानानि च अतितरां मन इन्द्रिय आनन्दिभिः कुसुम फल स्तबक सुभग किसलय अवनत रुचिर विटपविटपिनां लता अङ्ग आलिङ्गितानां श्रीभिः समिथुन विविधविहङ्गम जलाशयानां अमल जल पूर्णानां झषकुल उल्लङ्घन क्षुभित नीर नीरज कुमुद कुवलय कह्लार नील उत्पल लोहित शतपत्र आदि वनेषु कृत निकेतनानां एक विहार आकुल मधुर विविध स्वन आदिभिः इन्द्रिय उत्सवैः अमरलोकश्रियं अतिशयितानि ॥१०॥

उद्यानानि च	(वहाँके) बगीचे भी
मन इन्द्रिय	मन, इन्द्रियोंको
अतितरां	अत्यधिक
आनन्दिभिः	आनन्द देते हुए
अमरलोकश्रियं	स्वर्गकी शोभासे
अतिशयितानि	बहुत बढ़ गये हैं।
कुसुम फल	पुष्प और फलोंके
स्तबक	गुच्छोंसे,
सुभाग किसलय	सुन्दर नव-पल्लवोंसे
अवनत	झुकी हुई
लता अंग	लताओंके शरीरसे
आलिङ्गितानां	आलिंगित
रुचिर	मनोहर
विटपविटपिनां	वृक्षोंकी शाखाओंसे
श्रीभिः	सुशोभित हैं।
विविधविहङ्गम	अनेक प्रकारके पक्षी
समिथुन	अपने जोड़ेके साथ (रहते) हैं
अमल	निर्मल
जल पूर्णानां	जलसे भरे
जलाशयानां	जलाशयोंमें
झषकुल	मछलियोंके
उल्लङ्घन	उछलनेसे
क्षुभित नीर	पानीमें क्षोभ होता है (तथा उसमें लगे)
नीरज कुमुद	कमल, कुमुदिनी,
कुवलय कह्लार	श्वेत-कमल, रक्त-कमल,
नील उपल	नील-कमल,
लोहित	लाल-कमल,
शतपत्र आदि	शतपत्र आदि (भी हिलते हैं)
वनेषु	(उस) वनमें
कृत निकेतनानां	घोंसले बनाकर रहनेवाले
एक विहार	अविराम क्रीड़ा करते
आकुल	चञ्चल होकर (अपने)

विविध मधुर वाक् आदिभिः	अनेक प्रकारके मधुर बोली आदिसे	इन्द्रिय उत्सवैः	इन्द्रियोंको आनन्दित करते हैं ॥१०॥

यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥११॥

यत्र ह वाव न भयं अहः रात्र अदिभिः काल विभागैः उपलक्ष्यते ॥११

यत्र ह वाव	जहां तो निश्चित ही	काल विभागैः	समय विभागका
अहः रात्र	दिन और रात रूपी	भयं न	खटका नहीं
आदिभिः	आदिसे	उपलक्ष्यते	दिखाई देता ॥११॥

यत्र हि महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधन्ते ॥१२

यत्र हि महा अहिप्रवर शिरः मणयः सर्वं तमः प्रबाधन्ते ॥१२॥

हि यत्र	क्योंकि जहां	सर्वं तमः	सम्पूर्ण अन्धकार
महा अहिप्रवर	महान् नाग श्रेष्ठोंके	प्रबाधन्ते	दूर करती रहती हैं ॥१२॥
शिरः मणयः	मस्तकोंकी मणियां		

न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥१३॥

न वा एतेषु वसतां दिव्य औषधि रस रसायन अन्न पान स्नान आदिभिः आधयः व्याधयः वली पलित जरा आदयः च देह वैवर्ण्य दौर्गन्ध्य स्वेद क्लम ग्लानिः इति वयः अवस्थाः च भवन्ति ॥१३॥

एतेषु वसतां	इन (लोकों) में रहनेवालोंके	रस	रस
		रसायन	तथा रसायनोंके
दिव्य औषधि	दिव्य औषधियोंके	अन्न पान	खाने, पीने (एवं उनसे)

स्नान आदिभिः	स्नान आदि करनेसे
आधयः व्याधयः	चिन्ता, रोग
वली	झुर्रियां पड़ना,
पलित	केश पकना,
जरा आदयः	बुढ़ापा आदि तथा
देह वैवर्ण्य	शरीरका कान्ति-हीन होना,
दौर्गन्ध्य	(देहसे) दुर्गन्धि आना,
स्वेद	पसीना,
क्लम	थकावट,
ग्लानिः	शिथिलता आना
इति वयः	इस प्रकार आयु (बढ़नेसे) होनेवाली
अवस्थाः च	अवस्थाएँ भी
न वा भवन्ति	नहीं ही होती हैं ॥१३॥

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥१४॥

न हि तेषा कल्याणानां प्रभवति कुतश्चन मृत्युः विना भगवत् तेजसः चक्र अपदेशात् ॥१४॥

हि	क्योंकि
तेषां कल्याणानां	उन पुण्य-पुरुषोंपर
मृत्युः	मृत्यु
भगवत्	भगवान्के
चक्र अपदेशात्	चक्र स्वरूप
तेजसः विना	तेजके बिना
कुतश्चन	किसी प्रकार
न प्रभवति	नहीं प्रभाव डाल सकती ॥१४॥

यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥१५॥

यस्मिन् प्रविष्टे असुर वधूनां प्रायः पुंसवनानि भयात् एव स्रवन्ति पतन्ति च ॥१५॥

यस्मिन्	जिस (चक्र) के
प्रविष्टे	प्रवेश करनेपर
असुर वधूनां	असुर-पत्नियोंके
पुंसवनानि	गर्भ
भयात् एव	भयसे ही
प्रायः स्रवन्ति	स्रवित होते
च पतन्ति	तथा गिर जाते हैं ॥१५॥

अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति यस्य च जृम्भमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदान्ध इव ॥१६॥

अथ अतले मयपुत्रः असुरः बलः निवसति येन ह वा इह सृष्टाः षट् नवतिः माया काश्चन अद्य अपि मायाविनः धारयन्ति यस्य च जृम्भमाणस्य मुखतः त्रयः स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्यः इति या व बिल अयनं प्रविष्टं पुरुषं रसेन हाटक आख्येन साधयित्वा स्वविलास अवलोकन अनुराग स्मित संलाप उपगूहन आदिभिः स्वैरं किल रमयन्ति यस्मिन् उपयुक्ते पुरुषः ईश्वरः अहं सिद्धः अहं इति अयुत महागज बलं आत्मानं अभिमन्यमानः कत्थते मद अन्ध इव ॥१६॥

अथ अतले	उस अतलमें
मयपुत्रः	मयका पुत्र
असुर बलः	असुर बल
निवसति	रहता है।
येन ह वा	जिसको निश्चय ही
सृष्टाः	बनायी हुई
षट् नवतिः	छियानबे प्रकारकी
माया	मायामें से
काश्चन	कोई-कोई
इह मायाविनः	इस संसारमें मायावी लोग
अद्य अपि	अब भी
धारयन्ति	धारण करते हैं।
यस्य च	जिसके कि
जृम्भमाणस्य	जम्हाई लेनेपर
मुखतः	मुखसे
त्रयः स्त्रीगणा	तीन स्त्रीगण
उदपद्यन्त	उत्पन्न हुआ
स्वैरिण्यः	स्वेच्छा चारिणी (उनकी जिससे इच्छा हो उससे व्यभिचार करानेवाली)

कामिन्यः	कामिनियां (जब कामावेश हो तब किसीसे भी व्यभिचार करानेवाली)
पुंश्चल्यः	पुंश्चली (किसी भी पुरुषके संकेतपर व्यभिचारको प्रस्तुत)
इति	इस प्रकारके (स्त्री गण)
या वै	जो निश्चय ही
बिल अयनं	इस बिल-निवासमें
प्रविष्टं	प्रविष्ट
पुरुषं	पुरुषको
रसेन साधयित्वा	(हाटक) रस पिलाकर भोग सक्षम बनाकर
स्वविलास	अपने हाव, भाव,
अवलोकन	कटाक्ष पूर्वक देखने,
अनुराग स्मित	प्रेमभरी मुस्कान,
संलाप	बातचीत
उपगूहन	आलिंगन
आदिभिः	आदि द्वारा
किल स्वैरं	अरे, स्वेच्छा पूर्वक
रमयन्ति	रमण कराती हैं।
यस्मिन्	जिस (हाटक-रसको)
उपयुक्त	उपयोग करके
पुरुषः	पुरुष
मद अन्ध इव	मदसे अन्धा-सा होकर
कत्थते	बकवाद करने लगता है कि
अहं ईश्वरः	'मैं ईश्वर हूँ'
अहं सिद्धः	'मैं सिद्ध हूँ'
इति	इस प्रकार
आत्मानं	अपनेको
अयुत महागज	दस हजार बड़े हाथियोंके
बलं अभि	बलका मानने
मन्यमानः	लगता है ॥१६॥

ततोऽधस्ताद्वितले हरो भगवान हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्मान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥१७॥

ततः अधस्तात् वितले हरः भगवान् हाटकेश्वरः स्वपार्षद भूतगण आवतः प्रजापति सर्ग उपबृंहणाय भवः भवान्या सह मिथुनीभूतं आस्ते

यतः प्रवृत्ता सरित् प्रवरा हाटकी नाम भवयोः वीर्येण यत्र चित्रभानुः मातरिश्वना समिध्मान ओजसा पिबति तत् निष्ठ्यूतं हाटक आख्यं सुवर्णं भूषणेन असुरेन्द्र अवरोधेषु पुरुषाः सह पुरुषीभिः धारयन्ति ॥१७॥

ततः अधस्तात्	उसके नीचे
भगवान्	भगवान्
हाटकेश्वरः	हाटकेश्वर
स्वपार्षद	अपने पार्षद
भूतगण	भूतगणोंसे
आवृतः	घिरे रहते हैं।
प्रजापति सर्ग	प्रजापतिकी सृष्टिका
उपबृंहणाय	विस्तार करनेके लिए
भवः	(वे) भगवान् शिव
भवान्या सह	भगवतीके साथ
मिथुनीभूतं	विहार करते
आस्ते	रहते हैं।
भवयोः वीर्येण	भगवान् शिवके वीर्यसे
हाटकी नाम	हाटकी नामक
सरित् प्रवरा	श्रेष्ठ-नदी
यतः प्रवृत्ता	जहांसे निकलती है,
यत्र चित्रभानुः	जहाँ चित्रभानु नामक अग्नि
मायरिश्वना	वायुके द्वारा
समिध्मानः	प्रज्वलित किया
ओजसा पिबति	उत्साहसे (उसे) पीता है।
तत् निष्ठ्यूतं	उसका थूका हुआ
हाटक आख्यं	हाटक नामके
सुवर्णं	स्वर्णका
भूषणेन	आभूषणके रूपमें
असुरेन्द्र	दैत्यराजके
अवरोधेषु	अन्तःपुरमें
पुरुषाः	पुरुष
पुरुषीभिः सह	स्त्रियोंके साथ
धारयन्ति	पहिनते हैं ॥१७॥

ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥१८॥

ततः अधस्तात् सुतले उदारश्रवाः पुण्यश्लोकः विरोचन आत्मजः बलिः भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेन अदितेः लब्धकायः भूत्वा

ह एव	निश्चित ही	अन्यथा एव	दूसरी ही तरह (बड़े कष्टसे)
प्रतिबाधनं	प्रतिकार	उपलभन्ते	कर पाते हैं ॥२०॥

तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥२१॥

तत् भक्तानां आत्मवतां सर्वेषां आत्मनि आत्मतया एव ॥२१॥

तत् आत्मवतां	अतः संयमी	आत्मतया एव	आत्मरूपसे ही (स्थित) भगवान्‌को भूमिदानका इतना ही फल नहीं हो सकता ॥२१॥
भक्तानां	भक्तोंके लिए		
सर्वेषां	सबके		
आत्मनि	अन्तःकरणमें		

न वै भगवान्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृति-मोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥२२॥

न वै भगवान् नूनं अमुष्य अनुजग्राह यत् उत पुनः आत्मानुस्मृति मोषणं मायामय भोग ऐश्वर्यं एव आतनुते इति ॥२२॥

नूनं	निश्चय	भोग ऐश्वर्यं	भोग ऐश्वर्यं
अमुष्य	इस (बलि) को	एव इति	ही इस प्रकार
यत् उत पुनः	यदि वह फिरसे	आतनुते	प्रदान किया तो
आत्मानुस्मृति	अपनी स्मृति	वै	निश्चय
मोषणं	चुरा लेनेवाला	अनुजग्राहन	कृपा नहीं की ॥२२॥
-मायामय	मायिक		

यत्तद्भगवतानधिगतान्योपायेन याच्ञाच्छलेनापहृतस्व-शरीरावशेषितलोकत्रयो वरुणपाशैश्च सम्प्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥२३॥

यद् तद् भगवता न अधिगत अन्य उपायेन याच्ञा छलेन अपहृत स्वशरीर अवशेषित लोकत्रयः वरुण पाशैः च सम्प्रतिमुक्तः गिरिदर्यां च अपविद्ध इति ह उवाच ॥२३॥

तद् भगवता	उन भगवान्‌को	अपहृत	छीन लिया
अन्य उपायेन	दूसरे उपायसे	वरुण पाशैः	वरुणके पाशसे
यद्	क्योंकि जो	च सम्प्रतिमुक्तः	बाँधे जाकर
अधिगत न	प्राप्त नहीं हुआ	गिरिदर्यां	पर्वतकी गुफामें
याच्ञा छलेन	याचनाके बहाने	अपविद्धः च	डाल दिये जानेपर भी
स्वशरीर	उसके अपने शरीरको	इति ह	इस प्रकार ही
अवशेषित	बचाकर	उवाच	बोला ॥२३॥
लोकत्रयः	तीनों लोक		

बलिरुवाच*

नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यमतिगम्भीरवयसः कालस्य मन्वन्तर परिवृत्तं कियल्लोकत्रयमिदम् ॥२४॥

नूनं बत अयं भगवान् अर्थेषु न निष्णातः यः असौ इन्द्रः यस्य सचिवः मन्त्राय वृतः एकान्ततः बृहस्पतिः तं अतिहाय स्वयं उपेन्द्रेण आत्मानं अयाचत आत्मनः च आशिषः नो एव तत् दास्यं अति गम्भीर वयसः कालस्य मन्वन्तर परिवृत्तं कियत् लोकत्रयं इदम् ॥२४॥

नूनं बत	निश्चय खेदकी बात है कि	यः भगवान्	जो ऐश्वर्य शाली है,
		अर्थेषु	(सच्चे) प्रयोजनमें
यः असौ इन्द्रः	जो यह इन्द्र है,	निष्णातः न	निपुण नहीं है,

* यह उवाच अन्य प्रतियोंमें नहीं है।

यस्य सचिवः	जिसके मन्त्री	च तत् दास्यं	और उनका दास्य
मन्त्राय	मन्त्रणा करनेके लिए	नो एव	नहीं ही (मांगा)
एकान्ततः	अनन्य भावसे स्वीकृत	अति	अत्यन्त
बृहस्पतिः	बृहस्पति हैं	गम्भीर वयसः	गम्भीर (अनन्त) आयु वाले
तं अतिहाय	उनको छोड़कर	कालस्य	कालमें
स्वयं उपेन्द्रेण	स्वयं भगवान् वामन द्वारा	मन्वन्तर	एक मन्वन्तर तक
आत्मानः च	अपने लिए	परिवृत्तं	सीमित
आत्मानं	मुझसे	इदं लोकत्रयं	इन तीन लोकोंका राज्यका
आशिषः	कामना	कियत्	क्या (मूल्य) है ॥२४॥
ययाचत	पूर्ति मांगी		

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतो परते खलु स्वपितरि ॥२५॥

यस्य अनुदास्यं एव अस्मत् पितामहः किल वव्रे न तु स्वपित्र्यं यत् अकुतः भयं पदं दीयमानं भगवतः परमिति भगवत उपरते खलु स्वपितरि ॥२५॥

अस्मत्	हमारे	भगवतः	भगवान्के
पितामहः	पितामह (प्रह्लाद)ने	दीयमानं	देनेपर भी
स्वपितरि	अपने पिता (हिरण्यकशिपु)के	न तु	नहीं ही लिया
उपरते	मर जानेपर	किल	अहो
यत् स्वपित्र्यं	जो अपने पिताका	यस्य	जिनका
अकुतः भयं	सब ओरसे निर्भय	अनुदास्यं	बराबर दासत्व
पदं	स्थान	एव वव्रे	ही मांगा ॥२५॥

तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥२६॥

तस्य महानुभावस्य अनुपथं अमृजित कषायः कः वा अस्मत् विधः परिहीण भगवत अनुग्रह उपजिगमिषति इति ॥२६॥

तस्य	उन	कषायः	करने वाला
महानुभावस्य	महाप्रभावशालीके	कः वा	भला कौन
अनुपथं	पीछे चलनेके मार्गपर	भगवत अनुग्रह	भगवान्की कृपासे
अस्मत् विधः	मेरे समान	परिहीण	वञ्चित
अमृजित	वासना-मलको परिमार्जित न	इति	इस प्रकार
		उपजिगमिषति	पहुँच सकता है ॥२६॥

श्रीशुक उवाच—*

तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन पदा दशकन्धरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥२७॥

तस्य अनुचरितं उपरिष्टात् विस्तरिष्यते यस्य भगवान् स्वयं अखिल जगद्गुरुः नारायणः द्वारि गदापाणिः अवतिष्ठते निजजन अनुकम्पित हृदयः येन अङ्गुष्ठेन पदा दशकन्धरः योजन अयुत अयुतं दिग्विजय उच्चाटितः ॥२७॥

तस्य	उन (वलि)का	जगद्गुरुः	जगतके गुरु
अनुचरितं	चरित	स्वयं नारायणः	स्वयं नारायण
उपरिष्टात्	आगे	निजजन	अपने भक्तपर
विस्तरिष्यते	विस्तार किया जायगा	अनुकम्पित	अनुग्रहपूर्ण
यस्य द्वारि	जिनके द्वारपर	हृदयः	हृदयसे
भगवान्	भगवान्	गदापाणिः	हाथमें गदा लेकर
अखिल	अखिल	अवतिष्ठते	खड़े रहते हैं।
		येन पदा	जिन्होंने पैरके

*यह उवाच अन्य प्रतियोंमें नहीं है।

अंगुष्ठेन	अंगूठेसे	अयुत अयुतं	लाखों
दिग्विजय	दिग्विजय करने आनेपर)	योजन	योजन (दूर)
		उच्चाटितः	फेंक दिया गया ॥२७॥
दशकन्धरः	रावण		

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥२८॥

ततः अधस्तात् तलातले मयः नाम दानवेन्द्रः त्रिपुर अधिपतिः भगवता पुरारिणा त्रिलोक ईशं चिकीर्षुणा निर्दग्ध स्वपुरत्रयः तत् प्रसादात् लब्धपदः मायाविनां आचार्यः महादेवेन परिरक्षितः विगत सुदर्शनभयः महीयते ॥२८॥

ततः अधस्तात्	उस (सुतल-लोक) के नीचे	पुरारिणा	भगवान् त्रिपुरारि द्वारा
तलातले	तलातल-लोकमें	स्वपुरत्रयः	अपने तीनों पुरोंके
मायाविनां	मायावियोंका	निर्दग्ध	जला दिये जानेपर
आचार्यः	आचार्य	महादेवेन	भगवान् शिवकी
मयः नाम	मय नामका	प्रसादात्	कृपासे
दानवेन्द्रः	दानवराज (रहता) है,	लब्धपदः	(तलातलमें) स्थान पाकर
त्रिपुर	(वह) त्रिपुरका	परिरक्षितः	(शिवजीसे) सुरक्षित
अधिपतिः	स्वामी	सुदर्शन	सुदर्शन-चक्रके
त्रिलोक ईशं	त्रिलोकीका स्वामी	भयः विगत	भयसे रहित होकर
चिकीर्षुणा	बननेकी इच्छा करनेपर	महीयते	(वहांके निवासियों द्वारा) सम्मानित होता है ॥२८॥

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित्प्रमत्ता विहरन्ति ॥२९॥

ततः अधस्तात् महातले काद्रवेयाणां सर्पाणां न एक शिरसां क्रोधवशः नाम गणः कुहकः तक्षकः कालियः सुषुणः आदि प्रधाना महाभोगवन्तः पतत्त्रिराज अधिपतेः पुरुष वाहात् अनवरतं उद्विजमानाः स्व कलत्र अपत्य सुहृत कुटुम्बसङ्गेन क्वचित् प्रमत्ता विहरन्ति ॥२९॥

ततः अधस्तात्	उस (तलातल) के नीचे
महातले	महातलमें
काद्रवेयाणां	कद्रू से उत्पन्न
न एक शिरसां	अनेक सिरवाले
सर्पाणां	सर्पोंका
क्रोधवशः नाम	क्रोधवश नामक
गणः	समूह है,
कुहकः सक्षकः	(उनमें) कुहक, तक्षक
कालियः सुषुणः	कालिय, सुषेण
आदि प्रधाना	आदि प्रधान
महाभोगवन्तः	बड़े शरीरवाले हैं,
पतत्त्रिराज	पक्षियोंके नायकोंके भी
अधिपतेः	स्वामी
पुरुष वाहात्	परम पुरुषके वाहन (गरुड़) से
अनवरतं	निरन्तर
उद्विजसानाः	उद्विग्न रहते भी
स्व कलत्र	अपने स्त्री,
अपत्य सुहृत	पुत्र, मित्र,
कुटुम्बसङ्गेन	कुटुम्बकी आसक्तिसे
क्वचित् प्रमत्ता	कभी प्रमत्त होकर
विहरन्ति	विहार करने लगते हैं ॥२९॥

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ॥३०॥

ततः अधस्तात् रसातले दैतेयाः दानवाः पणयः नाम निवात कवचाः कालेयाः हिरण्य पुरवासिनः इति विबुध प्रत्यनीका उत्पत्त्या महा ओजसः महासाहसिनः भगवतः सकल लोक अनुभावस्य हरेः एव तेजसा प्रतिहत बल अवलेपा बिलेशया इव वसन्ति ये वै सरमया इन्द्र दूत्या वाक्भिः मन्त्र वर्णाभिः इन्द्रात् बिभ्यति ॥३०॥

ततः अधस्तात्	उसके नीचे
रसातले	रसातलमें
पणयः नाम	पणि नामक
दैतेयाः दानवाः	दैत्य, दानव (रहते हैं)
निवात कवचाः	निवात कवच,
कालेयाः	कालेय,
हिरण्य	हिरण्य
पुरवासिनः	पुरवासी
इति	इस प्रकार (इनका भेद है।)
विबुध	देवताओंके (ये)
प्रत्यनीका	विरोधी
उत्पत्त्या	जन्मसे
महा ओजसः	बड़े ओजस्वी,
महासाहसिनः	महान् साहसी हैं (किन्तु)
सकल लोक	सब लोकोंमें
अनुभावस्य	प्रभावशाली,
हरेः एव	श्रीहरिके ही
तेजसा	तेजसे
प्रतिहत बल	बलाभिमान नष्ट
अवलेपा	हो जानेसे
बिलेशया इव	बिलमें रहने वालोंके समान (छिपकर)
वसन्ति	रहते हैं।
ये वै	जो निश्चित ही
इन्द्र दूत्या	इन्द्रकी दूती
सरमया	सरमाके
मन्त्र वर्णाभिः	मन्त्राक्षरवाली
वाक्भिः	वाणीके कारण
इन्द्रात्	इन्द्रसे
बिभ्यति	डरते हैं ॥३०॥

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतर-देवदत्तादयो महाभोगिनो महामर्षा निवसन्ति येषामु ह वै पञ्च-सप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥३१॥

ततः अधस्तात् पाताले नागलोक पतयः वासुकि प्रमुखाः शङ्ख कुलिक महाशङ्ख श्वेत धनञ्जय धृतराष्ट्र शङ्खचूड कम्बल अश्वतर देवदत्त आदयः महाभोगिनः महामर्षा निवसन्ति येषां उ ह वै पञ्च सप्त दश शत सहस्र शीर्षाणां फणासु विरचिता महामणयः रोचिष्णवः पाताल विवर तिमिर निकरं स्वरोचिषा विधमन्ति ॥३१॥

ततः अधस्तात्	उसके नीचे
पाताले	पातालमें
नागलोक	नाग-लोकके
पतयः	अधिपति
वासुकि प्रमुखाः	जिनमें वासुको प्रमुख हैं वे
शङ्ख कुलिक	शङ्ख, कुलिक,
महाशङ्ख श्वेत	महाशङ्ख, श्वेत,
धनञ्जय	धनञ्जय,
धृतराष्ट्र	धृतराष्ट्र,
शङ्खचूड कम्बल	शङ्खचूड, कम्बल,
अश्वतर देवदत्त	अश्वतर, देवदत्त,
आदयः	आदि
महाभोगिनः	महाभोग (सर्प देहवाले)
महामर्षा	बड़े क्रोधी
निवसन्ति	रहते हैं।
उ ह वै	निश्चित रूपसे
येषां पाञ्च	जिनके पांच,
सप्त	सात,
दश शत	दस, सौ,
सहस्र शीर्षाणां	सहस्र मस्तक वालोंके
फणासु	फणोंमें
विरचिता	निर्मित
रोचिष्णवः	कान्तिमान
महामणयः	महामणियां
पाताल विवर	पाताल रूपी बिलके
तिमिर निकरं	प्रगाढ़ अन्धकारको
स्वरोचिषा	अपने प्रकाशसे
विधमन्ति	नष्ट कर देती हैं ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे शहवादिस्थितिबिलस्वर्गमर्यादानिरूपणं नाम चतुर्विंशोऽध्यायः ॥२४॥

अथ पञ्चविंशोऽध्यायः

श्रीशुक उवाच-

तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षणमहमित्यभिमानलक्षणं यं सङ्कर्षणमित्याचक्षते ॥१॥

तस्य मूलदेशे त्रिंशत् योजन सहस्र अन्तर आस्ते या वै कला भगवतः तामसी समाख्याता अनन्त इति सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षणं अहं इति अभिमान लक्षणं यं सङ्कर्षणं इति आचक्षते ॥१॥

तस्य	उस (पाताल) के
मूलदेशे	मूल प्रदेशमें
त्रिंशत् सहस्र	तीस हजार
योजन	योजन
अन्तर	दूरीपर
या वै	जो निश्चित
भगवतः	भगवान्की
तामसी कला	तामसी कला
अनन्त इति	अनन्त इस नामसे
समाख्याता	प्रसिद्ध है
आस्ते	(वे) हैं ।
द्रष्टृदृश्ययोः	द्रष्टा और दृश्यको
सङ्कर्षणं	खींचकर एक कर देनेवाले
अहं इति	अहंकार रूपा
अभिमान लक्षणं	अभिमान रूपिणी
यं	जिस (कला) को
सात्वतीया	पाञ्चरात्रके अनुयायी
सङ्कर्षणं	संकर्षण
इति आचक्षते	इस नामसे कहते हैं ॥१॥

यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥२॥

यस्य इदं क्षितिमण्डलं भगवतः अनन्तमूर्तेः सहस्र शिरसि एकस्मिन् एव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥२॥

यस्य सहस्र	जिन एक सहस्र
शिरसि	सिर वाले
अनन्तमूर्तेः	अनन्त मूर्ति
भगवतः	भगवान्‌के
एकस्मिन् एव	एक ही
शीर्षणिध्रियमाणं	सिरपर रखा हुआ
इदं	यह
क्षितिमण्डलं	भूमण्डल
सिद्धार्थं इव	सरसोंके दानेकी भांति
लक्ष्यते	दिखाई देता है ॥२॥

यस्य ह वा इदं कालेनोपसञ्जिहीर्षतोऽमर्षविरचितरुचिर-भ्रमद्भ्रुवोरन्तरेण साङ्कर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्ष-स्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ॥३॥

यस्य ह वा इदं कालेन उपसञ्जिहीर्षतः अमर्ष विरचित रुचिर भ्रमत् भ्रुवोः अन्तरेण साङ्कर्षणः नाम रुद्र एकादश व्यूहः त्र्यक्षः त्रिशिखं शूलं उत्तम्भयन् उदतिष्ठत् ॥३॥

कालेन	प्रलय काल आनेपर
यस्य ह वा इदं	जिनके इस विश्वका निश्चित
उपसञ्जिहीर्षतः	उपसंहार करनेकी इच्छा करनेपर
अमर्ष भ्रमत्	क्रोधसे घूमती
रुचिर विरचित	मनोहर हो गयी
भ्रुवोः अन्तरेण	भृकुटियोंके मध्य भागसे
साङ्कर्षणः नाम	सांकर्षण नामक
एकादश व्यूहः	ग्यारह व्यूह वाले
त्र्यक्षः रुद्र	त्रिनयन रुद्र
त्रिशिखं शूलं	त्रिशूल
उत्तम्भयन्	उठाये
उदतिष्ठत्	उत्पन्न हो जाते हैं ॥३॥

यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिषण्डमण्डलेष्वहि-पतयः सह सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुण्डलप्रभामण्डितगण्डस्थलान्यतिमनोहराणि प्रमुदित-मनसः खलु विलोकयन्ति ॥४॥

यस्य अङ्घ्रि कमल युगल अरुण विशद नख मणिषण्ड मण्डलेषु अहि-पतयः सह सात्वत ऋषभैः एकान्त भक्तियोगेन अवनमन्तः स्ववदनानि परिस्फुरत् कुण्डल प्रभामण्डित गण्डस्थलानि अति मनोहराणि प्रमुदित-मनसः खलु विलोकयन्ति ॥४॥

अरुण मणिषण्ड	लाल-मणियोंके समान
विशद	स्वच्छ
नख मण्डलेषु	नख मण्डलवाले
यस्य अङ्घ्रि	जिनके दोनों
कमल युगल	चरण-कमलों
एकान्त	अनन्य
भक्तियोगेन	भक्ति-भावसे
सात्वत ऋषभैः	प्रधान भक्तोंके
सह	साथ
अवनमन्तः	प्रणाम करते समय
अहिपतयः	नागराज गण
परिस्फुरत्	चमकते हुए
कुण्डल	कुण्डलोंकी
प्रभामण्डित	कान्तिसे शोभित
गण्डस्थलानि	कपोलोंवाले
अति	अत्यन्त
मनोहराणि	सुन्दर
स्ववदनानि	अपने मुखोंको
विलोकयन्ति	देखते हैं तो
खलु	अहो (उनका)
प्रमुदित मनसः	चित्त प्रसन्न हो जाता है ॥४॥

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्ग-वलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगुरु-चन्दनकुङ्कुमपङ्कानुलेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदय-मकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णि-तारुणकरुणावलोकनयनवदनारविन्दं सव्रीडं किल विलोक-यन्ति ॥५॥

यस्य एव हि नागराज कुमार्यः आशिष आशासांनाः चारु अङ्ग वलय विलसित विशद विपुल धवल सुभग रुचिर भुज रजत स्तम्भेषु अगुरु चन्दन कुङ्कुम पङ्क अनुलेपेन अवलिम्पमानाः तत् अभिमर्शन उन्मथित हृदय मकरध्वज आवेश रुचिर ललित स्मिताः तद् अनुराग मद मुदित मद विघूर्णित अरुण करुण अवलोक नयन वद अरविन्दं सव्रीडं किल विलोक यन्ति ॥५॥

नागराज	नागराजोंकी
कुमार्यः	कुमारियां
हि यस्य एव	क्योंकि जिनसे ही
आशिष	(अपनी) कामनाओं (की पूर्ति) को
आशासाना:	चाहती हैं,
चारु अङ्ग	मनोहर शरीरकी
वलय विलसित	कङ्कण भूषित
विशद विपुल	स्वच्छ विशाल,
धवल सुभग	श्वेत, सुडौल,
रुचिर	सुन्दर
रजत	चांदीके
स्तम्भेषु	खम्भोंके समान
भुज	भुजाओंपर
अगुरु चन्दन	अरगजा, चन्दन,
कुङ्कुम पङ्क	केशरके पङ्क
अनुलेपन	अङ्गराग
अवलिम्पमाना:	लगाते समय
तत् अभिमर्शन	उन (भुजाओं) के स्पर्शसे
उन्मथित हृदय	मथित होते हृदयमें
मकरध्वज	काम
आवेश	आवेशसे
रुचिर	मनोहर
ललित स्मित	सुन्दर मुस्कान सहित
तत्	उनके
अनुराग मद	प्रेम मदसे
मुदित	प्रफुलत
मद विघूर्णित	मद-विह्वल
करुण अवलोक	कृपावलोकन युक्त
अरुण नयन	लाल नेत्रों वाले
वदनारविन्दं	मुख-कमलको
किल सव्रीडं	सलज्ज ही
विलोकयन्ति	देखती हैं ॥५॥

स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव उप-संहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥६॥

स एव भगवान् अनन्त: अनन्त गुण अर्णव आदिदेव उपसंहृत अमर्ष रोषवेग: लोकानां स्वस्तय आस्ते ॥६॥

स एव	वही
अनन्त गुण	अनन्त गुणोंके
अर्णव	समुद्र
आदिदेव	आदिदेव
भगवान् अनन्त:	भगवान् अनन्त
लोकानां	लोकोंके (समस्त)
स्वस्तय	कल्याणके लिए
अमर्ष	(अपनी) असहनशीलता और
रोषवेग:	क्रोधके वेगको
उपसंहृत	रोके हुए
आस्ते	विराजमान हैं ॥६॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान्माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्ति ॥७॥

ध्यायमानः सुर असुर उरग सिद्ध गन्धर्व विद्याधर मुनिगणैः अनवरत मदमुदित विकृत विह्वल लोचनः सुललित मुखरिक अमृतेन आप्यायमानः स्वपार्षद विबुध यूथपतीन् अपरिम्लानराग नवतुलसिका आमोद मधु आसवेन माद्यन् मधुकर व्रात मधुर गीत श्रियं वैजयन्तीं स्वां वनमालां नीलवासा एक कुण्डलः हल ककुदि कृत सुभग सुन्दर भुजः भगवान् माहेन्द्रः वारणेन्द्र इव काञ्चनीं कक्षां उदार लीलः बिभर्ति ॥७॥

सुर असुर	देवता, असुर,
उरग सिद्ध	नाग, सिद्ध,
गन्धर्व	गन्धर्व,
विद्याधर	विद्याधर
मुनिगणैः	मुनिगणों द्वारा
ध्यायमानः	(उनका) ध्यान किया जाता है।
अनवरत	(वे) निरन्तर
मदमुदित	(प्रेम) मदसे मुदित,
विकृत विह्वल	चञ्चल और विह्वल
लोचनः	नेत्र वाले हैं।
स्वपार्षद	अपने पार्षद
विबुध यूथपतीन्	देव-यूथपोंको
सुललित	अत्यन्त सुन्दर
मुखरिक अमृतेन	वचनामृतसे
आप्यायमानः	सन्तुष्ट करते रहते हैं।
अपरिम्लानराग	जिसकी शोभा कभी कुम्हलाती नहीं उस
नवतुलसिका	नवीन तुलसीकी
आमोद	सुगन्धि और
मधु आसवेन	मधुर-मकरन्द
माद्यन्	पीकर मतवाले हुए
मधुकर व्रात	भौंरोंके झुण्डकी

मधुर गीत श्रियं	मधुर गुंजारकी शोभावाली
स्वां वैजयन्तीं	अपनी वैजयन्ती
वनमालां	वनमालाको
माहेन्द्रः वारणेन्द्र	इन्द्रके गजराज (ऐरावत)
काञ्चनीं कक्षां	गलेमें पड़ी स्वर्ण शृंखला
इव	की भाँति (तथा)
नीलवासा	नीलाम्बर,
एककुण्डलः	एक ही कुण्डल
कृत हल ककुदि	पीठके ककुदपर रखा हल
सुभग सुन्दर	सुडौल सुन्दर
भुजः	भुजा (हाथ) में
उदार लीलः	(वे) उदार लीलामय
बिभर्ति	धारण करते हैं ॥७॥

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थि सत्त्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥८॥

य एष एवं अनुश्रुतः ध्यायमानः मुमुक्षूणां अनादि काल कर्म वासना ग्रथितं अविद्यामयं हृदयग्रन्थि सत्त्व रजः तमोमयं अन्तः हृदयं गतः आशु निर्भिनत्ति तस्य अनुभावान् भगवान् स्वायम्भुवः नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥८॥

य एष	जो ये (भगवान् अनन्त)
एवं अनुश्रुतः	इस प्रकार (माहात्म्य) बार-बार सुननेसे तथा
ध्यायमानः	ध्यान करनेसे
अन्तः हृदयं गतः	हृदयके भीतर प्रकट होकर
मुमुक्षूणां	मोक्षकी इच्छा वालोंकी
अनादि काल	अनादि कालसे
कर्म वासना	कर्म-वासनासे
ग्रथितं	उलझी
सत्त्व रजः	सत्त्व, रज,
तमोमयं	तम गुणमयी
अविद्यामयं	अविद्यारूपी
हृदयग्रंथि	हृदय-ग्रन्थिको
आशु निर्भिनत्ति	शीघ्र काट देते हैं,
तस्य अनुभावान्	उनके प्रभावोंका
ब्रह्मणः सभायां	ब्रह्माकी सभामें.

स्वायम्भुवः	ब्रह्माजीके पुत्र	तुम्बुरुणा सह	तुम्बुरु (गन्धर्व) के साथ
भगवान् नारदः	भगवान् नारदने	संश्लोकयामास	गान किया ॥८॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः

सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् ।

यद्रूपं ध्रुवमकृतं यदेकमात्मन्

नानाधात्कथमु ह वेद तस्य वर्त्म ॥९॥

उत्पत्ति स्थिति लय हेतवः अस्य कल्पाः सत्त्व आद्याः प्रकृति गुणाः यत् ईक्षया आसन् यत् रूपं ध्रुवं अकृतं यत् एकं आत्मन् नानाधात् कथं उ ह वेद तस्य वर्त्म ॥९॥

उत्पत्ति स्थिति लय	उत्पत्ति, स्थिति, प्रलयके	ध्रुवं अकृतं	ध्रुव (अनन्त) अकृत (अनादि) है,
हेतवः	कारण	यत् एक आत्मन्	जो अकेले होते हुए
अस्य कल्पाः	इन्होंने ही कल्पित किये हैं,	नानाधात्	(इस) नानात्मक (प्रपञ्च) को धारण किए हैं,
सत्त्व आद्याः	सत्त्व आदि	तस्य वर्त्म	उनके मार्ग (स्वरूप) को
प्रकृति गुणाः	प्रकृतिके गुण		
यत् ईक्षया	जिनकी दृष्टि पड़नेसे	उ ह	निश्चित रूपसे
आसन्	उत्पन्न हुए,	कथं वेद	(कोई) कैसे जान सकता है ॥९॥
यत् रूपं	जिनका स्वरूप		

मूर्तिं नः पुरुकृपया बभार सत्त्वं

संशुद्धं सदसदिदं विभाति यत्र ।

यल्लीलां मृगपतिराददेऽनवद्या-

मादातुं स्वजनमनांस्युदारवीर्यः ॥१०॥

मूर्तिं नः पुरु कृपया बभार सत्त्वं संशुद्धं सद् असद् इवं विभाति यत्र
यत् लीलां मृगपतिः आददे अनवद्यां आदातुं स्वजन मनांसि उदार वीर्यः ॥१०

यत्र	जिनमें यह	आदातुं	ग्रहण (आकर्षित) करनेके लिए
सद् इवं	कारण कार्य रूप		
असद्	(जगत)	नः पुरु कृपया	हमपर बहुत कृपा करके
विभाति	भास रहा है,		
यत् अनवद्यां	जिनकी निष्कलंक	संशुद्धम् सत्त्वं	शुद्ध सत्त्व-गुणमयी
लीलां	लीलाको (आदर्श मानकर)	मूर्ति	श्रीविग्रह
		उदार वीर्यः	(उन) उदार पराक्रमने
मृगपतिः आददे	सिंहने अपनाया है,		
स्वजन मनांसि	अपने जनोंके मनको	बभार	धारण किया है ॥१०

यन्नाम श्रुतमनुकीर्तयेदकस्मा-
दार्तो वा यदि पतितः प्रलम्भनाद्वा ।
हन्त्यंहः सपदि नृणामशेषमन्यं
कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥११॥

यत् नाम श्रुतं अनुकीर्त येत् अकस्मात् आर्तः वा यदि पतितः प्रलम्भनात् वा हन्ति अंहः सपदि नृणां अशेषं अन्यं कं शेषात् भगवतः आश्रयेन् मुमुक्षुः ॥११॥

यत् श्रुतं नाम	जिनका सुना हुआ नाम	हन्ति	(वह नाम) नष्ट कर देता है।
अकस्मात्	अचानक	मुमुक्षुः	मुमुक्षु (पुरुष)
यदि आर्तः	यदि दुःखी	भगवतः शेषात्	(ऐसे) भगवान् शेषसे
वा पतितः	या पतित (पुरुष)		
वा प्रलम्भनात्	अथवा हँसीमें	अन्यं	भिन्न
अनुकीर्त येत्	ले लेता है तो	कं आश्रयेन्	किसका आश्रय ले सकता है ॥११॥
सपदि नृणां	तुरन्त उस मनुष्यके		
अशेषं अंहः	सम्पूर्ण पापोंको		

मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो
भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादनिमितविक्रमस्य भूम्नः
को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥१२॥

मूर्धनि अर्पितं अणुवत् सहस्र मूर्ध्नः भूगोलं सगिरि सरित् समुद्र सत्त्वं आनन्त्यात् अनिमित विक्रमस्य भूम्नः कः वीर्याणि अधिगणयेत् सहस्र जिह्वः ॥१२॥

सगिरि सरित्	पर्वतों, नदियों,	आनन्त्यात्	अनन्त होनेके कारण
समुद्र सत्त्वं	समुद्रों तथा प्राणियों सहित	अनिमित	अपरिमित
भूगोलं	पृथ्वी-मण्डल	विक्रमस्य भूम्नः	पराक्रम विभुके
सहस्र मूर्ध्नः	(उन) सहस्रशीर्षके	वीर्याणि	पराक्रमोंको
मूर्धनि	एक मस्तकपर	सहस्र जिह्वः	सहस्र जीभवाला भी
अणुवत् अर्पितं	एक अणुके समान रखा है,	कः अधिगणयेत्	गणना कौन कर सकता है ॥१२॥

एवम्प्रभावो भगवाननन्तो
दुरन्तवीर्योरुगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो
यो लीलया क्ष्मां स्थितये बिभर्ति ॥१३॥

एवं प्रभावः भगवान् अनन्तः दुरन्त वीर्यः उरु गुण अनुभावः मूले रसायः स्थितः आत्मतन्त्रः यः लीलया क्ष्मां स्थितये बिभर्ति ॥१३॥

एवं प्रभावः	ऐसे प्रभावशाली	रसायः मूले	रसातलके मूलमें
दुरन्त वीर्यः	अनन्त पराक्रम	स्थितः	स्थित होकर
उरुगुण	बहुत (असंख्य) गुण	स्थितये	(संसारको) स्थितिके लिए
अनुभावः	प्रभाव वाले		
आत्मतन्त्रः	स्वतन्त्र (होनेपर भी)	लीलया	लीला पूर्वक
यः भगवान्	जो भगवान्	क्ष्मां बिभर्ति	पृथ्वीको धारण करते हैं ॥१३॥
अनन्तः	अनन्त		

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्मविनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥१४॥

एता हि एव इह नृभिः उपगन्तव्या गतयः यथा कर्म विनिर्मिता यथा उपदेशं अनुवर्णिताः कामान् कामयमानैः ॥१४॥

कामान्	भोगोंको	एता हि एव	इतनी ही मात्र
कामयमानैः	चाहनेवाले	गतयः	गतियां हैं,
नृभिः	मनुष्योंकी	यथा उपदेशं	जैसा गुरुमुखसे सुना था
यथा कर्म	कर्मानुसार	अनुवर्णिताः	वर्णन कर दिया ॥१४॥
विनिर्मिता	बनी हुई		
उपगन्तव्या	पहुँचनेकी		
इह	इस (संसार) में		

एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥१५॥

एतावतीः हि राजन् पुंसः प्रवृत्ति लक्षणस्य धर्मस्य विपाक गतयः उच्च अवचा विसदृशा यथाप्रश्नं व्याचख्ये किं अन्यत् कथयाम इति ॥१५॥

राजन्	राजन् !	गतयः	गतियां
पुंसः	मनुष्यको	एतावतीः हि	इतनी ही हैं
प्रवृत्ति लक्षणस्य	प्रवृत्ति रूप	यथाप्रश्नं	(तुम्हारे) प्रश्नके अनुसार
धर्मस्य	धर्मके		
विपाक	परिणाममें (प्राप्त होने वाली)	व्याचख्ये	बतला दीं।
		इति	इस प्रकार
उच्च अवचा	ऊँची, नीची,	अन्यत् किं	और क्या
विसदृशा	परस्पर विलक्षण	कथयाम	बतलाऊँ ? ॥१५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भूविवरविध्युपवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः

राजोवाच

महर्षं एतद्वैचित्र्यं लोकस्य कथमिति ॥१॥

महर्षं एतत् वैचित्र्यं लोकस्य कथं इति ॥१॥

महर्ष	महर्षि !	**इति**	इस प्रकार
लोकस्य	लोगोंकी (इतनी विभिन्न)	**एतत्**	यह
वैचित्र्यं	विचित्रता	**कथं**	क्यों है ॥१॥

श्रीशुक उवाच-*

त्रिगुणतवात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वाएव सर्वस्य तारतम्येन भवन्ति ॥२॥

त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथक् विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥२॥

कर्तः	कर्ताके	**पृथक् विधाः**	भिन्न-भिन्न प्रकार-की
श्रद्धया	(और) श्रद्धाके भी	**सर्वा एव**	सभी (गतियां)
त्रिगुणत्वात्	त्रिगुणात्मक (सात्विक, राजस, तामस) होनेसे	**तारतम्येन**	कम-अधिक
		सर्वस्य	सबकी
कर्मगतयः	कर्मकी गतियां	**भवन्ति**	होती हैं ॥२॥

---

* अन्य प्रतियोंमें यहाँ 'ऋषिरुवाच' है ।

अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धया वैसादृश्यात्कर्मफलं विसदृशं भवति या ह्यनाद्यविद्यया कृत-कामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥३॥

अथ इदानीं प्रतिषिद्ध लक्षणस्य अधर्मस्य तथा एव कर्तुः श्रद्धया वैसादृश्याद् कर्मफलं विसदृशं भवति या हि अनादि अविद्यया कृत कामानां तद् परिणाम लक्षणाः सृतयः सहस्रशः प्रवृत्ताः तासां प्राचुर्येण अनुवर्ण-यिष्यामः ॥३॥

प्रतिषिद्ध	निषिद्ध
लक्षणस्य	कर्मरूप अधर्मके
कर्तुः श्रद्धया	कर्ताकी श्रद्धाके
वैसादृश्यात्	विषम होनेसे
तथा एव	वैसे ही
कर्मफलं	(उनके) कर्मका फल
विसदृशं भवति	असमान होता है।
या हि	जो कि
अनादि	अनादि
अविद्यया	अविद्याके वशमें
कृत कामानां	कामना पूर्वक किए गये कर्म
तद् परिणाम	उनके परिणाम
लक्षणाः सृतयः	स्वरूप गतियां
सहस्रशः	हजारों
प्रवृत्ताः	चल रही हैं
अथ इदानीं	अब इस समय
तासां प्राचुर्येण	उनका विस्तारसे
अनुवर्णयिष्यामः	वर्णन करूँगा ॥३॥

राजोवाच—

नरका नाम भगवन् किं देशविशेषा,अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥४॥

नरका नाम भगवन् किं देश विशेषा अथवा बहिः त्रिलोक्या आहो-स्वित् अन्तराल इति ॥४॥

भगवन्	भगवन् !
नरका नाम	नरक नामक
किं देश विशेषा	क्या (पृथ्वीके ही) देश विशेष हैं,

अथवा	अथवा
बहिः त्रिलोक्या	तीनों लोकोंसे बाहर हैं,
आहोस्वित्	अथवा
अन्तराज इति	इसी प्रकार (भूविलोंकी भाँति पृथ्वीके) भीतर (कहीं) हैं ॥४॥

श्रीशुक उवाच-*

अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भू-मेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ॥५॥

अन्तराल एव त्रिजगति अस्तु दिशि दक्षिणस्यां अधस्तात् भूमेः उपरिष्टात् च जलात् यस्यां अग्निष्वात्त आदयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एव आशिष आशासाना निवसन्ति ॥५॥

त्रिजगति	त्रिलोकीके
अन्तराल एव	भीतर ही हैं।
अस्तु	अस्तु
दिशि दक्षिणस्यां	दक्षिण दिशामें
भूमेः अधस्तात्	पृथ्वीसे नीचे
च जलात्	और जलके
उपरिष्टात्	ऊपर हैं।
यस्यां दिशि	जिस दिशामें
अग्निष्वात्त	अग्निष्वात्त
आदयः	आदि
पितृगणा	पितृगण
स्वानां गोत्राणां	अपने वंशजोंके लिए
परमेण	अत्यन्त
समाधिना	एकाग्रता पूर्वक
सत्या एव	सत्य होनेवाली
आशिष	मंगल
आशासाना	कामना करते
निवसन्ति	बसते हैं ॥५॥

यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥६॥

* अन्य प्रतियोंमें यहाँ 'ऋषिरुवाच' है।

यत्र ह वाव भगवान् पितृराजः वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैः जन्तुषु सम्परेतेषु यथा कर्म अवद्यं दोषं एव अनुल्लङ्‌घित भगवत् शासनः सगणः दमं धारयति ॥६॥

यत्र ह वाव	जहां निश्चित ही
पितृराजः	पितृराज
वैवस्वतः	सूर्य-पुत्र (यम)
भगवत् शासनः	भगवान्‌की आज्ञाका
अनुल्लङ्घित	उल्लंघन न करके
स्वपुरुषैः	अपने दूतों द्वारा
सम्परेतेषु जन्तुषु	मृत प्राणियोंको
स्वविषयं	अपने सम्मुख
प्रातितेषु	लानेपर
यथा कर्म अवद्यं	(उनके) दुष्कर्मोंके अनुसार
दोषं एव	पापके ही फलस्वरूप
सगणः	अपने गणोंके साथ
दमं धारयति	दण्ड देते हैं ॥६॥

तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामस्तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः सन्दंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयः पानमिति । किञ्च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥७॥

तत्र ह एके नरकान् एकविंशतिं गणयन्ति अथ तांस्ते राजन् नाम रूप लक्षणतः अनुक्रमिष्यामः तामिस्रः अन्धतामिस्रः रौरवः महारौरवः कुम्भीपाकः कालसूत्रं असिपत्रवनं सूकर मुखं अन्धकूपः कृमिभोजनः सन्दंशः तप्तसूर्मिः वज्र कण्टक शाल्मली वैतरणी पूयोदः प्राणरोधः विशसनं लाला भक्षः सारमेयादनं अवीचिः अयः पानं इति किञ्च क्षारकर्दमः रक्षोगण भोजनः शूलप्रोतः दन्दशूकः अवट निरोधनः पर्यावर्तनः सूचीमुखं इति अष्टाविंशतिः नरका विविध यातना भूमयः ॥७॥

तत्र ह एके	कोई-कोई वहां तो	वैतरणी पूयोद:	वैतरणी, पूयोद
नरकान्	नरकोंकी	प्राणरोध:	प्राणरोध,
गणयन्ति	गणना	विशसनं	विशसन,
एकविंशति	इक्कीस करते हैं।	लालाभक्ष:	लालाभक्ष,
राजन्	राजन् !	सारमेयादनं	सारमेयादन
अथ तांस्ते	अब उनको तुम्हें	अवीचि:	अवीचि,
नाम रूप	नाम, रूप,	अय: पानं	अय: पान
लक्षणत:	लक्षण सहित	इति	इस प्रकार
अनुक्रमिष्याम:	क्रमश: बतलाता हूँ,	किञ्च	इनके अतिरिक्त
तामिस्र:	तामिस्र,	क्षारकर्दम:	क्षारकर्दम,
अन्धतामिस्र:	अन्धतामिस्र	रक्षोगण	रक्षोगण
रौरव:	रौरव,	भोजन:	भोजन,
महारौरव:	महारौरव,	शूलप्रोत:	शूलप्रोत,
कुम्भीपाक:	कुम्भीपाक,	दन्दशूक:	दन्दशूक,
कालसूत्रं	कालसूत्र,	अवट निरोधन:	अवट निरोधन,
असिपत्रवनं	असिपत्रवन,	पर्यावर्तन:	पर्यावर्तन,
सूकरमुख:	सूकरमुख,	सूचीमुखं	सूचीमुखं
अन्धकूप:	अन्धकूप,	इति	इस प्रकार
कृमिभोजन:	कृमिभोजन,	अष्टाविंशति:	अट्ठाइस
सन्दंश:	सन्दंश,	नरका:	नरक
तप्तसूर्मि:	तप्तसूर्मि,	विविध यातना	अनेक प्रकारकी यातनाके
वज्रकण्टक	वज्रकण्टक		
शाल्मली	शाल्मली,	भूमय:	स्थान हैं ॥७॥

तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अनशनानुदपानदण्डताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥८॥

तत्र य: तु परवित्त अपत्य कलत्राणि अपहरति स हि कालपाश बद्ध: यमपुरुषै: अतिभयानकै: तामिस्रे नरके बलात् निपात्यते अनशन अनुदपान

दण्ड ताडन संतर्जन आदिभिः यातनाभिः यात्यमानः जन्तुः यत्र कश्मलं आसादितः एकदैव मूर्छा उपयाति तामिस्रप्राये ॥८॥

तत्र यः तु	वहां जो भी	तामिस्रप्राये	उस अन्धकार-पूर्ण (नरक) में
परवित्त	दूसरेके धन,	अनशन-	अन्न-जल
अपत्य कलत्राणि	पुत्र, स्त्री आदिका	अनुदपान	न देते,
अपहरति	हरण करता है	दंड ताडन	डंडेसे मारने,
स हि	वह निश्चय	संतर्जन	डांटने
अतिभयानकैः	अत्यन्त भयानक	आदिभिः	आदि
यमपुरुषैः	यमदूतों द्वारा	यातनाभिः	पीड़ाओं द्वारा
कालपाश बद्धः	कालपाशमें बाँधकर	यात्यमानः	पीड़ित किए जानेपर
तामिस्रे नरके	तामिस्र नरकमें	एकदैव	एकाएक
बलात्	बलपूर्वक	मूर्छा उपयाति	मूर्छित हो जाता है ॥८॥
निपात्यते	गिरा दिया जाता है।		

एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥९॥

एवं एव अन्ध तामिस्रे यः तु वञ्चयित्वा पुरुषं दारादीन् उपयुङ्क्ते यत्र शरीरी निपात्यमानः यातनास्थः वेदनया नष्टमतिः नष्ट दृष्टिः च भवति यथा वनस्पतिः वृश्च्यमान मूलः तस्मात् अन्धतामिस्रं तं उपदिशन्ति ॥९॥

एवं एव	इसी प्रकार	उपयुङ्क्ते	उपभोग करता है (वह)
यः तु पुरुषं	जो कि पुरुषको	यत्र अन्ध-तामिस्रे	जिस अन्ध-तामिस्र (नरक) में
वञ्चयित्वा	धोखा देकर	निपात्यमानः	गिराये जानेपर
दारादीन्	(उसकी) पत्नी आदिका		

शरीरी	प्राणी	यथा वनस्पतिः	जैसे वृक्ष
यातनास्थः	यातना पाते हुए	वृश्च्यमान मूलः	जड़ काटे जानेपर,
वेदनया	पीड़ासे (उसकी)	तस्मात् तं	इसलिए उसे
नष्टमतिः	बुद्धि नष्ट हो जाती है,	अन्धतामिस्रं	अन्धतामिस्र
च नष्ट दृष्टिः	और दृष्टि नष्ट हो जाती है,	उपदिशन्ति	कहते हैं ॥९॥

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥१०॥

यः तु इह वा एतत् अहं इति मम इदं इति भूतद्रोहेण केवलं स्व-कुटुम्बं एव अनुदिनं प्रपुष्णाति स तत् इह विहाय स्वयं एव तत् अशुभेन रौरवे निपतति ॥१०॥

यः तु इह वा	जो भी इस (संसार) में	स्वकुटुम्बं एव	अपने कुटुम्बका ही
एतत् अहं	'यह शरीर मैं हूँ'	अनुदिनं	प्रतिदिन
इति	इस प्रकार	प्रपुष्णाति	पोषण करता है
मम इदं	'ये मेरे हैं'	स तत्	वह उस (शरीर और परिवार) को
इति	इस प्रकार (अहंता ममता करके)	इह विहाय	यहीं छोड़कर
भूतद्रोहेण	प्राणियोंसे द्रोह करके	स्वयं एव	स्वयं ही
केवलं	केवल	तत् अशुभेन	उस पापसे
		रौरवे निपतति	रौरव नरकमें गिरता है ॥१०॥

ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहू रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥११॥

ये तु इह यथा एव अमुना विहिंसिता जन्तवः परत्र यमयातनां उपगतं त एव रुरवः भूत्वा तथा तं एव विहिंसन्ति तस्मात् रौरवं इति आहू रुरुः इति सर्पात् अतिक्रूर सत्त्वस्य अपदेशः ॥११॥

इह	इस लोकमें	रुरवः भूत्वा	रुरु होकर
ये तु जन्तवः	जो भी प्राणी	तथा तं एव	उसी प्रकार उसे ही
यथा एव	जैसे	विहिंसन्ति	मारते हैं,
अमुना	इसके द्वारा	तस्मात्	इसलिए
विहिंसिता	मारे गये हैं,	रौरवं इति आहू	(उस नरकको) रौरव कहते हैं।
परत्र	परलोकमें	रुरु इति	रुरु यह
यमयातनां	यम-यातना	सर्पात् अतिक्रूर	सर्पसे भी अत्यन्तक्रूर
उपगतं	पाने पहुँचनेपर	सत्त्वस्य अपदेशः	प्राणीका नाम है ॥११॥
त एव	वही (उसके द्वारा मारे गये प्राणी)		

एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः ॥१२॥

एवं एव महारौरवः यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवः तं क्रव्येण घातयन्ति यः केवलं देहम्भरः ॥१२॥

एवं एव	इसी प्रकार	यत्र निपतितं	(उसके) जहां गिरनेपर
महारौरवः	महारौरव नरक है	क्रव्यादा नाम	क्रव्याद नामके
यः केवलं	जो केवल (दूसरेकी चिन्ता छोड़कर)	रुरवः	(कच्चा मांस खानेवाले) रुरु
देहम्भरः	अपने शरीरका ही पोषक रहा है	तं क्रव्येण	उसे मांसके लोभसे
		घातयन्ति	मारते हैं ॥१२॥

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥१३॥

यः तु इह वा उग्रः पशून् पक्षिणः वा प्राणत उपरन्धयति तं अपकरुणं पुरुषादैः अपि विगर्हितं अमुत्र यम अनुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥१३॥

यः तु	जो भी कोई	पुरुषादैः अपि	राक्षसोंसे भी (अधिक)
उग्रः	क्रूर	विगर्हितं	निन्दितको
इह	इस लोकमें	अमुत्र	यमलोकमें
पशून् वा पक्षिणः	पशुओं या पक्षियोंको	यम अनुचराः	यमराजके सेवक
प्राणत	जीवित	कुम्भीपाके	कुम्भीपाक (नरक)में
उपरन्धयति	पकाता है	तप्ततैले	खौलते तेलमें
तं अपकरुणं	उस हृदयहीन	उपरन्धयन्ति	राँधते हैं ॥१३॥

यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ॥१४॥

यः तु इह पितृ विप्र ब्रह्म ध्रुक् स कालसूत्र संज्ञके नरके अयुत योजन परिमण्डले ताम्रमये तप्तखले उपरि अधस्तात् अग्नि अर्काभ्यां अतितप्यमाने अभिनिवेशितः क्षुत् पिपासाभ्यां च दह्यमानः अन्तः बहिः शरीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावत् वर्ष सहस्राणि ॥१४॥

यः तु इह	जो भी इस लोकमें	संज्ञके	नामक
पितृ विप्र	पिता-माता, ब्राह्मण तथा	नरके	नरकमें
		अभिनिवेशितः	डाला जाता है।
ब्रह्म ध्रुक्	वेदसे द्रोह करता है,	ताम्रमये	(वह) तांबेका बना है।
स कालसूत्र	वह काल सूत्र		

अयुत योजन	दस हजार योजन	पशुरोमाणि	उस नर पशुमें
परिमण्डले	घेरेका	यावन्ति च	जितने भी
उपरि अधस्तात्	ऊपर और नीचे	रोमाणि	रोम हैं,
अग्नि अर्काभ्यां	अग्नि और सूर्य द्वारा	तावत् वर्ष	उतने वर्ष-
तप्तबले	तपता मैदान है,	सहस्राणि	सहस्र तक
अतितप्यमाने	अत्यन्त तपाया जाता है।	आस्ते शेते	कभी बैठता है, लेटता है,
क्षुत् पिपासाभ्यां	(इसमें) भूख प्याससे	चेष्टते	छटपटाता है,
अन्तः बहिः	बाहर-भीतरसे	अवतिष्ठति	खड़ा रहता है,
शरीर च	शरीर भी	परिधावति	(कभी) दौड़ता है ॥१४॥
दह्यमानः	जलता हुआ		

यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगत-स्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते ॥१५॥

यः तु इह वै निजवेद पथात् अनापदि अपगतः पाखण्डं च उपगतः तं असिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्र ह असौ इतस्ततः धावमानः उभयतः धारैः तालवन असिपत्रैः छिद्यमान सर्वाङ्गः हा हतोऽस्मि इति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्ड अनुगतं फलं भुङ्क्ते ॥१५॥

यः तु इह	जो भी यहां	उपगतः	अपनाता है,
अनापदि	आपत्तिकाल न होनेपर भी	तं	उसे
		असिपत्रवनं	असिपत्रवनमें
निजवेद पथात्	अपने वैदिक मार्गको	प्रवेश्य	ले जाकर
अपगतः	छोड़कर	कशया प्रहरन्ति	कोड़ोंसे मारते हैं,
च पाखण्डं	अन्य पाखण्ड (धर्म)	तत्र ह असौ	वहां तो यह

इतस्ततः	इधर-उधर
धावमानः	दौड़ता हुआ
तालवन	तालवनके
असिपत्रैः	तलवारके समान पत्तोंसे
सर्वाङ्गः	सब
छिद्यमानः	अंगोंके कटनेसे
'हा हतोऽस्मि'	'हाय मारा गया'
इति	इस प्रकार (चिल्लाता)
परमया वेदनया	घोर पीड़ासे
मूर्च्छितः	मूर्छित होता
पदे पदे	पद-पदपर
निपतति	गिरता है,
स्वधर्महा	(इस प्रकार) अपने धर्मको छोड़नेवाला
पाखण्ड अनुगतं	पाखण्डके पीछे जानेका
फलं भुङ्क्ते	फल भोगता है ॥१५॥

यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥१६॥

यः तु इह वै राजा राजपुरुषः वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान् नरके अमुत्र सूकरमुखे निपतति तत्र अतिबलैः विनिष्पिष्यमाण अवयवः यथा इव इह इक्षु खण्ड आर्तस्वरेण स्वनयन् क्वचित् मूर्च्छितः कश्मलं उपगतः यथैव इह अदृष्ट दोषा उपरुद्धाः ॥१६॥

यः तु इह वै	जो भी इस लोकमें तो
राजा वा	राजा या
राजपुरुषः	राजकर्मचारी
अदण्ड्ये	निरपराधको
दण्डं वा	दण्ड देते अथवा
ब्राह्मणे	ब्राह्मणको
शरीरदण्डं	शारीरिक दण्ड
प्रणयति	देते हैं,
स पापीयान्	वह पापिष्ठ
अमुत्र	उस लोकमें
सूकरमुखे	सूकर मुख
नरके निपतति	नरकमें गिरता है।
यथा इव इह	जैसे इस लोकमें
इक्षु खण्डः	गन्नोंको (पेरते हैं)
तत्र अतिबलैः	वहाँ बहुत बलवान (यमदूत द्वारा)
विनिष्पिष्यमाण	पीसे (कुचले) जाते

अवयवः	अंगोंसे
यथा इव इह	जंसे इस लोकमें
अदृष्ट दोषा	निरपराध लोग
उपरुद्धाः	सताये जानेपर
कश्मलं उपगतः	कष्ट पाते थे
आर्तस्वरेण	आर्त स्वरसे
स्वनयन्	चिल्लाता हुआ,
क्वचित् मूर्च्छितः	कभी मूर्छित हो जाता है ॥१६॥

यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्त परव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहयनिद्रानिर्वृतिरलब्धास्थानः परिक्रामति यथा कुशरीरे जीवः ॥१७॥

यः तु इह वै भूतानां ईश्वर उपकल्पित वृत्तीनां अविविक्त परव्यथानां स्वयं पुरुष उपकल्पित वृत्तिः विविक्त परव्यथः व्यथां आचरति स परत्र अन्धकूपे तत् अभिद्रोहेण निपतति तत्र ह असौ तैः जन्तुभिः पशु मृग पक्षि सरीसृपैः मशक यूका मत्कुण मक्षिकादिभिः ये के च अभिद्रुग्धाः तैः सर्वतः अभिद्रुह्यमाणः तमसि विहत निद्रा निर्वृतिः अलब्ध अवस्थानः परिक्रामति यथा कुशरीरे जीवः ॥१७॥

यः तु इह वै	जो कोई भी इस लोकमें
स्वयं परव्यथः	स्वयं दूसरोंकी पीड़ा
विविक्त	समझनेवाला (होकर)
पुरुष उपकल्पित	परमात्मा द्वारा दी गयी
वृत्तिः	(विधि-निषेधयुक्त) आजीविकावाला
परव्याथानां	दूसरेकी पीड़ा
अविविक्त	न जाननेवाले
ईश्वर	ईश्वर
उपकल्पित	प्रदत्त
वृत्तीनां	आजीविकावाले
भूतानां	प्राणियोंको
व्यथां आचरति	पीड़ा देता है,
स परत्र	वह परलोकमें
तत् अभिद्रोहेण	उस द्रोहके कारण
अन्धकूपे	अन्धकूप नरकमें
निपतति	गिरता है,
तत्र ह असौ	वहां तो यह
जन्तुः	प्राणी

पशु मृगपक्षि	पशु, मृग, पक्षी,
सरीसृपैः मशक	सर्पादि सरकनेवाले, मच्छर
यूका मत्कुण	जोंक, खटमल
मक्षिकादिभिः	मक्खियों द्वारा
ये के च	जिस किसीसे भी
अभिद्रुग्धाः	द्रोह किया था
तैः	उनके द्वारा
सर्वतः	चारों ओरसे
अभिद्रुह्यमाणः	द्रोह किये (सताये) जानेसे
विहत निद्रा	निद्रा और शान्ति
निर्वृतिः	नष्ट हो जाती है,
अलब्ध	स्थान न
अवस्थानः	मिलनेसे
यथा कुशरीरे	जैसे रोगी
जीवः	शरीरमें जीव
परिक्रामति	छटपटाता-घूमता रहता है ॥१७॥

यस्त्विह वा असंविभज्याश्नाति यत्किञ्चनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥१८॥

यः तु इह वा असंविभज्य अश्नाति यत् किञ्चित् न उपनतं अनिर्मित पञ्चयज्ञः वायस संस्तुतः स परत्र कृमिभोजने नरक अधमे निपतति तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिः एव भक्ष्यमाणः कृमि भोजनः यावत् तत् अत्त अप्रहुत आदो अनिर्वेशं आत्मानं यातयते ॥१८॥

यः तु इह वा	जो भी इस लोकमें ही
यत् किञ्चित्	जो कुछ भी
उपनतं	मिला है उसे
असंविभज्य	बिना बांटे ही
पञ्चयज्ञः	पञ्च-महायज्ञ
अनिर्मित	किये बिना
अश्नाति	खा लेता है,
वायस संस्तुतः	(उसे) कौएके समान कहा गया है
स परत्र	वह परलोकमें
कृमिभोजने	कृमिभोजन नामक
नरक अधमे	अधम नरकमें
निपतति	गिरता है।
तत्र	वहाँ
शतसहस्रयोजने	एक लाख योजनके

कृमिकुण्डे	कीड़ोंके कुण्डमें
कृमिभूतः	कीड़ा होकर
कृमिभिः एव	कीड़ोंके द्वारा ही
भक्ष्यमाणः	खाया जाता हुआ
स्वयं	स्वयं
कृमि भोजनः	कीड़े ही खाता है।
यावत् तत्	जब तक उस
न अत्त	न बांटने
अप्रहुत	पञ्च-महायज्ञ न करने
आदो आत्मानं	आदि अपने (पापों-का)
अनिर्वेशं	प्रायश्चित नहीं हो जाता
यातयते	कष्ट भोगता रहता है ॥१८॥

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः सन्दंशैस्त्वचि निष्कुषन्ति ॥१९॥

यः तु इह वै स्तेयेन बलात् वा हिरण्य रत्न आदीनि ब्राह्मणस्य वा अपहरति अन्यस्य वा अनापदि पुरुषः तं अमुत्र राजन् यमपुरुषाः अयस्मयैः अग्निपिण्डैः सन्दंशैः त्वचि निष्कुषन्ति ॥१९॥

राजन्	राजन्!
यः तु इह वै	जो भी इस लोकमें तो
स्तेयेन	चोरीसे
वा बलात्	अथवा बलपूर्वक
ब्राह्मणस्य	ब्राह्मणका
वा अनापदि	अथवा आपत्ति न होनेपर भी
अन्यस्य	दूसरे किसीका
हिरण्य वा	सोना अथवा
रत्न आदीनि	रत्न आदि
अपहरति	अपहरण करता है
अमुत्र	परलोकमें
तं पुरुषः	उस प्राणीको
यमपुरुषाः	यमराजके सेवक
सन्दंशैः	सन्दंश नरकमें
अयस्मयैः	लोहेसे बने
अग्निपिण्डैः	तप्त गोलेसे
निष्कुषन्ति	चमड़ेको दागते हैं
सन्दंशै	संडासीसे
त्वचि	बाल खींचते हैं ॥१९॥

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥२०॥

यः तु इह वा अगम्यां स्त्रियं अगम्यं वा पुरुषं योषित् अभिगच्छति ताः अमुत्र कशया ताडयन्तः तिग्मया सूर्म्या लोहमय्या पुरुषं आलिङ्ग यन्ति स्त्रियं च पुरुष रुपया सूर्म्या ॥२०॥

यः तु इह वा	जो भी कोई इस लोकमें	कशया ताडयन्तः	कोड़ोंसे मारते हुए
अगम्यां स्त्रियं	अगम्या स्त्रीसे	लोहमय्या	लोहेसे बनी
वा अगम्यं पुरुषं	अथवा अगम्य पुरुषसे	तिग्मया सूर्म्या	तप्त स्त्री मूर्तिसे
योषित्	स्त्री	च स्त्रियं	और स्त्रीको
अभिगच्छति	सहवास करती है	पुरुष रुपया	पुरुषाकृति
ताः अमुत्र	उन दोनोंको परलोकमें	सूर्म्या	तप्त मूर्तिसे
		आलिङ्ग यन्ति	आलिगन कराते हैं ॥२०।

यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कषन्ति ॥२१॥

यः तु इह वै सर्व अभिगमः तं अमुत्र निरये वतमानं वज्र कण्टक शालमलीं आरोप्य निष्कर्षन्ति ॥२१॥

यः तु इह वै	जो भी तो इस लोकमें	वज्र कण्टक	वज्रके समान कांटो वाले
सर्व अभिगमः	(पशु आदि) सभीसे व्यभिचार करता है	शल्मलीं	सेमर-वृक्षपर
		आरोप्य	चढ़ाकर
अमुत्र तं	परलोकमें उसे	निष्कर्षन्ति	नीचे खींचते हैं ॥२१
निरये वर्तमानं	नरकमें ले जाकर		

ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ॥२२

ये तु इह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्न मर्यादाः तस्यां निरय परिखा भूतायां नद्यां यादो गणैः इतः ततः भक्ष्यमाणः आत्मना न वियुज्यमानाः च असुभिः उह्यमानाः स्व अघेन कर्मपाकं अनुस्मरन्तः विट् मूत्र पूय शोणित केश नख अस्थि मेदः मांस वसा वाहिन्यां उपतप्यन्ते ॥२२॥

ये तु इह	जो भी इस लोकमें
वै राजन्या	कोई राजा
वा राजपुरुषा	अथवा राजकर्मचारी
अपाखण्डा	पाखण्डी न होनेपर भी
धर्मसेतून्	धर्मकी मर्यादाको
भिन्दन्ति	तोड़ते हैं,
सम्परेत्य	मरनेपर
ते भिन्न मर्यादाः	वे मर्यादा तोड़नेवाले
वैतरण्यां	वैतरणीमें
निपतन्ति	गिरते हैं,
तस्यां	उस
निरय परिखा	नरककी खाईके
भूतायां	समान
विट् मूत्र पूय	विष्ठा, मूत्र, पीव,
शोणित केश	रक्त केश,
नख	नख,
अस्थि	हड्डी,
मेदः मांस	मज्जा, मांस,
वसा वाहिन्यां	चर्बी बहनेवाली
नद्यां	नदीमें
यादो गणैः	जलचरों द्वारा
इतः ततः	जहां-तहांसे
भक्ष्यमाणा	खाये जाते हुए भी
आत्मना	शरीर
वियुज्यमानाः	छूटता नहीं,
असुभिः	प्राण उसे
उह्यमानाः	ढोये जाते हैं,
स्व अघेन	अपने पापका
कर्म पाकं	कर्म-फल
अनुस्मरन्तः	बार-बार स्मरण करते हुए
उपतप्यन्ते	सन्तप्त होते रहते हैं ॥२२॥

ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्त-लज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममला-पूर्णार्णवे निपतन्ति तदेवातिबीभत्सितमश्नन्ति ॥२३॥

ये तु इह वै वृषलीपतयः नष्ट शौच आचार नियमाः त्यक्त लज्जाः पशुचर्यां चरन्ति ते च अपि प्रेत्य पूय विट् मूत्र श्लेष्म मल आपूर्णं अर्णवे निपतन्ति तत् एव अति बीभत्सितं अश्नन्ति ॥२३॥

ये तु इह वं	जो कोई भी तो इस लोकमें	ते च अपि प्रेत्य	वे भी मरकर
शौच	पवित्र	पूय विट् मूत्र	पीव, विष्ठा, मूत्र,
आचार नियमाः	आचरणके नियमोंके	श्लेष्म मल	कफ, मलसे
नष्ट	नष्ट करके	आपूर्ण अर्णवे	भरे हुए समुद्रमें
त्यक्त लज्जाः	निर्लज्ज होकर	निपतन्ति	गिरते हैं
वृषलीपतयः	भ्रष्ट शूद्राओंको रखकर	तत् एव	उसी
पशुचर्यां चरन्ति	पशुओंके समान आचरण करते हैं,	अति बीभत्सितं	अत्यन्त घृणित वस्तुओंको
		अश्नन्ति	खाते हैं ॥२३॥

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि सम्परेताँल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति ॥२४॥

ये तु इह वै श्व गर्दभ पतयः ब्राह्मण आदयः मृगया विहाराः अतीर्थे च मृगान् निघ्नन्ति तान् अपि सम्परेतान् लक्ष्य भूतान् यम पुरुषाः इषुभिः विध्यन्ति ॥२४॥

ये तु इह	जो कोई इस लोकमें	मृगान् निघ्नन्ति	पशुओंको मारते हैं,
ब्राह्मण	ब्राह्मण	तान् अपि	उनको भी
आदयः वै	आदि (द्विज) होकर भी	सम्परेतान्	मरनेपर
श्व गर्दभ पतयः	कुत्ते या गधे पालते हैं,	यम पुरुषाः	यमराजके सेवक
मृगया विहाराः	आखेट खेलते हैं,	लक्ष्य भूतान्	लक्ष्य बनाकर
अतीर्थे अपि	आखेट-शास्त्रके विपरीत भी	इषुभिः	वाणोंसे
		विध्यन्ति	मारते हैं ॥२४॥

ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिँल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसन्ति ॥२५॥

ये तु इह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तान् अमुष्मिन् लोके वैशसे नरके पतितान् निरय पतयः यातयित्वा विशसन्ति ॥२५॥

वै	चाहे	अमुष्मिन् लोके	परलोकमें
इह	इस लोकमें	वैशसे नरके	वैशस नरकमें
ये तु	जो भी	पतितान्	गिराकर
दाम्भिका	पाखण्डी लोग	निरय पतयः	उस नरकके नायक-लोग
दम्भयज्ञेषु	पाखण्डपूर्ण यज्ञमें	यातयित्वा	पीड़ा दे देकर
पशून् विशसन्ति	पशुओंका वध करते हैं,	विशसन्ति	मारते हैं ॥२५॥
तान्	उनको		

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काम-मोहितस्तं पापकृतममुत्र रेतः कुल्यायां पातयित्वा रेतः सम्पाय-यन्ति ॥२६॥

यः तु इह वै सवर्णां भार्यां द्विजः रेतः पाययति काममोहितः तं पापकृतं अमुत्र रेतः कुल्यायां पातयित्वा रेतः सम्पाययन्ति ॥२६॥

वै	चाहे	तं पापकृतं	उस पाप करने वालेको
यः तु द्विजः	जो कोई द्विजाति	अमुत्र	परलोकमें
इह	इस लोकमें	रेतः कुल्यायां	रेतः कुल्यामें
काममोहितः	कामातुर होकर	पातयित्वा	गिराकर
सवर्णां भार्यां	अपने वर्णको पत्नीको	रेतः	वीर्य
रेतः पाययति	वीर्यपान कराता है	सम्पाययन्ति	पिलाते हैं ॥२६॥

ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ॥२७॥

ये तु इह वै दस्यवः अग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानः राजभटा वा तान् च अपि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिः च सरभसं खादन्ति ॥२७॥

ये तु इह	जो भी इस लोकमें	वा सार्थान्	अथवा व्यापारियोंके दलको
वै दस्यवः	चाहे डाकू हों	विलुम्पन्ति	लूट लेते हैं,
वा राजानः	अथवा राजा या	तान् च	उनको भी
राजभटा	राज-सैनिक,	अपि हि	निश्चय ही
अग्निदा	कहीं (किसीके घरमें) आग लगा देते हैं	यमदूता	यमके दूत
		सप्तशतानि	सात सौ
गरदा	(किसीको) विष दे देते हैं,	वज्रदंष्ट्राः	वज्र जैसे दांत वाले
		श्वानः	कुत्ते
ग्रामान्	गावोंको	सरभसं खादन्ति	बड़े वेगसे काटते हैं ॥२७॥

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित्स वै प्रेत्य नरकेऽवीचिमत्यधः शिरा निरवकाशे योजनशतोच्छ्रायाद् गिरिमूर्ध्नः सम्पात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥२८॥

यः तु इह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके अवीचिमति अधः शिरा निरवकाशे योजनशत उच्छ्रायात् गिरिमूर्ध्नः सम्पात्यते यत्र जलं इव स्थलं अश्मपृष्ठं अवभासते तत् अवीचिमत् तिलशः विशीर्यमाण शरीरः नम्रियमाणः पुनः आरोपितः निपतति ॥२८॥

यः तु इह वा	जो भी कोई इस लोकमें	वा दाने	अथवा दानमें
		साक्ष्ये	गवाही देनेमें
द्रव्यविनिमये	धनके लेन-देनमें	कथञ्चित्	किसी भी प्रकार

अनृतं वदति	झूठ बोलता है
स वै प्रेत्य	निश्चय वह मरकर
अवीचिमति	अवीचिमान्
नरके	नरकमें
अधः शिरा	नीचे सिर करके
योजनशत	सौ योजन
उच्छ्रायात्	ऊँचाईसे
निरवकाशे	ठोस
गिरिमूर्ध्नः	पहाड़की चोटीपर
सम्पात्यते	गिराया जाता है,
यत्र जलं इव	जहां जलकी भांति
अश्मपृष्ठं	पत्थरका ठोस
स्थलं	स्थल
अवभासते	प्रतीत होता है।
तत् अवीचिमत्	इसीसे उसका नाम अवीचिमान है,
तिलशः	(वहां गिराये जाने पर) तिलके बराबर
विशीर्यमाण	टुकड़े
शरीरः	शरीरके हो जाते हैं; पर
नम्रियमाणः	मरता नहीं
पुनः आरोपितः	बार-बार ऊपर ले जाकर
निपतति	पटका जाता है ॥२८

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादस्तेषां निरयं नीतानामुरसि पदाऽऽक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥२९॥

यः तु इह वै विप्रः राजन्यः वैश्यः वा सोमपीथः तत् कलत्रं वा सुरां व्रतस्थः अपि वा पिबति प्रमादतः तेषां निरयं नीतानां उरसि पदा आक्रम्य आस्ये वह्निना द्रव्यमाणं कार्ष्ण आयसं निषिञ्चन्ति ॥२९॥

यः तु इह वै	जो भी इस लोकमें कोई
विप्रः राजन्यः	ब्राह्मण, क्षत्रिय
वा वैश्यः	अथवा वैश्य
व्रतस्थः अपि	व्रती होनेपर भी
वा	अथवा
प्रमादतः	प्रमादवश
सोमपीथः	सोमपान करता है
वा तत् कलत्रं	अथवा उसकी पत्नी
सुरां पिबति	मदिरा पीती है
तेषां	उनको
निरय नीतानां	नरक ले जानेपर
उरसि पदा	छातीको पैरसे
आक्रम्य	दबाकर
आस्ये	मुखमें
वह्निना द्रवमाणं	आगसे पिघलाया
कार्ष्णं आयसं	शीशा (काला लोहा)
निषिञ्चन्ति	डालते हैं ॥२९॥

अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते ॥३०॥

अथ च यः तु इह वा आत्म सम्भावनेन स्वयं अधमः जन्म तपः विद्या आचार वर्ण आश्रमवतः वरीयसः न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरये अवाक्शिरा निपातितः दुरन्ता यातना हि अश्नुते ॥३०॥

अथ च	और भी,	**न बहु मन्येत**	आदरणीय नहीं मानता
यः तु वा	जो भी कोई	**स मृतक एव**	वह (जीता हुआ भी) मरे जैसा ही है
इह	इस लोकमें	**मृत्वा**	मरकर
स्वयं अधमः	स्वयं निम्न श्रेणीका होनेपर भी	**क्षारकर्दमे**	क्षार कर्दम
आत्म	अपनेको	**निरये**	नरकमें
सम्भावनेन	बड़ा मानेके कारण	**अवाक्शिरा**	नीचे सिर किये
जन्म तपः विद्या	कुल, तपस्या, विद्या,	**निपातितः**	गिराया जाता है,
आचार	आचार,	**दुरन्ता**	अपार
वर्ण आश्रमवतः	वर्ण, आश्रमसे	**यातना हि**	कष्ट ही
वरीयसः	अपनेसे श्रेष्ठको*	**अश्नुते**	भोगता है ॥३०॥

ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इव निहता यमसदने यातयन्तो

* सनातन-धर्मके अनुसार त्यागी सबसे बड़ा है। ब्राह्मणोंमें क्रमशः त्याग, तप, विद्या आयुसे बडप्पन होता है।

क्षत्रियोंमें त्याग, तप, विद्या, बल (सैन्यबल एवं शस्त्र-बल, देह-बल) से बडप्पन होता है।

वैश्यमें विद्या, धन तथा आयुसे क्रमशः बडप्पन होता है, शूद्रमें वह जिसका सेवक है उसके बड़प्पनसे और आयुसे बड़प्पन होता है।

रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः ॥३१॥

ये तु इह वं पुरुषाः पुरुषमेधेन यजन्ते याः च स्त्रियः नृपशून् खादन्ति तान् च ते पशव इव निहता यमसदने यातयन्तः रक्षोगणाः सौनिका इव स्वधितिना अवदाय असृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथा इह पुरुषादाः ॥३१॥

ये तु वं	जो भी कोई	यातयन्तः	पीड़ा देते हुए
पुरुषाः इह	पुरुष इस लोकमें	सौनिका इव	कसाईके समान
पुरुषमेधेन	नरमेध द्वारा	यथा इह	जैसे इस लोकमें
यजन्ते	यज्ञ करते हैं,	पुरुषादाः	नरभक्षी-पुरुष (करते थे)
च याः स्त्रियः	और जो स्त्रियां	स्वधितिना	अपनी कुल्हाड़ीसे
	पशुओंकी भांति	अवदाय	काटकर
नृपशून्	पुरुषोंको	असृक् पिबन्ति	(उनका) रक्त पीते हैं,
खादन्ति	खा जाती हैं,	च नृत्यन्ति	और नाचते
तान् च ते	उनको वे ही	च गायन्ति	तथा गाते
पशव इव	पशुके समान	हृष्यमाणा	हर्षित होते हैं ॥३१॥
निहताः	मारे गये लोग		
यमसदने	यमलोकमें		
रक्षोगणाः	राक्षस होकर		

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृता-नुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्य-माना आत्मशमलं स्मरन्ति ॥३२॥

ये तु इह वा अनागसः अरण्ये ग्रामे वा वैश्रम्भकैः उपसृतान् उप-विश्रम्भय्य जिजीविषून् शूल सूत्र आदिषु उपप्रोतान् क्रीडनकतया यातयन्ति ते अपि च प्रेत्य यमयातनासु शूल आदिषु प्रोत आत्मानः क्षुत् तृट्भ्यां च

अभिहताः कङ्क वट आदिभिः च इतः ततः तिग्मतुण्डैः आहन्यमाना आत्म शमलं स्मरन्ति ॥३२॥

ये तु वा	जो कोई भी	प्रेत्य	मरनेपर
इह	इस लोकमें	यमयातनासु	यम-यातनाके समय
अनागसः	निरपराध	शूल आदिषु	शूलप्रोत आदि नरकोंमें
जिजीविषून्	जीनेकी इच्छा रखनेवाले	प्रोत आत्मानः	(शूलसे) उनको वेधा जानेपर
ग्रामे वा अरण्ये	गाँव या वनमें	क्षुत् तृट्भ्यां	भूख-प्याससे
वैश्रम्भकैः	विश्वास दिलानेके उपायोंसे	च अभिहताः	भी सताये जानेपर
उपविश्रम्भय्य	विश्वास दिलाकर	कङ्क वट	कङ्क, वटेर
उपसृतान्	समीप आयोंको	आदिभिः	आदि द्वारा
शूल सूत्र आदिषु	काटें या सूत आदिमें	च इतः ततः	भी जहां-तहां
उपप्रोतान्	बींधकर या बाँधकर	तिग्मतुण्डैः	तीखी चोचोंसे
क्रीडनकतया	खिलवाड़ करते हुए	आहन्यमाना	मारे जानेपर
यातयन्ति	पीड़ा देते हैं,	आत्म शमलं	अपने पापोंको
ते अपि च	उनको भी	स्मरन्ति	स्मरण करते हैं ॥३२॥

ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥३३॥

ये तु इह वै भूतानि उद्वेजयन्ति नराः उल्बण स्वभावा यथा दन्दशूकाः ते अपि प्रेत्य नरके दन्दशूक आख्ये निपतन्ति यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखाः उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥३३॥

ये तु वैं	जो कोई भी	उल्बण स्वभावा	उग्र स्वभाव
इह	इस लोकमें	नराः	पुरुष
नृप	राजन् !		

यथा दन्दशूकाः	जैसे सर्पके समान
भूतानि	प्राणियोंको
उद्वेजयन्ति	उद्विग्न करते हैं
ते अपि प्रेत्य	वे भी मरकर
दन्दशूक आख्ये	दन्दशूक नामक
नरके निपतन्ति	नरकमें गिरते हैं
यत्र पञ्चमुखाः	जहां पांच मुखवाले,
सप्तमुखाः	सात मुख
दन्दशूकाः	वाले सर्प
यथा बिलेशयान्	चूहोंके समान (उन्हें)
उपसृत्य	पास आकर
ग्रसन्ति	निगल लेते हैं ॥३३॥

ये त्विह वा अन्धावटकुसूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥३४॥

ये तु इह वा अन्ध अवट कुसूल गुहादिषु भूतानि निरुन्धन्ति तथा अमुत्र तेषु एव उपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥३४॥

ये तु इह	जो कोई इस लोकमें
अन्ध अवट	अँधेरी खत्तियों,
कुसूल	कोठों
वा गुहादिषु	अथवा गुफादिमें
भूतानि	प्राणियोंको
निरुन्धन्ति	बन्द कर देते हैं
अमुत्र	परलोकमें
तथा तेषु एव	वैसे ही उन्ही स्थानोंमें
उपवेश्य	प्रवेश कराके
सगरेण	विषैले
वह्निना धूमेन	अग्नि-धूममें
निरुन्धन्ति	घुटने डालते हैं ॥३४

यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥३५॥

यः तु इह वा अतिथीन् अभ्यागतान् वा गृहपतिः असकृत् उपगत-मन्युः दिधक्षुः इव पापेन चक्षुषा निरीक्षते तस्य च अपि निरये पापदृष्टेः अक्षिणी वज्रतुण्डा गृध्राः कङ्क काक वट आदयः प्रसह्य उरु बलात् उत्पाटयन्ति ॥३५॥

यः तु वा	जो कोई भी
इह	इस लोकमें
गृहपतिः	गृहस्थ
अतिथीन्	अतिथिको
वा अभ्यागतान्	अथवा अभ्यागतको*
असकृत्	बार-बार
उपगतमन्युः	क्रोधमें भरकर
दिधक्षुः इव	मानो जला देगा इस प्रकार
पापेन चक्षुषा	पाप दृष्टिसे
निरीक्षते	देखता है,
तस्य च अपि	उसके भी
पापदृष्टेः	पाप-दृष्टि वालेके
अक्षिणी निरये	नेत्र नरकमें
वज्रतुण्डा	वज्रके समान चोंचवाले
गृधाः कङ्क	गोध, कंक,
काक वट	कौए, बटेर
आदयः	आदि
प्रसह्य बलात्	अत्यन्त बलात्कार से
उत्पाटयन्ति	उखाड़ (निकाल) लेते हैं ॥३५॥

यस्त्विह वा आढ्याभिमतिरहङ्कृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥३६॥

यः तु इह वा आढ्याभिमतिः अहङ्कृतिः तिर्यक् प्रेक्षणः सर्वतः अभिविशङ्की अर्थव्ययनाश चिन्तया परिशुष्यमाण हृदयवदनः निर्वृति अनवगतः ग्रह इव अर्थं अभिरक्षति स च अपि प्रेत्य तत् उत्पादन उत्कर्षण संरक्षण शमल ग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतः अङ्गेषु सूत्रैः परिवयन्ति ॥३६॥

---

* बिना सूचना अचानक आये अपरिचितको अतिथि कहते हैं और परिचित, सम्बन्धी सूचना देकर या बिना सूचना आवें तो अभ्यागत कहे जाते हैं; किन्तु भिक्षुक अतिथि या अभ्यागत नहीं माना जाता।

यः तु वा	जो कोई भी
इह आढ्या-	इस लोकमें अपनेको
भिमतिः	धनी माननेवाला
अहङ्कृतिः	अहंकारी
तिर्यक् प्रेक्षणः	टेढी आंखसे देखने-वाला
सर्वतः अभिविशङ्की	सब ओरसे सबपर सन्देह करनेवाला,
अर्थव्ययनाश	धनके खर्च या नाशकी
चिन्तया	चिन्तासे
परिशुष्यमाण	सूखते
हृदयवदनः	चित्त और मुखसे
निर्वृतिं	चैन न
अनवगतः	पाकर
ग्रह इव अर्थं	यक्षकी भांति धनको
अभिरक्षति	रक्षा किया करता है,
स च अपि प्रेत्य	वह भी मरकर
तत् उत्पादन	उस (धन) के उपार्जन,
उत्कर्षण	बढ़ाने और
संरक्षण	रक्षणमें
शमलग्रह	हुए पापोंसे
सुचीमुखे नरके	सूची मुख नरकमें
निपतति	गिरता है,
यत्र ह वित्तग्रहं	जहां कि (उस) अर्थ-पिशाच
पापपुरुषं	पापी-पुरुषके
सर्वतः अङ्गेषु	सभी अंगोंको
वायका इव	दर्जीकी भांति
धर्मराजपुरुषा	यमराजके सेवक
सुत्रैः परिवयन्ति	धागेसे सीते हैं ॥३६

एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति ॥३७॥

एवं विधा नरकः यम आलये सन्ति शतशः सहस्रशः तेषु सर्वेषु च सर्व एव अधर्म र्वातनः ये केचित् इह उदिता अनुदिताः च अवनिपते पर्यायेण विशन्ति तथा एव धर्म अनुर्वातनः इतरत्र इह तु पुनः भवे त उभय शेषाभ्यां निविशन्ति ॥३७॥

अवनिपते	राजन् !
एवं विधा	इस प्रकारके
नरकाः	नरक
यम आलये	यमलोकमें
शतशः	सैकड़ों,
सहस्रशः सन्ति	हजारों हैं,

तेषु सर्वेषु च	उन सबमें ही
ये केचित् इह	जो कोई यहां
उदिता	बतलाते गये,
च अनुदिताः	और नहीं बतलाये गये
सर्व एव अधर्म	सभी अधर्म
वर्तिनः	करनेवाले
पर्यायेण	बारी-बारीसे
विशन्ति	जाते हैं
तथा एव	इसी प्रकार
धर्म अनुवर्तिनः	धर्म करनेवाले
इतरत्र	दूसरी ओर (स्वर्गादिमें जाते हैं)
पुनः इह तु भवे	फिर इस लोकमें जन्म लेनेवाले
त उभय	उन दोनों
शेषाभ्यां	(पाप-पुण्य) के बचे भागसे
निविशन्ति	आते हैं ॥३७॥

निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ एतावानेवाण्ड-कोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयम-नुर्वर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥३८॥

निवृत्ति लक्षण मार्गः आदाः एव व्याख्यातः एतावान् एव अण्डकोशः यः चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत् तद् भगवतः नारायणस्य साक्षात् महापुरुषस्य स्थविष्ठं रूपं आत्ममाया गुणमयं अनुर्वर्णितं आदृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनः अग्राह्यं अपि श्रद्धा भक्ति विशुद्ध बुद्धिः वेद ॥३८॥

निवृत्ति लक्षण	निवृत्तिरूप
मार्गः आदाः एव	मार्ग पहिले ही
व्याख्यातः	बतलाया गया है।
एतावान् एव	इतना ही
अण्डकोशः	ब्रह्माण्ड है
यः पुराणेषु	जो पुराणोंमें
चतुर्दशधा	चौदह
विकल्पित	लोकोंके रूपमें
उपगीयते	वर्णन किया जाता है,
यत् तद्	जो कि
साक्षात्	साक्षात्
महापुरुषस्य	परमपुरुष
भगवतः	भगवान्
नारायणस्य	नारायणके

आत्ममाया	अपनी मायाके	स उपगेयं	वह शास्त्र वर्णित
गुणमयं	गुणोंसे बना	परमात्मनः	परमात्माके
स्थविष्ठं रूपं	स्थूल रूपके	अग्राह्यं अपि	अग्राह्य स्वरूपको भी
अनुवर्णितं	वर्णनको	श्रद्धा भक्ति	श्रद्धा भक्तिसे
आदृतः पठति	आदर पूर्वक पढ़ता है,	विशुद्ध बुद्धिः	शुद्ध हुई बुद्धिसे
शृणोति	सुनता है,	वेद	जान सकता है ॥३८
श्रावयति	सुनाता है,		

श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः ।
स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥३९॥

श्रुत्वा स्थूलं तथा सूक्ष्म रूपं भगवतः यतिः स्थूले निर्जितं आत्मानं शनैः सूक्ष्मं धिया नयेत् इति ॥३९॥

यतिः	यत्नशील	स्थूले	स्थूल रूपमें
भगवतः	भगवान्‌के	निर्जितं आत्मानं	चित्त लग जानेपर
स्थूलं तथा	स्थूल तथा	धिया शनैः	बुद्धिके द्वारा धीरे-धीरे
सूक्ष्म	सूक्ष्म	इति सूक्ष्मं	इस प्रकार सूक्ष्ममें
रूपं श्रुत्वा	रूपका (वर्णन) श्रवण करके	नयेत्	ले जाय ॥३९॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्र-
पातालदिङ्‌नरकभागणलोकसंस्था ।
गीता मया तव नृपाद्‌भुतमीश्वरस्य
स्थूलं वपुः सकलजीवनिकायधाम ॥४०॥

भूद्वीप वर्ष सरित् अद्रि नभः समुद्र पाताल दिक् नरक भागण लोक संस्था गीता मया तव नृप अद्‌भुतं ईश्वरस्य स्थूलं वपुः सकल जीव निकाय धाम ॥४०॥

नृप	राजन् !	सकल जीव	सब जीव
भूद्वीप	पृथ्वीके द्वीप,	निकाय	समूहोंका
वर्ष सरित्	वर्ष, नदियां और	धाम	निवास-स्थान
अद्रि	पर्वत,	ईश्वरस्य	भगवान्के
नभः समुद्र	आकाश, समुद्र,	स्थूलं	विराट्
पाताल दिक्	पाताल, दिशाएँ,	अद्भुतं वपुः	अद्भुत रूपका
नरक भागण	नरक, ज्योति-मण्डल,	मया	मैंने
लोक संस्था	लोकोंकी स्थितिरूपी	तव गीता	तुमसे वर्णन कर दिया ॥४०॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्त्र्यां पारमहंस्यां संहितायां पञ्चमस्कन्धे नरकानुवर्णनं नाम षड्विंशोऽध्यायः ॥ २५ ॥

॥ इति पञ्चमः स्कन्धः समाप्तः ॥

॥ हरिः ॐ तत्सत् ॥